सर्वाण्यप्येकीकृतानि चतुश्चत्वारिंशदधिकसहस्रसङ्ख्याकानि भवन्ति । तानि सर्वाण्यपि पादसाहश्रीअकब्बरजल्लालदीनभूशक्रेण पुत्र-प्रपौत्रादिसहितेन महोपाध्यायश्रीभानुचन्द्रगणिपार्श्वे पठितानीति ग्रन्थाद्यसङ्गतिरिरिति कृतं पल्लवेन ।

तत्र शब्दास्त्रिविधाः— रूढा यौगिका मिश्राश्च । तत्र प्रकृति-प्रत्ययविभागेनान्वर्थवर्जिता 'आखण्डला'ऽऽदयो रूढाः । यौगिकास्तु त्रिविधाः— गुणतः क्रियातः सम्बन्धतश्च । तत्र गुणो नील-पीतादिः । क्रिया करोतीत्यादिका । सम्बन्धः स्वस्वामित्वादिः । तेषां च पुनः नीलकण्ठ-स्रष्टृ-भूपतिप्रभृतीन्युदाहरणानि यथासङ्ख्यं ज्ञेयानि । मिश्राः पुनः योगपुरस्कारेण । रूढिमन्तः शम्भु-पङ्कजप्रभृतयः; इति पर्याप्तं विस्तरेण ।

अथ चतुश्चत्वारिंशदधिकसहस्रनाम्नां भगवतः स्तुतिरूपत्वेऽपि शिष्टाचारप्रतिपालनाय निर्विघ्नग्रन्थसमाप्तिकृते च सर्वजनप्रसिद्धमङ्गलद्योतकपदमादावुपदर्शयन्नाह—

"आदिदेवः"१ इति । 'दीव्यति' क्रीडति परमानन्दपदे इति देवः, आदिश्चासौ देवश्चेति कर्मधारयः । अत्र आदिशब्दः पूर्ववाची, सृष्टिकार्यापेक्षया पूर्ववृत्तित्वेन सर्वेषां कारणभूतः । देवानाम् आदिरिति तत्पुरुषो वा; अग्र्यादित्वाद् आदिशब्दस्य पूर्वनिपातः । चतुर्मुखप्रभृतीनां प्रथमतया देवत्वेनाऽऽख्यानीय इत्यर्थः । दिव्धातोः क्रीडा-विजिगीषा-

व्यवहार-द्युति-स्तुति-गतिषु पर्यवसानात् । प्रथमविजिगीषुः-स्वयं परान् समुत्पाद्य विजेतुमिच्छुरित्यर्थः । प्रथमव्यवहारसृष्टेरभावात् प्रथमतयाऽयमेव व्यवहरणयोग्यः । प्रथमद्युतिः-अन्यासां दीधितीनामनुत्पन्नत्वेन प्रथमं द्युतिरूपतयाऽयमेवाऽवभासत इत्यर्थः । प्रथमस्तुतिः-स्तुतिकर्तॄणां स्वयमुत्पादकत्वेन स्वयं स्तुतिरूप इति । प्रथमगतिः-गमनक्रियायाः असाधारणकारणत्वेन, कारणे कार्योपचारात् स्वयं गतिरूप इत्यर्थः । आदिशब्दस्य समीपार्थवाचकत्वेन 'आदौ-समीपे दीव्यतीति आदिदेवः, अधिकारात् परब्रह्मणः इत्यर्थः । अथवा आदिः-मूलकारणं देव इति पूर्वार्थः । अथवा सृष्ट्यपेक्षया आदौ-युगादौ देवः-कमनीय इत्यर्थः । आदिः; अः-कृष्णः, तस्याऽऽदिः-कश्चित् सकलपदार्थसापेक्षाकारी भगवान् । स चासौ देवश्चेति कर्मधारयः, निरञ्जनः इत्यर्थः । अः-कृष्णः, आः-स्वयम्भूः, इः-कामः, ई-श्रीः, उः-ईश्वरः इत्येकाक्षरः । अः-कृष्णः, तस्यादिदेवः-प्रथमस्तुतिविषयविषयिणोरभेदोपचारात् प्रथमस्तुत्य इत्यर्थः । केवलकृष्णोपास्तिकारिणां मते— अः-कृष्णः, तस्य आदिः-अवयवभूतः, स चासौ देवश्चेति कर्मधारयः; कृष्णावयवैर्निष्पन्न इत्यर्थः । केवलसूर्योपास्तिकारिणां मते आदयः-कृष्णप्रकारा देवाः, तेषां देवः-ध्येय इत्यर्थः । अत्र आदिशब्दः प्रकारार्थः । यदुक्तम्—

सामीप्ये च व्यवस्थायां प्रकारेऽवयवे तथा ।
चतुर्ष्वर्थेषु मेधावी आदिशब्दं तु योजयेत् ॥

अथवा अः-विष्णुः, स आदौ येषाम् । ते सत्त्व-रजस्तमःप्रधाना विष्णु-ब्रह्म-शिवाः, तैर्दीव्यते-स्तूयत इत्यर्थः । अथवा आदिषु- आदि-मध्या-ऽवसानेषु दीप्त्या स्वज्योतिषा दीव्यति इति । अत्र आदिशब्देन मध्या-ऽन्तयोरपि ग्रहणम्, प्रथमयोरित्यत्र द्वितीयाया इव तदुक्तम्—

नाऽह्नो न रात्रिर्न नभो न भूमिर्नासीत्तमो ज्योतिरभून्न चान्यत् ।
श्रोत्रादिबुद्ध्याऽनुपलब्धमेकं प्राधानिकं ब्रह्म पुमांस्तदासीत् ।। इति ।।

अथवा आदौ दीव्यति-मनःप्रभृतिपदार्थव्यवहारस्थापनेन व्यवहरति स आदिदेवः, आदिव्यवहारहेतुरित्यर्थः ।

यस्त्वक्-चक्षुः-श्रवण-रसना-घ्राण-पाण्यंह्वि-वाणी-
पायू-पस्थस्थितिरपि मनो-बुध्य-हङ्कारमूर्तिः ।
तिष्ठत्यन्तर्बहिरपि जगद् भासयन् द्वादशात्मा,
मार्तण्डं तं सकलकरणाधारमेकं प्रपद्ये ।। इति शाम्बोक्तेः ।।

अथवा देवपञ्चकपूजायां मुख्यत्वेन आदौ दीव्यति-स्तूयते इति आदिदेवः । 'रविर्विनायकश्चण्डी' इत्यादिवचनैरादावेव पूज्यत्वोक्तेः । अथवा आदौ दीव्यति-आनन्दतीति सः, तदानन्देनाऽन्ये आनन्दन्तीत्यर्थः ।।१।।

"आदित्यः"२ इति । अदितिः-देवमाता, तस्या अपत्यं लोकरूढ्या आदित्यः । अनिदमित्यादिना ञ्यः । आदित्यं जनयतीति वा आदित्यः, अनादिरित्यर्थः; पृषोदरादित्वान्निपातः । आदिभूत इति वा आदित्यः, आदिभूतत्वादिति स्मृतेः । अथवा निखिलनिगमरूपत्वाद् आदित्यः । 'आदित्यो भास्करे देवेऽप्याऽऽम्नाये निगमेऽपि च' । इति मेदिनिः यान्तवर्ग ७४ । यद्वा आदित्याः-देवाः, तान् अभिव्याप्य वर्तते इत्यादित्यः । आङ्पूर्वः तदभिविध्यर्थः ।।२।।

"आदितेजाः" ३ इति । आदि-सृष्टेरर्वाक् तेजो यस्य स तथा, सर्वदा तेजोभिर्व्याप्त इत्यर्थः । आदयः-कृष्णप्रकाराः सुराः, तेषां तेजो यस्येति वा । यद्वा आदौ तेजः-प्रभावो यस्य जगन्निर्माणसामर्थ्यात् । 'तेजो धाम्नि पराक्रमे प्रभावे च ।।' इति विश्वः ।।३।।

"आपः" ४ इति । आप्यन्ते सुखादिति आपः, स्त्रियां बहुवचनान्तः ।

आपः क्विप् ह्रस्वाच्चेति साधुः । कारणे कार्योपचाराद् गौर्वाहीक इव तस्मिन्नारोप इत्यर्थः; सर्वेषां सुखोपलब्धेश्च । यद्वा आ-समन्ताद् आप्नोति-व्याप्नोतीति आपः, सर्वव्यापक इत्यर्थः । आ-समन्ताद्भावेन पातीति वा आपः; यद्वा आपः-जलानीति । 'आदित्याज्जायते वृष्टिः ।।' इति स्मृतेः । ततो जलनामता ।।४।।

''आचारतत्परः'' ५ इति, । आचर्य्यते इत्याचारः, उदया-ऽस्तमनलक्षणः सर्वप्रकाशलक्षणो वा तिमिरापनोदलक्षणो वा श्रुति-स्मृतिलक्षणो वा । तत्र तत्परः-सावधानः, तत्कारित्वात् तत्प्रतिपादकत्वाच्च । यद्वा आचारेषु-वर्णकृत्येषु तत्पराः सर्वे, यस्मात् तदुदयाधीनत्वात् सर्वधर्मप्रवृत्तेः । अथवा आ-समन्तात् चरणम्-इतस्ततः परिभ्रमणं ज्योतिश्चक्रस्य, तत्र तत्परः-तत्प्रयोजकः तदधीशत्वादिति । 'यद्वा एकमूर्तिस्त्रयो देवाः ।' इति प्रसिद्धेः । तेषां आचारः-सृष्ट्यादिलक्षणः, तत्र तत्परः-प्रयत्नवान्; ज्योतिर्विदां मते 'अयमेव सृष्ट्यादिकृद्' इत्यङ्गीकाराद् इति । यद्वा आ-समन्तात् चारः-वियत्परिभ्रमणम्, तत्र तत्परः सर्वदा तत्कारित्वात् । यदि वा 'चर गति-भक्षणयोः' .. इति आचरणम्-आचारः, अभ्यवहारः । तत्र तत्पराः सर्वे; यस्मात् केषाञ्चिन्मते रात्रौ भोजनस्य निषिद्धत्वात् ।।५।।

''आयुः'' ६ इति । तदुपास्तिकारिणां सर्वापायापगमकारित्वेन तत्पोषकत्वात् कारणे कार्योपचारः । 'अनन्तगुणमुत्स्रष्टुमादत्ते हि रसं रविः ।' रघुवंशे श्लोकः इति प्रसिद्धेः । सकलवृष्टिहेतुत्वेन परम्परया तत्कारणजनकत्वेन वा । यद्वा सर्वेषामाहारादिपरिणामहेतुत्वेन आयुःसम्पादकत्वात् । यद्वा आयुर्घटकसंवत्सरादिप्रवृत्तिजनकत्वेन तद्रूपत्वात् । यद्वा सर्वोत्पत्तिहेतुत्वेन तस्याऽपि तदन्तःपातित्वात् कार्योपचारः ।।६।।

''आयुष्मान्'' ७ इति । आयुर्विद्यते यस्य स तथा, मतुप्प्रत्ययान्तः । ननु

सर्वजन्तुसाधारणं नास्याभिधानमिति चेत्; न । अत्र सावधारणत्वेन व्याख्यानात्, सर्वदा आयुष्मानेवेत्यर्थः । आयुः-तद्गतिस्तद्वान् वा ॥७॥

"आकारः"८ इति । आ-समन्तात् क्रियत इत्याकारः, आकृतिविशेषः । तदालोकसहकृतेनैवेन्द्रियेण सर्वासामाकृतीनां गृह्यमाणत्वेन तदुपकारकत्वात् तन्नामता । आ-जगन्मर्यादीकृत्य कारः-कृत्यं प्रकाशलक्षणं यस्येति वा आकारः । आकृतिमान् मण्डलाकृतिमत्त्वेन प्रतीयमानत्वाद् वा । आ-समन्ताद् लोकान् करोतीति आकारः इति वा ॥८॥

"आकाशः" ९ इति । आकाशते सूर्यादयोऽस्मिन्निति आकाशम्, पुं-क्लीबलिङ्गः; आश्रया-ऽऽश्रयिणोः कथञ्चिदभेदोपचारादत्र लक्षणया शब्दप्रवृत्तिः । आ-समन्तात् काशते-प्रकाशते इत्याकाशः । यदि वा आकाशवद् व्यापकत्वाद् आकाशः । आ-समन्तात् काशो-ब्रह्म; 'काशो ब्रह्म' इति पुराणादिति वा । अकं-दुःखम्, तस्य समूहः आकम्, तं श्यतीति आकाशो वा । 'अकं दुःखे च पापे च' इति विश्वः । यद्वा आ-समन्तात् काशः-शब्दविशेषो यस्मादिति आकाशः । आः-मन्मथः, तस्य काशः-कुत्सनं यस्मादिति वा, तदुदये मदनोद्रेकनिवृत्तित्वात् । 'आ विधातरि मन्मथे' इति मेदिनिः ॥९॥

"आलोककृत्" १० इति । आलोक्यते जनोऽनेनेति आलोकः, प्रकाशः । तं करोतीति क्विप्प्रत्ययान्तः । सृष्टिकर्त्रपेक्षया तु आ-समन्ताद् लोकः-संसारः, तत्कारकः इत्यर्थः । आ-समन्तात् स्वदीप्त्या लोकं कृणतीति सः । आ-ब्रह्मा, तस्य लोकः-उत्पत्तिर्यस्माद्वा । अः-कृष्णः, तस्य आलोकः-अलक्ष इति वा । आलोक्यते इत्यालोकश्चक्षुः, तं करोतीति वा; तदधिष्ठातृदेवत्वात् ॥१०॥

"आमुक्तः" ११ इति । आ-समन्ताद् मुक्तः आमुक्तः, तत्तत्पदार्थसम्बन्धवत्त्वेऽपि अनुपाधिकस्वरूपः । सर्वत्रानुपहतगतित्वेन

आमुक्तः-निरावरण इति वा । अविद्यानास्कन्दितत्वेनामुक्त इति वा । यद्वा 'आ विधातरि मन्मथे' इति वचनात्; कामेन मुक्त इत्यर्थः । 'आ सन्ताप-कोपयोः' इत्युक्तेः, सन्ताप-कोपाभ्यां मुक्तो वा ॥११॥

"ॐकारः" १२ इति । ॐ-इत्यनादिवर्णः । 'वर्णात् कारः' इति कारप्रत्ययः । अनादित्वेन सर्ववर्णोत्कृष्टत्वेन चाभिन्नोपमाऽतस्तदभिधानता। सृष्टिकर्तृत्वे तु अवतीति ॐ, कश्चिज्जगद्रक्षाकृत् पुरुषविशेषः । तस्य कारः-करणं यस्य स तथा । शब्द-ब्रह्मरूपस्त्रयीमय इति वा । अवतीति ॐ रक्षाकारित्वम्, तदेव कारः-कृत्यं यस्येति वा ॥१२॥

"आरोग्यः" १३ इति । आरोग्यं-धर्मविशेषः, धर्म-धर्मिणोरभेदोपचारः । रोगः-जरा-मरणादिः, तदभावः अरोगः । तत्र साधुररोग्यः, अरोग्य एव आरोग्यः ॥१३॥

"आरोग्यकारणः" १४ इति । जगत्कर्तृत्वापेक्षया आरोग्यस्य तदधीनत्वेन तद्धेतुः । यदुक्तमागमे— 'आरोग्यं भास्करादिच्छेद्धनमिच्छेद्धुताशनाद् ॥' इति ॥१४॥

"आशुगः" १५ इति । आशु-त्वरितं गच्छतीत्याशुगः । यदुक्तमागमे— 'कर्कसङ्क्रान्तिदिने रवेरुदयास्तयोरन्तरक्षेत्रमानं योजनानां चतुर्नवतिः सहस्राणि पञ्च शतानि षड्विंशत्यधिकानि, द्विचत्वारिंशच्च षष्ठिभागा योजनस्य ॥' योजनं चात्र दैवम्, मनुष्ययोजनाच्चतुःशतगुणितं मन्तव्यम् । तथा पुराणादावप्युक्तम्—

'योजनानां सहस्रे द्वे द्वे शते द्वे च योजने ।

एकेन निमिषार्धेन क्रममाण ! नमोऽस्तु ते ॥' इति ।

आशुग इव आशुग इति वा, अतीवशीघ्रगामित्वात् । जगतः प्राणभूत इति वा; 'आशुगौ वायु-विशिखौ' इत्युक्तेः ॥१५॥

"आतपः" १६ इति। आतपतीत्यातपः, सर्वदा तपनस्वभावत्वात् ॥१६॥

"आतपी" १७ इति। आतपः-प्रकाशः, सोऽस्यास्तीति इन्प्रत्ययान्तः; स्व-परप्रकाशवान् इत्यर्थः ॥१७॥

"आत्मा" १८ इति। अतति-सततं गच्छतीति आत्मा इति निरुक्त्या, मुख्यवृत्त्याऽस्यैव तत्प्रसङ्गः, गौणवृत्त्याऽन्येषामपि ॥१८॥

"आत्रेयः" १९ इति। अत्रिः-मुनिः, तस्यापत्यमात्रेयः-चन्द्रः। तदंशप्रवेशेनैव तस्योदयसम्भवात् तन्नामता। आत्रेयः-करुणान्वित इति वा। 'आत्रेयी पुष्पवत्यां स्यादात्रेयः करुणान्वितः ॥' इति मेदिनिः ॥१९॥

"असहः" २० इति। न सहः असहः; अन्येषां महसामभिभावकः ॥२०॥

"असङ्गगामी" २१ इति। सङ्गः-संयोगः, तदनधीनत्वेन गन्तुशीलमस्येति सः। असङ्गान्-निःपरिग्रहान् गच्छति-प्राप्नोतीति वा, तद्ध्येतॄणां निर्ग्रन्थानां प्रत्यक्षरूप इत्यर्थः ॥२१॥

"असुरान्तकः" २२ इति। सुष्ठु राजन्ते इति सुराः। न सुरा असुराः, दैत्याः। तेषामन्तं-नाशं करोतीति असुरान्तकः, तद्विनाशकारीत्यर्थः। असवः-प्राणाः, तैः राजन्ते इत्यसुराः, प्राणिनः। तेषामनुगतावित्यस्मान्निष्पन्नोऽन्तशब्दो निश्चयवाची। तेन अन्तेन-निश्चयेन, कं-सुखं यस्मात् स तथा। 'कं शिरो जलमांख्यातं कं सुखे परिकीर्तितम् ॥' इत्यजयः। यद्वा— 'असुरा रजनीवाम्योः' इति मेदिनीकारोक्तेः। तस्या अन्तकः-नाशकः। अः-कृष्णः, सुराः-देवाः, अन्तकः-यमः, तेषां कः-आत्मा वा। 'को ब्रह्मा-ऽऽत्म-प्रकाशा-ऽर्क-केकि-वायु-यमा-ऽग्निषु ॥' इत्यमरचन्द्रः। असुराः-रौद्राकारधारिणो म्लेच्छविशेषाः, तेषामन्तं करोतीति वा ॥२२॥

"उस्रपतिः" २३ इति। उस्राः-किरणाः, तेषां पतिः-प्रभुः, 'सर्वेषां तेजसां

पतिः ॥' इति श्रुतेः ॥२३॥

"अहस्पतिः" २४ इति । अहते-गच्छतीति अहः, दिनम् । तस्य पतिः, तस्य तदधीनत्वात् ॥२४॥

"अहिमान्" २५ इति । अहयः-सरीसृपाः, रथे रश्मिभूता विद्यन्ते यस्य स तथा । अः-कृष्णः, तस्य हिः-ज्ञानं विद्यते यस्य स तथा । अस्त्यर्थे मतुप् । 'हिर्हेतौ पदपूर्तौ च विशेषे-ऽप्यवधारणे ॥' मेदिनिकोश इत्युक्तेः । अस्य कृष्णस्य हिः-विशेषो विद्यते यस्मादिति वा ॥२५॥

"अहिमांशुभृत्" २६ इति । अहिमाः-उष्णाः किरणाः, अंशवः । तान् बिभर्तीति अहिमांशुभृत् । सर्वधातुभ्यः क्विप् । अः-विष्णुः, हिमांशुः-चन्द्रः, तौ बिभर्ति-पोषयतीति वा । 'अः कृष्ण आः स्वयम्भूरिः काम ईः श्रीरुरीश्वरः ॥' इत्येकाक्षरः ॥२६॥

"अहिमकरः" २७ इति । कार्यन्ते इति कराः । न विद्यते हिमः-शैत्यं येषु ते अहिमाः । एवंविधाः करा यस्य यस्मिन् वा स तथा । तदन्य-तद्विरुद्ध-तदभावेषु नञ् वर्तत इति । हिमकरः-चन्द्रः, तद्विरोधी तद्दीप्तिहारकत्वाद् वा । अहिमं-शैत्यरहितम्, अर्थाज्जगत् करोतीति वा ॥२७॥

"अहिमरुक्" २८ इति । हिमं-तुहिनम्, तज्जनिता या रुक्-पीडा, सा न विद्यते यस्मात् स तथा । अहिमा-हिमनाशिका रुग्-दीप्तिर्यस्येति वा ॥२८॥

"अहिमरुचिः" २९ इति । न विद्यते हिमं येषु ते अहिमाः-उदयाचलप्रभृतयो नगाः, तेषु रुचिर्यस्य स तथा । अहिमानाम्-उष्णवस्तूनां रुचिः-अभिलाषो यस्मिन्निति वा । 'रुचिरभिष्वङ्गा-ऽभिलाषयोः ॥' इति मेदिनिः । चतुर्णाम् नाम्नाम् एषामभिन्नार्थकानामपि कथञ्चिद्भेद उपपादितः, वस्तुतस्तु न भेदः, न चात्र पौनरुक्त्यम्—

'सज्झाय-ज्झाण-तव-ओसहेसु उवएस-थुइपहाणेसु ।

संतगुणकित्तणेसु य ण हुंति पुणरुत्तदोसा उ ॥' इत्युक्तेः ॥ २९॥

"अहिंसकः" ३० इति । हिनस्तीति हिंसकः । न हिंसकः-अहिंसकः, सकलजगज्जन्तुजीवातुरित्यर्थः ॥३०॥

"अहर्मणिः" ३१ इति । अह्नां-दिनानां मणिरिव मणिः, तच्छोभाकारित्वात् ॥३१॥

"उदारकर्मा" ३२ इति । उदाराणि-जगत्प्रकाशलक्षणानि ज्योतिष्टोमादीनि वा कर्माणि यस्मिन् यस्माद् वा स तथा ॥३२॥

"अद्वितीयः" ३३ इति । न विद्यते द्वितीयस्तेजस्वितया जगत्कर्तृतयोपमानतया वा यस्य स तथा, सजातीय-विजातीयभेदशून्य इत्यर्थः ॥३३॥

"उदीच्यवेशः" ३४ इति । उदीच्याम्-उत्तरस्यां दिशि, अवेशः-अप्रवेश उदया-ऽस्तमनकाले यस्य स तथा । 'उदीच्यवेषः' इति पाठे; उदीच्ये-पश्चिमोत्तरदेशे, वेषः-शोभाधायकं स्वरूपं यस्येति वा, उत्तरायणगतस्य तस्याधिकदीप्तिमत्त्वात् ॥३४॥

"अपांपतिः" ३५ इति । अपां-जलानां पतिः-स्वामी, तत्प्रवर्तकत्वात् । 'आदित्याज्जायते वृष्टिः' इति प्रसिद्धेः ॥३५॥

"अभयप्रदः" ३६ इति । अभयं-चौरादिभ्यो रक्षणं तमोविध्वंसलक्षणं वा, प्रकर्षेण ददातीति अभयप्रदः; चौरादिजनितातङ्कविध्वंसक इत्यर्थः । अभयम्-एकात्म्यं प्रददातीति वा, 'भयं द्वितीयाभिनिवेशितं स्याद्' इत्युक्तेः ॥३६॥

"अभिनन्दितः" ३७ इति । अभि-सामस्त्येन, नन्दितः-समृद्धः सर्वदा वैभवयुक्तः । त्रिसन्ध्यं ब्राह्मणैस्तत्तत्स्तवैः स्तुतिगोचरीकृत इति वा ॥३७॥

"अभिष्टुतः" ३८ इति । अभि-सामस्त्येन, स्तूयत इति अभिष्टुतः; सर्वकालं प्रेक्षावद्भिर्ब्रह्मादिभिर्वा स्तुतिविषयीकृत इत्यर्थः ॥३८॥

"अब्जहस्तः" ३९ इति । अब्जं-कमलं हस्ते यस्य स तथा, तद्विकाशस्य

तदधीनत्वात्। अब्जाकारौ हस्तौ यस्येति वा ॥३९॥

"अब्जबान्धवः" ४० इति। अब्जानां-पद्मानां बान्धव इव बान्धवः। अब्जान्येव बान्धवभूतानि यस्येति वा स तथा; तदुदया-ऽस्तमनयोस्तेषामपि तथावस्थितिदर्शनात् ॥४०॥

"अपराजितः" ४१ इति। पराजीयते स्म पराजितः। न पराजितोऽपराजितोऽभग्नः, परतेजोभिर्नैवाभिभूत इत्यर्थः ॥४१॥

"अप्रमेयः" ४२ इति। प्रमातुं योग्यः प्रमेयः, न प्रमेयोऽप्रमेयः, इयत्तावच्छिन्नपरिमाणतया वक्तुमशक्यः, प्रत्यक्षप्रमाणागोचर इति वा ॥४३॥

"अजः" ४३ इति। न जायते इत्यजः, उत्पत्तिरहित इत्यर्थः ॥४३॥

"उच्चैः" ४४ इति। सान्तमव्ययमुच्चत्ववाचकम्, तेन सर्वेषामुपरि वर्तमानः। 'नीचैरल्पे महत्युच्चैः' इति हैमः ॥४४॥

"अच्युतः" ४५ इति। न च्यवते इत्यच्युतः सर्वदा वर्तमानत्वात्; षड्भावविकाररहित इति वा। ते च— १.जायते २अस्ति ३. विपरिणमते ४. वर्धत ५.अपनीयत ६. विनश्यति चेति ॥४५॥

"अजयः" ४६ इति। अः-विनतासूनुस्तेन जयतीत्यजयः, सर्वदा तदधीनगतित्वात्। न विद्यते जयो यस्येति वा, यत्प्रतियोगिको जयः कस्यापि नास्तीत्यर्थः ॥४६॥

"अचलः" ४७ इति। न चलतीत्यचलः स्वप्रतिज्ञाया इति ज्ञेयम्। परतन्त्रतया चलतीति वा। न विद्यते चलनम्-असत्ता यस्येति वा सदा सद्रूपत्वात् ॥४७॥

"अचिन्त्यः" ४८ इति। न चिन्त्योऽचिन्त्यः, 'अयमेतादृशः'[१] इति। विश्वप्रपञ्चविलक्षणत्वेन चिन्तयितुमशक्यत्वात्, प्रमाणागोचर इति वा ॥४८॥

"अचिन्त्यात्मा" ४९ इति। 'आत्मा पुंसि प्रभावे च प्रयत्न-मनसोः ॥' इति

विश्वप्रकाशवचनाद् ।। अचिन्त्यः आत्मा-प्रभावो यस्य स तथा । यद्वा अततीत्यात्मा मत्प्रत्ययान्तः । अचिन्त्यः-बाह्यज्ञानेनाऽनवसित आत्मा-स्वरूपं यस्य स तथा । तस्य निरंशत्वेन बाह्येन्द्रियाविषयत्वात् ।।४९।।

''अचरः'' ५० इति । 'चर गति-भक्षणयोः' इत्यभ्यवहाराभिलाषरहितः । यद्वा दीप्तिमान् । 'अचरः स्थावरेऽपि स्यादचरो दीप्तिमत्यपि ।।' इति मेदिनिः ।।५०।।

''अजितः'' ५१ इति । न जीयते स्म इत्यजितः, न केनापि भृत्यतामापादितः ।।५१।।

''अविचिन्त्यवपुः'' ५२ इति । उप्यते इति वपुः, शरीरम् । अविचिन्त्यम्-अनालक्षणीयं तद् यस्येति स तथा, अनेकरूपत्वात् तस्येति भावः ।।५२।।

''अव्ययः'' ५३ इति । न व्येति-विविधं विकारं न प्राप्नोतीत्यव्ययः, शत्रु-मित्रयोः समचेतस्कत्वात् । न विद्यते व्ययः-नाशो यस्येति वा ।।५३।।

''अव्यङ्गधारी '' ५४ इति । विरुद्धान्यङ्गानि व्यङ्गानि । न व्यङ्गानि धारयतीति स तथा । अव्यङ्गम्-अव्यभिचारि ज्ञानं धारयतीति वा । अवेरङ्गं यत्र सः अव्यङ्गः, अर्थाघज्ञस्तं धारयति पोषयतीति वा ।।५४।।

''ऊर्जितः'' ५५ इति । 'ऊर्ज बल-प्राणयोः' इति प्रकृष्टबलवान् ।।५५।।

''अयोनिजः'' ५६ इति । योनिः-स्त्रीचिह्नम्, तस्माज्जातो योनिजः, पश्चान्नञ्समासः । यद्वा 'यो वेधसि यमे वाते' इत्यनेकार्थवचनात् । अः-कृष्णः, यः-ब्रह्मा, उः-ईश्वरः, एते निजाः-स्वकीया यस्येत्यर्थः ।।५६।।

''ऐन्धनः'' ५७ इति । इन्धनात् समुद्भूतो वह्निः ऐन्धनः, भवाद्यर्थेऽण् इत्यण्, ऐन्धन इवैन्धनस्तद्वत् स्व-परप्रकाशकः । 'ऐकारश्च महेश्वरे' इति । ऐ-महेश्वरः, स एव धनं यस्येति वा, अनुस्वारः छान्दसत्वात् । 'इन्धी दीप्तौ' इत्यस्य धातोर्ण्युप्रत्यये स्वार्थेऽणि ऐन्धनः-दीप्तिमानिति वा ।।५७।।

"एकः" ५८ इति । 'एकोऽन्यः केवलः श्रेष्ठः' इति । एकः-श्रेष्ठः प्रशस्यः इति यावत् ॥५८॥

"एकाकी" ५९ इति । एकः-असहायो गच्छतीति एवंशीलः एकाकी, परानधीनगमनत्वात् । सृष्ट्यादिकरणे परानपेक्ष इति वा ॥५९॥

"एकचक्ररथः" ६० इति । एकं चक्रं यत्र तादृग् रथो यस्य स तथा । तद्रथस्यैकचक्रता सुप्रसिद्धैव ॥६०॥

"एकनाथः" ६१ इति । 'एके मुख्या-ऽन्य-केवलाः' इति । एकः-मुख्यो नाथः एकनाथः ॥६१॥

"ईशः" ६२ इति । ईष्ट इति ईशः, समर्थः सर्वेषां सुख-दुःखप्रदानक्षमः । यदुक्तम्— 'ईश्वरप्रेरितो गच्छेत् स्वर्गं वा श्वभ्रमेव वा ॥' इति । ईः-लक्ष्मीः, तां शास्तीति-सन्मार्गे प्रवर्तयतीति वा, अप्रतिहतेच्छ इति वा ॥६२॥

"ईश्वरः" ६३ इति । इष्ट इति ईश्वरः । 'ईशादेर्वरः' इति वरप्रत्ययः । सकलशक्तिमत्त्वाद् अणिमाद्यष्टसिद्धिप्रदातृत्वाद् वा । त्रिजगज्जनतानिषेव्यमानचरणेन्दीवरत्वाद् वा । भक्तानां यथाभिलषितार्थसम्पादकत्वाद् वा ॥६३॥

"अक्लिष्टकर्मकृत्" ६४ इति । अक्लिष्टं-शुभं कर्म-त्रिजगत्प्रकाशलक्षणं करोतीति अक्लिष्टकर्मकृत्, सर्वधातुभ्यः क्विप् । अक्लिष्टानि कर्माणि जायन्ते यस्मात् सोऽक्लिष्टकर्मा । 'वेदस्तं करोति' इति नैयायिकाः । 'तत्प्रवर्तकः' इति तु मीमांसकाः । न विद्यतेऽन्यत् क्लिष्टं कर्म यस्मादिति अर्थात् पापम्, तत् कृन्ततीति वा । अनायासेन कर्मकारीति वा ॥६४॥

"उग्ररूपः" ६५ इति । उग्रं-भीमं रूपं यस्य स तथा, अतितेजस्वितया दुर्निरीक्ष्यरूपत्वात् । अथवा उग्रः-ईश्वरः, स एव रूपं यस्य स तथा, सृष्ट्यादिकारकत्वात् ॥६५॥

"अग्निः" ६६ इति । अगति-ऊर्ध्वं गच्छतीति अग्निः, तत्समानधर्मत्वात् तदभिधानता । यद्वा अग्निरिवाऽग्निः, तीव्रतेजस्वितयाऽभेदोपचारः । हिमनिर्वर्तकत्वसाम्याद् वा । सूर्यकान्तादावग्निजनकत्वात् ॥६६॥

"अकिञ्चनः" ६७ इति । नास्ति किञ्चन अस्येति अकिञ्चनः, सर्वपापपरिग्रहपराङ्मुख इत्यर्थः । न विद्यते किञ्चन भिन्नं यस्मादिति वा सर्वव्यापकत्वात् ॥६७॥

"अक्रोधनः" ६८ इति । क्रुध्यतीति क्रोधनः, 'रुष क्रुधे' इत्यनः, पश्चान्नञ्तत्पुरुषः; रोषात्यन्ताभावाधिकरणक इत्यर्थः ॥६८॥

"अक्षरः" ६९ इति । न क्षरतीत्यक्षरः-सर्वदा तदवस्थः । यद्वा अक्षं-चक्षू राति-ददातीति वा ॥६९॥

"अलङ्कारः" ७० इति । अलङ्क्रियते विश्वमनेनेति अलङ्कारः, सर्वेषां भूषाकृदिति तात्पर्यार्थः । जगतां स्वकिरणैर्भूषणं करोति वा ॥७०॥

"अलङ्कृतः" ७१ इति । अलङ्क्रियते स्मेति अलङ्कृतः; स्फुरत्कान्तिकलापेन विभूषितः, जगत्पर्याप्तिकर्तेति वा । 'अलं भूषण-पर्याप्ति-वारणेषु' इत्युक्तेः ॥७१॥

"अमायः" ७२ इति । न विद्यते माया-दम्भोऽस्येति अमायः, सर्वथा विगतकौटिल्याभिप्रायः ॥७२॥

"अमेयात्मा" ७३ इति । इयत्तयावच्छेदकरहित आत्मा-स्वरूपमस्येति, ईदृक् इयत्तया वा दुर्ज्ञेयस्वरूप इति फलितार्थः । सर्वप्राणिभिरमेय आत्मा-बुद्धिर्यस्येति वा । 'आत्मा यत्नो धृतिर्बुद्धिः" इत्यमरः ॥७३॥

"अमरप्रभुः" ७४ इति । अमराः-देवाः, तेषां प्रभुः-तद्रक्षाकृत् । अमराः प्रभवो येनेति वा । अमराः प्रभवन्ति यस्मादिति वा ॥७४॥

"अमरश्रेष्ठः" ७५ इति । तेषु पूर्वोक्तेषु त्रिजगत्प्रकाशकारित्वेनाऽयमेव श्रेष्ठः-प्रशस्यः ॥७५॥

''अमितः'' ७६ इति। अमितं-प्रचुरमर्थात्तेजो यस्य स तथा। देशतः कालतश्चापरिच्छिन्न इति वा। मानातीत इति वा ॥७६॥

''अमितात्मा'' ७७ इति। अमितः-सर्वव्यापक आत्मा यस्येति सः, सर्वत्र तदुपलब्धेः। अमिताः-असङ्ख्याताः आत्मानः-स्वरूपाणि यस्येति वा ॥७७॥

''अणुः'' ७८ इति। अणतीत्यणुः, किञ्चिन्न्यून-दैवतयोजनप्रमितमण्डलत्वेऽपि अत्राल्पतया दृश्यमानत्वात्। अणुः-परमाणुस्तद्वदिव सर्वत्राऽप्रतिहतगतिरिति वा ॥७८॥

''इनः'' ७९ इति। एतीति इनः, सर्वदा गमनस्वभावत्वात्। इं-काममर्थात् क्षयं नयतीति इनः; सर्वप्रभुरिति वा जगत्कारित्वात् ॥७९॥

''अनाद्यन्तः'' ८० इति। आदिश्चान्तश्च तौ न विद्येते यस्य स तथा, उत्पत्ति-विनाशरहितः ॥८०॥

''अन्धकारापहः'' ८१ इति। अन्धं करोतीति अन्धकारः, तम् अपहन्तीति अन्धकारापहः-तमोविनाशकः। अन्धकारवद् आवरकत्वाद् अन्धकारः-अज्ञानम्, तन्निवारक इति वा ॥८१॥

''इन्द्रः'' ८२ इति। इन्दनाद् इन्द्रः। 'इदि परमैश्वर्ये' औणादिको 'र'प्रत्ययः ॥८२॥

''अम्भः'' ८३ इति। अमिति निम्नप्रदेश इति अम्भः, तत्प्रदातृत्वात् शुचिकारित्वाद् वा। यदि वा अमनम् अम्, निरन्तरं गमनम्। तेन भातीति अम्भः ॥८३॥

''अम्भोजबन्धुः'' ८४ इति। अम्भोजानां-कमलानां विकाशकारित्वेन बन्धुरिव बन्धुः। यद्वा अम्भोजं-विद्युल्लक्षणं तेजः, तदेव बन्धुर्यस्य सजातीयत्वात्। अम्भोजानि बध्नाति-शोभयते इति वा ॥८४॥

''अम्बुदः'' ८५ इति। अम्बु-पानीयं ददातीति अम्बुदः, 'नाम्नि च' इति

डः । मुख्यवृत्त्याऽस्यैव तद्धेतुत्वात् ॥८५॥

"अम्बरभूषणः" ८६ इति । अम्बरस्य-आकाशस्य भूषणम्, तद्गतनीलतायाः प्रकाशकारित्वात् । केवलं 'भूषणः' इति पाठे, भूषयतीति भूषणः ॥८६॥

"अनेकः" ८७ इति । न एकः अनेकः, द्वादशात्मकतया प्रसिद्धः । मायाविजृम्भितानेकरूप इति वा ॥८७॥

"अङ्गारकः" ८८ इति । अङ्गानि इयर्तीति अङ्गारकः, कुजः । अत्र सेव्य-सेवकयोरभेदोपचारः, अङ्गारवर्णत्वाद् वा ॥८८॥

"अङ्गिरा" ८९ इति । अङ्गिरा-ऋषिः, अत्र ध्यातृ-ध्येययोः कथञ्चिदैक्यात् तदुपचारः । अङ्गिनः-प्राणिनः, राति-स्वीयत्वेन गृह्णातीति क्विप्प्रत्ययान्तस्य रूपं वा ॥८९॥

"अनलः" ९० इति । अनितीति अनलः, वह्निः । दाहकत्वगुणयोगात् तदभिधानता । अलतीति अलः, न अलः अनलः-अपर्याप्तः, अर्थाद् गमनादिति वा । अनान् प्राणान् लाति आत्मत्वेनेति वा, सर्वान्तर्गामित्वात् ॥९०॥

"अनलप्रभः" ९१ इति । अनलः-वह्निः, तद्वत् प्रभा यस्य स तथा, स्व-परप्रकाशकत्वात् । 'यच्चन्द्रमसि यच्चाग्नौ तत् तेजो विद्धि मामकम्' इति पुराणोक्तेः । अनलप्रभा यस्येति वा ॥९१॥

"अनिमित्तगतिः" ९२ इति । अनिमित्ता-साधननिरपेक्षा गतिर्यस्येति सः, स्वभावादेव गतिमानित्यर्थः । गत्यर्थ-ज्ञानार्थयोरैक्याद् अनिमित्ता-पठनव्यतिरेकेण गतिः-ज्ञानं यस्येति वा ॥९२॥

"अनङ्गः" ९३ इति । न विद्यते अङ्गं-शरीरं यस्य स तथा परब्रह्मरूपत्वेन, शरीराभावात् पाञ्चभौतिकशरीररहित इति वा ज्योतिर्मयस्वरूपत्वात् ॥९३॥

"अन्नम्" ९४ इति । तस्य परिपाकहेतुत्वेन कारणे कार्योपचारः, सर्वपोषकत्वाद् वा ॥९४॥

"अनन्तः" ९५ इति । न विद्यते अन्तः-विनाशः, अयमेतादृगिति निश्चयो वा यस्य स तथा, देश-काल-वस्तुपरिच्छेदाभावाद् वा ॥९५॥

"अनिर्देश्यः" ९६ इति । गुण-क्रिया-जातिभिर्निर्देष्टुमशक्यः ॥९६॥

"अनिर्देश्यवपुः" ९७ इति । अनिर्देश्यम्-अनिर्वचनीयं वपुः-शरीरं यस्य स तथा, तेजोमयत्वात् ॥९७॥

"अंशुः" ९८ इति । अश्नुते-व्याप्नोतीति अंशुः । औणादित्वात् साधुः, गुण-गुणिनोरभेदोपचारः ॥९८॥

"अंशुमान्" ९९ इति । अंशवो विद्यन्ते यस्य यस्मिन् वा स तथा, अस्त्यर्थे मतुः ॥९९॥

"अंशुमाली" १०० इति । अंशूनां मां-शोभाम्, आनयति-प्राणयतीति वा अंशुमालीति । अंशूनां माला-परम्परा विद्यते यस्य स तथा । अंशून् मालयति-धारयतीति वा । 'मल् धृतौ' इत्यस्य रूपम् ॥१००॥

॥ इति पादसाहश्रीअकब्बरसूर्यसहस्रनामाध्यापकश्रीशत्रुञ्जयतीर्थकरमोचनाद्य-नेकसुकृतविधापकमहोपाध्यायश्रीभानुचन्द्रगणिविरचितायां तच्छिष्याष्टोत्तरश-ता-वधानसाधनप्रमुदितपादशाहश्रीअकब्बरप्रदत्त 'खुस्फहमा'ऽपराभिधानमहो-पाध्यायश्रीसिद्धिचन्द्रगणिशोधितायां शेखश्रीअबुलफजलकारितायां चतुश्चत्वारिंशदधिकश्रीसूर्यसहस्रनामटीकायां प्रथमशतविवरणं समाप्तम् ॥

"अनुत्तमः" १०१ इति । न विद्यते उत्तमो यस्मात् स तथा । 'न त्वत्समोऽस्त्यभ्यधिकः कुतोऽन्यः' इति स्मृतेः ॥१०१॥

"अरिहा" १०२ इति । अरीन् हन्तीति अरिहा, भक्तशत्रुविनाशक

इत्यर्थः ॥१०२॥

"अर्हन्" १०३ इति । सुरा-ऽसुरेन्द्रादिकृतां पूजामर्हतीति अर्हन्, 'अर्ह पूजायाम्' ॥१०३॥

"अरविन्दाक्षः" १०४ इति । अरविन्दं-कमलं तद्वद् अक्षिणी-लोचने यस्य स तथा । अरं-चक्रं विन्दति-प्राप्नोतीति अरविन्दः,विष्णुः । तस्य अक्षः-स्तुत्यः ।

'अक्षो ज्ञानात्म-शकट-व्यवहारेषु पाशके ।
रुद्राक्षेन्द्राल्पयोः स्तुत्ये विभीतकतरावपि ॥' इति मेदिनीकारः ॥१०४॥

"अर्यमा" १०५ इति । आकाशमार्गेण गमनशीलः । 'अर्यः स्वामि-वैश्ययोः' ॥ इति । अर्याणां-स्वामिनां मननं मन्, ज्ञानं यस्माद्वा ॥१०५॥

"अर्कः" १०६ इति । अर्च्यते-स्तूयतेऽर्च्यते इति वा अर्कः ॥१०६॥

"अरिमर्दनः" १०७ इति । अरीन्-शत्रून् मर्दयति-नाशयतीति अरिमर्दनः । अरं-पापम्, तद् अस्यास्तीति अरी, पापी । तन्नाशक इति वा । 'अरं शीघ्रे च चक्राङ्गे शीघ्रगे कल्मषेऽपि च ॥' इति धरणिः ॥१०७॥

"अरुणसारथिः" १०८ इति । अरुणः-विनतासूनुः, स एव सारथिर्यस्य स तथा । आरक्तमण्डलत्वादरुणः, अन्तर्यामितया धर्मा-ऽधर्मप्रेरकत्वात् सारथिः, पश्चात् कर्मधारय इति वा ॥१०८॥

"अश्वत्थः" १०९ इति । अश्वत्थः-पिप्पलकः, सर्वदेवात्मकतयाऽस्य प्रसिद्धेस्तन्नामता ॥१०९॥

"अशीतरश्मिः" ११० इति । अशीताः-उष्णाः रश्मयो यस्य स तथा । न विद्यते शीतं यस्मादिति अशीतः, अग्निः । स रश्मिः-मूर्त्यन्तरं यस्येति वा । 'किरणे प्रग्रहे रश्मिस्तथा मूर्त्यन्तरे पुमान् ॥' इति मेदिनिः । शमनं-शीः । न शीः अशीः । ताम् इताः-प्राप्ताः रश्मयो यस्येति वा ॥११०॥

"उष्णकर:" १११ इति । उष्णाः कराः-किरणा यस्य स तथा । ननु पूर्व-परयोः समानार्थत्वात् पुनरुक्ततादोषः इति चेद्, न । समानार्थत्वेऽपि 'दण्डाकारा रश्मयः कराः' इति निरुक्तिभेदाद् भेदः । उष्णम्-उष्णतागुणयुक्तमर्थाज्जगत् करोतीति वा । उष्णः करः-प्रतापो यस्येति वा । 'करो वर्षोपले रश्मौ, प्रतापे प्रीति-शुण्डयोः ॥' इत्यनेकार्थः ॥१११॥

"अश्विनः" ११२ इति । असूनां-प्राणानाम्, इनः-स्वामी, वृष्ट्यादिद्वाराऽन्नसम्पादकत्वेन तद्धारकत्वात्, मासाधिपतित्वाद् वा ॥११२॥

"अशिशिरः" ११३ इति । न विद्यते शिशिरः-शीतलतालक्षणो गुणो यस्य स तथा, अजड इति वा । 'शिशिरो ना हिमे वा स्त्री ऋतुभेदेऽजडे त्रिषु ॥' इति मेदिनिः ॥ अ-अरुणः, तेन शिशिरः-शीतलः, सर्वदाऽपृथग्भूतत्वात्; प्रसन्नस्वान्त इति वा ॥११३॥

"अतुलद्युतिः" ११४ इति । न विद्यते तुला-साम्यं यासां ताः अतुलाः, एवंविधा द्युतयो यस्येति स तथा ॥११४॥

"अतीन्द्रः" ११५ इति । इन्द्रं अतिक्रान्त अतीन्द्रः; तेजस्वितया इन्द्रादधिक इत्यर्थः । अतिशयेनेन्दति-परमैश्वर्येण शोभते इति वा ॥११५॥

"अतीन्द्रियः" ११६ इति । इन्द्रियमतिक्रान्तो यः स तथा, क्रान्ताद्यर्थे समासः । इन्द्रियजन्यज्ञानागोचरः ॥११६॥

"उत्तमः" ११७ इति । उद्गतं तमो यस्मात् सः । 'क्षीणे च तमसं तमः' इत्यकारान्तदर्शनात् । उत्कर्षकाष्ठां गत इति वा, तदपेक्षोत्कृष्टाभावात् ॥११७॥

"उत्तरः" ११८ इति । उत् प्राबल्येन तीर्यते संसारसागरमनेनेति सः ॥११८॥

"तरणंतरः" ११९ इति । उद्गतसूरः संसारसागरतरणोपायो यस्माद् वा

॥११९॥

॥ इत्येकोनविंशत्यधिकं नाम्नां शतं स्वरादि ॥

"साधुः" १२० इति। साध्यते सम्यग्दर्शनादिना परमपदमिति साधुः ॥१२०॥

"सावर्णिः" १२१ इति। आ-समन्ताद्भावेन वर्णनम्-आवर्णिः, तया सह वर्तत इति सावर्णिः, सर्वस्तुत्य इत्यर्थः। "सावर्णः" इति पाठे तु वर्णाभावेन सह वर्तत इति सावर्णः, वर्णानां पश्चादुत्पन्नत्वात् ॥१२१॥

"सावित्रीभाविता" १२२ इति। सावित्री-गायित्री, तां भावयतिप्रापयतीति सावित्रीभाविता। 'भू प्राप्तौ' इत्यस्य रूपम्। णिज्लोपश्छान्दसः ॥१२२॥

"सायनः" १२४ इति। अयनाभ्यां दक्षिणोत्तराभ्यां सह वर्तत इति सः, तत्कारित्वाद् वा ॥१२४॥

"सौख्यम्" १२५ इति। सुखयतीति सुखम्। सुष्ठु खनतीति। सु-शोभनानि खानि-इन्द्रियाणि अत्रेति वा। तद्भावः सौख्यम्, तदात्मकत्वात् तत्कारित्वाद् वा ॥१२५॥

"सागरः" १२६ इति। सगरस्यायं सागरः, तत्खनितत्वाद्। अत्र गाम्भीर्यादिगुणैरभेदोपचारः ॥१२६॥

"साम;" १२७ इति। 'वेदानां सामवेदोऽहम्' इति भारतोक्तेर्वेदोत्तम इत्यर्थः। साम-दाम-भेद-दण्डा उपाया इति। अत्रस्थ 'साम'शब्दप्रयोगे अस्यति वैरमनेनेति साम, सर्वेषां वैरनाशक इत्यर्थो ज्ञेयः ॥१२७॥

"सामवेदः" १२८ इति। 'साम' इति नाम्ना वेदः, तत्प्ररूपकत्वात्; कारणे कार्योपचारः। साम वेत्तीति वा। 'साम'इत्युपलक्षणं सर्ववेदविदित्यर्थः ॥१२८॥

"शार्ङ्गधन्वा" १२९ इति। शार्ङ्गं धनुर्यस्य स शार्ङ्गधन्वा, कृष्णः; सर्वव्यापकत्वात्। शार्ङ्गधनुः-स्थलं यस्येति वा। 'धन्वा तु मरुदेशे ना क्लीबं चापे स्थलेऽपि च ॥' इति विश्वः ॥ "सारङ्गधन्वा" इति पाठे तु सारङ्गः-

हिंसासक्तः पुरुषः, तत्र धन्वा, तन्निवारकत्वात् । सारङ्गः-अग्निः, स एव धनुः-स्थलं स्वतेजसः स्थापने यस्येति वा । 'दिनान्ते निहितं तेजः सवित्रेव हुताशनः ॥' इत्युक्तेः ॥१२९॥

''सहस्राक्षः'' १३० इति । सहस्राणाम् अक्षः-स्तुत्यः । सहस्रप्रमिता अक्षाः-व्यवहारा यस्येति वा ॥१३०॥

''सहस्रांशुः'' १३१ इति । सहस्रमंशवो यस्य स तथा । सहस्रधा जगत् तेन तेन रूपेण अंशयति-विभजतीति वा ॥''१३१॥

''सहस्रधामा'' १३२ इति । सहस्रं-सहस्रप्रकारं धाम-बलं तेजो वा यस्य स तथा । सहस्रधा मिमीते विश्वमिति वा क्विप्प्रत्ययान्तः । सहस्रं धामानि-प्रभावा यस्येति वा । 'गृह-देह-त्विट्-प्रभावा धामानि ॥' इत्यमरः ॥१३२॥

''सहस्रदीधितिः'' १३३ इति । सहस्रं दीधीते-दीप्यतीति सः । सहस्रं दीधितयः-क्रीडनानि यस्येति वा । 'दीधीङ् दीप्ति-देवतयोः' इत्यस्य क्तिप्रत्ययान्तस्य रूपम् ॥१३३॥

''सहस्रपात्'' १३४ इति । सहस्रं पिबतीति-पृथिव्यादि, क्रमेण लीलं करोतीति सहस्रपाः,प्रकृतिः । ताम् अत्तीति सहस्रपात्; प्रलये स्वयमेवावशिष्टः । सहस्रं पान्तीति सहस्रपाः, दैत्याः । तान् अत्तीति वा ॥१३४॥

''सहस्रचक्षुः'' १३५ इति । सहस्रं चष्टे सहस्रचक्षुः । सहस्रशब्देनाऽत्र बहुत्वोक्तेः सर्वद्रष्टेत्यर्थः । सहस्रैः-अपरिमितैः चक्ष्यते-ख्यायते प्रतिपाद्यत इति सहस्रचक्षुः ॥१३५॥

''सहस्रोस्रः'' १३६ इति । सहस्रमुस्राः-धर्मा यस्मात् स तथा । सहः-बलं रातीति तेन राजन्ते वा सहस्रा इन्द्रादिदेवाः । ते वसन्त्यस्मिन्निति वा सर्वदेवात्मकत्वात् ॥१३६॥

''सहस्रकरः'' १३७ इति । सहस्रेषु अर्थाद् दैत्येषु करः-दण्डो यस्य स

तथा, दैत्यविनाशकत्वात्। सहस्रं कराः-बलयो यस्मै इति वा। 'बलि-हस्तांऽशवः कराः ॥' इत्यमरः ॥१३७॥

"सहस्रकिरणः" १३८ इति । सहस्रं-सहस्रगुणम् अर्थात्तमः किरति-विक्षिपतीति सः । सहस्रं किरतीति वा, सहस्रमित्युपलक्षणं कोटाकोटिप्रदानक्षमः ॥१३८॥

"सहस्ररश्मिः" १३९ इति। सहस्रं रश्मयः-अविद्यारूपबन्धनानि यस्मात् सः ॥१३९॥

"सदायोगी" १४० इति । सदा-सर्वदा योगः-यमाद्यष्टभिरङ्गैः प्रसिद्धः । सोऽस्यास्तीति सदायोगी। दानं-दाः, तेन सहिताः सदाः। युनक्ति धर्मेष्विति योगी, पश्चात् कर्मधारय इति वा ॥१४०॥

"सदागतिः" १४१ इति । सदा-सर्वकालं गतिः-गमनं ज्ञानं वा यस्य स तथा। सदा-कालत्रये गतिः-स्वर्गप्राप्तिलक्षणा यस्मादिति वा। सतां-देवानां मनुष्यक्षेत्रे आगतिः-गमनं यस्मादिति वा, सर्वेषां तदुत्पाद्यत्वात्। सद्भिः प्राप्य इति वा ॥१४१॥

"सुधर्मा" १४२ इति । दधाति-स्थापयति सुगताविति धर्मः । यदुक्तं हेमसूरिभिः— 'दुर्गतिप्रपतत्प्राणिधारणाद् धर्म उच्यते ॥' इति। सुष्ठु-शोभनो धर्मो यस्य स तथा; 'धर्मादन्' इत्यन् ॥१४२॥

"सिद्धः" १४३ इति । सिध्यति स्मेति सिद्धः, परमपदप्रतिष्ठितत्वाद् निष्पन्नकार्यत्वाद् वा ॥१४३॥

"सिद्धकार्यः" १४४ इति। सिद्धानि-मङ्गलानि कार्याणि यस्मात् स तथा। 'षिधू शास्त्रे माङ्गल्ये च' इत्युक्तेः। सिद्धानि-परिपूर्णीभूतानि कार्याणि यस्येति वा, अप्रतिहतेच्छत्वात्। सिद्धान्-कर्मनिर्मुक्तान् कुर्वन्तीति सिद्धकाः, एवंविधा आर्या यस्मादिति वा ॥१४४।

"सभाजितः" १४५ इति । पूजितः सर्वध्येयत्वात्, 'सभाजत्कसेवने प्रीतिदर्शने' इत्युक्तेः । त्रिजगज्जनैः सेवित इति वा ॥१४५॥

"सुप्रभः" १४६ इति । सुष्ठु प्रभा-कान्तिर्यस्येति सः । सुष्ठु प्रभवतीति दैत्यानिति वा ॥१४६॥

"सुप्रदीपकः" १४७ इति । सुतरां प्रदीपकः सुप्रदीपकः, सर्वप्रकाशकारित्वात् ॥१४७॥

"सुप्रभावनः" १४८ इति । सुष्ठु प्रभा येषां ते सुप्रभाः, देवाः । तेषाम् अवनं-रक्षणं यस्मात् सः ॥१४८॥

"सुप्रभाकारः" १४९ इति । सुप्रभा आकारा यस्मात् स तथा । सुष्ठु अनिर्वचनीयस्वरूपा प्रभा क्रियतेऽनेनेति वा ॥१४९॥

"सुप्रियः" १५० इति । सुष्ठु प्रियः सुप्रियः, सर्वेषां वल्लभः ॥१५०॥

"सुपर्णः" १५१ इति । सुष्ठु-शोभनौ पर्णौ-श्वेतकृष्णपक्षौ यस्य स तथा । शोभनानि पर्णानि-छन्दांसि यस्येति वा सर्ववेदात्मकत्वात् ॥१५१॥

"सप्तार्चिः" १५२ इति । सप्तसङ्ख्याः अर्चिषः-कान्तयो यस्य स तथा, सवितुर्वह्निनिहिततेजस्कत्वात् । सप्तसु लोकेषु अर्चिषो यस्येति वा ॥१५२॥

"सप्ताश्वः" १५३ इति । सप्तसङ्ख्या अश्वा लोकरूढ्या रथ्या यस्य स तथा ॥१५३॥

"सप्तजिह्वः" १५४ इति । सप्त जिह्वाः-स्वररूपा यस्य स तथा, वेदनिरूपकत्वात् ॥१५४॥

"सप्तलोकनमस्कृतः" १५५ इति । सप्त च ते लोकाश्चेति कर्मधारयः, अत्राऽऽधारा-ऽऽधेययोरभेदोपचारात् तद्वासिनो जनाः, तैर्नमस्कृतः । सप्तानां ग्रहाणां मध्ये लोकनमस्कृत इति वा ॥१५५॥

"सप्तमीप्रियः" १५६ इति । सप्तमी तिथिः । तस्या अधिष्ठातृत्वेन प्रियः-

इष्टः । 'सर्वासु सप्तमीषु तिथिपतित्वेन रविः पूज्यः' इति निर्णयामृतोक्तेः । 'अग्निर्विरञ्चिर्गिरिजा गणेशः' इत्यादिना सप्तम्याः पती रविरिति प्रतिपादनाच्च । षड्भिरङ्गैः सप्तमेन वेदेन च मीयत इति सप्तमी, पश्चात् कर्मधारय इति वा । आत्मत्वाद् वेदैकगम्यत्वाच्च प्रियत्वं स्पष्टम् ॥१५६॥

''सप्तिमान्'' १५७ इति । सप्तयः-अश्वा विद्यन्ते यस्य स तथा । 'वाजि-वाहा-ऽर्व-गन्धर्व-हय-सैन्धव-सप्तयः ॥' इत्यमरः । सप्तीनाम्-अश्वानां रेवन्तप्रमुखाणां मां-लक्ष्मीम्, आनयति-प्राणयतीति वा, तेषां सूर्यजन्यत्वात् ॥१५७॥

''सप्तसप्तिः'' १५८ इति । सप्तसङ्ख्याः सप्तयः-अश्वा यस्य स तथा, सङ्ख्याप्रधानत्वाद् पूर्वस्माद् भेदः ॥१५८॥

''सप्ततुरगः''१५९ इति । सप्तानां लोकानां तुरगः-हृयदम्, सर्वान्तःकरणाधिष्ठातृत्वात् । 'तुरगश्चित्त-वाजिनोः ॥' इति मेदिनिः ॥१५९॥

''स्वम्'' १६० इति । अस्यते-क्षिप्यते इति स्वम्, तदुपलब्धावसाधारणकारणीभूतत्वात् । पुल्लिङ्गत्वे तु सर्वेषामात्मा स्वान्यात्मात्मीयज्ञातिमित्राणीत्यभियुक्तप्रसिद्धेः ॥१६०॥

''स्वाहाकारः'' १६१ इति । स्वाहा-मन्त्रविशेषः, तदेवाकारो यस्य स तथा, मन्त्रात्मकत्वात् स्वाहाकारप्रवर्तकत्वाद् वा; तदुदये तत्प्रवृत्तेः ॥१६१॥

''सुवाहनः'' १६२ इति । सुष्ठु वाहनं यस्य स तथा । सुष्ठु वाहयति-प्रापयतीति वा ॥१६२॥

''स्वाहाभुक्'' १६३ इति । यजमानैः स्वाहाशब्देन यद् वह्नौ क्षिप्तं तद् भुङ्क्ते इति स तथा, सर्वान्तर्गतत्वात् ॥१६३॥

''स्वाचारः'' १६४ इति । सुष्ठु आचारो-जगत्पावित्र्यलक्षणो यस्य स तथा, तत्प्रणेतृत्वात् ॥१६४॥

"सुसंयुक्तः" १६५ इति। सुष्ठु-अपृथग्भावेन परब्रह्मणि युक्तः-मिलितः, सर्वैः पदार्थैः सह सम्बद्ध इति वा; विभुत्वेन सकलमूर्तसंयोगित्वात् ॥१६५॥

"सुस्थितः" १६६ इति। सुष्ठु-पतनाभावेन स्थितः, अनन्तशक्तिमत्त्वात् ॥१६६॥

"स्वजनः" १६७ इति। कुटुम्बसदृशः सर्वेषां त्रायकत्वात्। स्वं-धनं जनयतीति वा, अर्थप्रदातृत्वात् ॥१६७॥

"सुवेशः" १६८ इति। सुष्ठु-अप्रतिहतगतित्वेन वेशः-प्रवेशो यस्य स तथा। सुष्ठु-शोभनं वाऽतिगच्छतीति। सुवा(?वः)-प्राणः, तस्येश इति वा ॥१६८॥

"सूक्ष्मः" १६९ इति। श्लक्ष्णत्वाद् दुर्ज्ञेयत्वाद् वा सूक्ष्मः ॥१६९॥

"सूक्ष्मधीः" १७० इति। सूक्ष्मा-अतीन्द्रियार्थग्राहिणी धीर्यस्य स तथा ॥१७०॥

"सोमः" १७१ इति। आह्लादकत्वाद् यज्ञसाधनत्वाद् वा सोमः ॥१७१॥

"सूर्यः" १७२ इति। सरति सूते वा लोकानिति सः ॥१७२॥

"सुवर्चा" १७३ इति। सुष्ठु-शोभनं वर्चस्-तेजो यस्मादिति सः। 'वर्चो दीप्तौ पुरीषे च, वर्चो रूपेऽपि च क्वचिद् ॥' इति विश्वः ॥१७३॥

"सुवर्णः" १७४ इति। सुष्ठु-शोभनो वर्णः-गौरत्वलक्षणो यस्य यस्माद् वा स तथा। सुष्ठु वर्णः-जातिलक्षणो यस्मादिति वा। सुष्ठु वर्ण्यते-स्तूयते इति वा ॥१७४॥

"स्वर्णः" १७५ इति। सुवर्णोऽस्येति, पृषोदरादित्वाद् उकारलोपे स्वर्णं पुं-क्लीबलिङ्गः। तन्मयत्वात्। 'अहं धातुषु काञ्चनम् ॥' इति भागवतोक्तेः ॥१७५॥

"स्वर्णरेताः" १७६ इति। स्वर्णं-हिरण्यं रेतः-वीर्यं यस्य स तथा, स्वनिहततेजस्कत्वाद् दाहकत्वाद् वा ॥१७६॥

''सुविशिष्टः'' १७७ इति। सुतरां सर्वेभ्यो विशिष्टः-उत्कृष्टः ॥१७७॥

''सविता'' १७८ इति । सूते समीहितार्थं प्रकाशं वा, प्रतिदिनं प्रकाशकारित्वात् ॥१७८॥

''सैंहिकेयरिपुः'' १७९ इति । सिंहिकाया अपत्यं सैंहिकेयः, राहुः । लोकरूढ्या तस्य रिपुः । 'वस्तुतः सोममण्डलछायैव ग्रहणम्' इति ज्योतिर्विदः; विष्णुरूपेण तन्नाशकत्वात् ॥१७९॥

''स्वयंविभुः'' १८० इति। स्वयम्-आत्मना विभुः-स्वामी, न परप्रदत्तैश्वर्यः । अन्येषां तद्दत्तैश्वर्येण विभुत्वात् ॥१८०॥

''सुखदः'' १८१ इति। सुखं-प्रसिद्धं ददातीति सः। सुष्ठु खानि-इन्द्रियाणि ददातीति वा ॥१८१॥

''सुखप्रदः'' १८२ इति। सुष्ठु खानि-ज्ञानरूपाणीन्द्रियाणि यस्य स सुखः । प्रकर्षेण ददातीति प्रदः, पश्चात् कर्मधारयः। सुष्ठु खनन्तीति सुखाः, मुनयः । तान् प्रकर्षेण ददातीति वा।

'खमिन्द्रिये सुखे स्वर्गे शून्ये बिन्दौ विहायसि।
नृपे संवेदने क्षेत्रे कृष्यां हलफले क्वचिद् ॥' इति विश्वः ॥१८२॥

''सुखी'' १८३ इति। सुखं विद्यते यस्मिन् स तथा। सर्वसाधारणत्वेऽपि सर्वदा चिदानन्दस्वरूपत्वादन्येभ्यो भेदः ॥१८३॥

''सुखसेव्यः'' १८४ इति। सुखेन सेव्यत इति सुखसेव्यः, नमस्कृतिमात्रेणैव तत्सपर्यापर्याप्तेः ॥१८४॥

''सुकेतनः'' १८५ इति । सुष्ठु केतनः सुकेतनः, ध्वजः; तद्वत्प्रतीयमानत्वात्। शोभनानि केतनानि-कृत्यानि स्मृतिप्रभृतीनि यस्येति वा । शोभनानि कृत्यानि सृष्ट्यादीनि यस्येति वा। 'गृहे केतौ च कृत्ये च केतनं समुदीरितम् ॥' इति मेदिनिः ॥१८५॥

"स्कन्दः" १८६ इति । स्कन्दति-विनाशयति अरीन्निति स्कन्दः, दैत्यविनाशकत्वेन प्रतीतत्वात् । स्कन्दति-अमृतरूपेण श्रवतीति वा । 'स्कदिन्आप्लाव-उद्धतौ' इति रूपम् ॥१८६॥

"सुलोचनः" १८७ इति । सुष्ठु शोभने-देवत्वेन निमेषवर्जिते लोचने यस्य स तथा । अशरीरत्वे तु सुष्ठु-ज्ञानरूपं लोचनं यस्येति वा ॥१८७॥

"समाहितमतिः" १८८ इति । सम्यक्प्रकारेण आहिता-स्थापिता मतिर्येन स तथा । समा-शत्रुमित्रोदासीना, समन्ताद्भावेन सर्वजन्तुषु हिता मतिर्यस्येति वा ॥१८८॥

"समायुक्तः" १८९ इति । आयुज्यत इति आयुक्तः, व्यापृतः । स्व-स्वकर्तव्यतायां सम्यक्तया प्रवृत्तः । सह मया-लक्ष्म्या वर्तत इति समः, कृष्णः । तेन आ-समन्ताद् युक्त इति वा एकमूर्तित्वात् ॥१८९॥

"समाकृतिः" १९० इति । आकरणम् आकृतिः, संस्थानविशेषः । शोभना यस्य स तथा । समाः-सज्जनाः, तेषु आकृतिः-प्रयत्नो यस्येति वा । समा-सरुचिरा कृतिः-करणं यस्माद् वा, विष्णुरूपेण तदुत्पादकत्वात् ॥१९०॥

"सुमहाबलः" १९१ इति । सुष्ठु रोगादिनाऽप्रतिहतं महाबलं यस्य स तथा । सुष्ठु बलं-रूपं यस्येति वा । 'बलं गन्ध-रसे रूपे ॥' इति मेदिनिः ॥१९१॥

"समुद्रः" १९२ इति । मुद्रया-आकृतिविशेषेण वर्तते यः स तथा । यदि वा समुद्रवदपारत्वात् समुद्रः । समुदः-हर्षयुक्तान् राति-स्वीयत्वेन गृह्णातीति वा ॥१९२॥

"सुमूर्तिः" १९३ इति । सुष्ठु-शोभना मूर्तिः-अनुभावो यस्य स तथा । 'अनुभावे स्त्रियां मूर्तिः ॥' इति मेदिनिः । सुष्ठु-शोभना वृत्ताकारेण दृश्यमाना मूर्तिर्यस्येति वा ॥१९३॥

"सुमेधाः" १९४ इति । सुष्ठु-विशेषग्राहिणी मेधा-बुद्धिर्यस्य स तथा ॥१९४॥

"सुमनाः" १९५ इति । सुष्ठु-कल्पनारहितं मनो यस्य स तथा । 'क्लीबे मनो ज्ञान-हृदोः ॥' इति धरणिः ॥१९५॥

"सुमनोहरः" १९६ इति । सुष्ठु मनोहरः सुमनोहरः, सर्वेषां स्पृहणीय इत्यर्थः । सुमनसः-पुष्पाणि उपढौकनानि यस्येति वा । 'हरः पुंसि महादेव न द्वयोरुपढौकने ॥' इत्यनेकार्थः ॥१९६॥

"सुमङ्गलः" १९७ इति । सुष्ठु-सर्वदाऽवस्थायि मङ्गलं यस्य स तथा ॥१९७॥

"सुमतिः" १९७+१ इति । सुष्ठु—स्व-परप्रकाशकारिणी मतिर्यस्य यस्माद् वा स तथा ॥ १९७+१ ॥

"सुमितः" १९८ इति । सुष्ठु-यथार्थत्वेन मितः-ज्ञातः सुमितः । अव्यभिचारिप्रमाणैर्मितोऽवधारितो वा ॥१९८॥

"सुमितिञ्जयः" १९९ इति । सुष्ठु मितिः-मानम्, तं जयतीति स तथा, परिमाणातीत इत्यर्थः । 'समितिञ्जयः' इति पाठे समितिं-सङ्ग्रामं जयतीत्यर्थः । 'समित्याजिसमिप्युधः ॥' इत्यमरः ॥१९९॥

"सनातनः" २०० इति । सदा भवतीति सनातनः, विरञ्च्यादीनामप्यादिभूतत्वात् ॥२००॥

॥ इति पादसाहश्रीअकब्बरजल्लालदीनसूर्यसहस्रनामाध्यापकश्रीशत्रुञ्जय तीर्थकरमोचनाद्यनेकसुकृतविधापकमहोपाध्यायश्रीभानुचन्द्रगणिविरचितायां तच्छिष्याष्टोत्तरशतावधानसाधनप्रमुदितपादसाहश्रीअकब्बरप्रदत्त'खुस्फहमा'-पराभिधानमहोपाध्यायश्रीसिद्धिचन्द्रगणिशोधितायां शेखश्रीअबुलफ़जल-कारितायां चतुश्चत्वारिंशदधिकश्रीसूर्यसहस्रनामटीकायां द्वितीयशतविवरणं समाप्तम् ॥

"संसारार्णवतारकः" २०१ इति । संसार एवार्णवः-समुद्रस्तस्मात् तारयतीति सः ॥२०१॥

''संसारगतिविच्छेत्ता'' २०२ इति। संसारे गतिः-गमनम्, तां विच्छिनत्तीति सः ॥२०२॥

''संसारतारकः'' २०३ इति । संसारं-चतुर्गतिलक्षणं तारयतीति संसारतारकः। सम्यक्प्रकारेण सारं वस्तु ऋच्छति-प्राप्नोतीति वा। 'ऋ गतौ' वुण्प्रत्यये रूपम् ॥२०३॥

''संहर्ता'' २०४ इति। संहरति प्रलयकालावस्थायां सर्वमिति संहर्ता ॥२०४॥

''सम्पूरः'' २०५ इति। 'पृ पालन-पूरणयोः' इति। सम्यक्प्रकारेण पूरयति, समीहितार्थं पालयतीति वा सः ॥२०५॥

''सम्पन्नः'' २०६ इति । सम्पद्यत इति सम्पन्नः ऐश्वर्यादिगुणैर्युक्तत्वात् । सम्पदं नयति-प्रापयतीति वा ॥२०६॥

''सम्प्रकाशकः'' २०७ इति । सम्प्रकाश्यते लोकोऽनेनेति सः, ज्ञानरूपतयाऽखिलवस्तुप्रकाशकत्वात् ॥२०७॥

''सम्प्रतापनः'' २०८ इति । सम्प्रतापयतीति सः, शीतलस्योष्णतां जनयतीत्यर्थः ॥२०८॥

''सञ्चारी'' २०९ इति । सञ्चरणं-सञ्चारः, शरीरव्यापारविशेषः । सोऽस्यास्तीति सञ्चारी ॥२०९॥

''सञ्जीवनः'' २१० इति । सम्यक्प्रकारेण जीव्यते लोकोऽनेनेति सञ्जीवनः । सं-सम्यग् जीवनं-पानीयं यस्मादिति वा । 'आदित्याज्जायते वृष्टिः ॥' इति पुराणोक्तेः ॥ 'पयः कीलालममृतं जीवनं भुवनं वनम् ॥' इत्यमरः ॥२१०॥

''संयमः'' २११ इति । सं-सम्यक् यमः-नित्यकर्मनियमो येनेति सः, नित्यकर्मप्रवृत्तेस्तदधीनत्वात् । 'शरीरसाधनापेक्षं नित्यं यत् कर्म तद् यमः' इत्यमरः ॥२११॥

''संविभागी'' २१२ इति । संविभजनं-संविभागः, सोऽस्यास्तीति सः; सर्वेषामदृष्टानुसारिफलजनक इत्यर्थः । पृथक् तत्तत्स्वरूपेण विवेचनं-संविभागः, तद्वानिति वा ॥२१२॥

''संप्रवर्तकः'' २१३ इति । समीचीनतया प्रवर्तयति जनान् इति संप्रवर्तकः, सन्मार्गप्रवर्तकत्वात् ॥२१३॥

''संवत्सरः'' २१४ इति । सं-सम्यक्प्रकारेण वसन्ति ऋतवोऽत्रेति संवत्सरः, तज्जनकत्वात् ॥२१४॥

''संवत्सरकरः'' २१५ इति । मेषादिराशिगत्या संवत्सरं करोति-प्रवर्तयतीति सः ॥२१५॥

''सुनयः'' २१६ इति । सुष्ठु नयति-परमपदं प्रापयति जनानिति सः । सुष्ठु-शोभनाः नयाः-शास्त्राणि ज्योतिषादीनि यस्माद् वा ॥२१६॥

''सुनेत्रः'' २१७ इति । सुष्ठु-अप्रतिहततेजांसि नेत्राणि यस्मात् स तथा । सुष्ठु-वियद्गामी नेत्रः-रथो यस्येति वा । 'नेत्रमर्थे गुणे वस्त्रभेदे मूले द्रुमस्य च । रथे चक्षुषि नद्यां च ॥' इति मेदिनिकारः ॥२१७॥

''सङ्कल्पयोनिः'' २१८ इति । सङ्कल्पेन-इच्छामात्रेण योनिः-उत्पत्तिर्यस्मात् सः । सङ्कल्पः-समीचीनो व्यवहारः, तस्य योनिः-उत्पत्तिस्थानं वा ॥२१८॥

''सन्तापनः'' २१९ इति । सम्यक् तापयति नरकभोगादिना पापिन इति स तथा ॥२१९॥

''सन्तापकृत्'' २२० इति । सन्तापं कृन्ततीति स तथा ॥२२०॥

''सन्तपनः'' २२१ इति । सन्तपतीति सन्तपनः केवलज्योतिःस्वरूपत्वात् । सन्तपति शत्रूनिति वा ॥२२१॥

''सुराध्यक्षः'' २२२ इति । सुराणामध्यक्षः-अधिकारी, तन्निग्रहाऽनुग्रहकारित्वात् । सुराणामाधिः-मानसी व्यथा, तस्यामक्षः-चक्रं वा

तदुच्छेदकत्वात्। 'चक्रे कर्षे पुमानक्षः' इति धरण्युक्तेः ॥२२२॥

"सुरावृतः" २२३ इति। सुरैरावृतः सुरावृतः। 'रथस्थैः सुरैः स्तावकैः परिवृतस्तिष्ठति ॥' इति पुराणप्रसिद्धेः ॥२२३॥

"सुरारिहा" २२४ इति। सुराणामरयः-दैत्यास्तान् हन्तीति सः ॥२२४॥

"सुरारिः" २२५ इति। सुरा-अविद्या मादकत्वात्; तस्या अरिः-नाशकः। सुराः-प्रतिकूलवर्तिनो देवाः, तेषामरिः तदुच्छेदकत्वाद् वा ॥२२५॥

"सर्वंसहः" २२६ इति। सर्वं सहतीति सर्वंसहः, क्रोधाध्यवसायरहितः ॥२२६॥

"स्वर्भाणुः" २२७ इति। स्वः-स्वर्गे भातीति स्वर्भानुः ॥२२७॥

"सर्वदः" २२८ इति। सर्वं यथाभिलषितमर्थं ददातीति सः। सर्वान् अनर्थान्-पापान् द्यति-खण्डयतीति वा ॥२२८॥

"सर्वदर्शी" २२९ इति। सर्वं पुरो भवद्-भावि-भूतं वस्तु द्रष्टुं शीलमस्य सः ॥२२९॥

"सर्वप्रियः" २३० इति। सर्वतोऽपि प्रियः सर्वप्रियः, आत्मत्वात् स्व-परभेदाभावात्। सर्वे प्रिया यस्येति वा ॥२३०॥

"सर्ववेदप्रगीतात्मा" २३१ इति। सर्वेषु वेदेषु प्रकृष्टतया गीतः-स्तुतिविषयीकृतः आत्मा-स्वरूपं यस्य स तथा ॥२३१॥

"सर्ववेदालयः" २३२ इति। सर्ववेदानामालयो यस्मिन्निति सः। केषाञ्चिन्मते कल्पान्ते तदुच्छेदसम्भवात् ॥२३२॥

"सर्वरत्नमयः" २३३ इति। सर्वाणि च तानि रत्नानि च सर्वरत्नानि, तन्मयः-तद्रूप इत्यर्थः। 'यद् यद् विभूतिमत् सत्त्वं, तद् रत्नमभिधीयते ॥' इत्युक्तत्वात् ॥२३३॥

"सुरपूजितः" २३४ इति। सुरैः पूजितः-पुष्पादिनाऽर्चित इत्यर्थः, सकलसुराणां तत्सपर्याविधायकत्वात्। सुरान् पुनन्तीति सुरपुंवः, विष्णवादयः

। तेषां जितं-जयो यस्माद् वा ॥२३४॥

''सवलोकप्रकाशकः'' २३५ इति । सर्वे च ते लोकाश्च सर्वलोकाः, तान् प्रकाशयतीति स तथा ॥२३५॥

''सुरपतिः'' २३६ इति । सुराणां-देवानां पतिः-नायकः, तद्रक्षकत्वात् । शोभनानां राणाम्-अग्नीनां गार्हपत्यादीनां पतिः यज्ञपुरुषत्वाद् वा । 'रोऽग्नौ तीक्ष्णे ध्वनौ कामे, राः स्वर्णे जलदे धने ॥' इत्येकाक्षरः ॥२३६॥

''सर्वशत्रुनिवारणः'' २३७ इति । सर्वे च ते शत्रवश्च बाह्याभ्यन्तरभेदभिन्नाः, तेषां निवारणः-तदुत्पत्तौ प्रतिबन्धकीभूत इत्यर्थः ॥२३७॥

''सर्वतोमुखः'' २३८ इति । सर्वतो मुखं यस्य स तथा, दर्शनकारिणां नृणां सर्वतः सम्मुखीभूत इत्यर्थः । 'सर्वतोमुख'नामकयज्ञरूपत्वाद् वा ॥२३८॥

''सर्वः'' २३९ इति । चतुर्दशरज्ज्वात्मकलोकव्यापिस्वरूप इत्यर्थः । 'सर्वस्य सर्वदा ज्ञानात् सर्वमेनं प्रचक्षते ॥' इति भगवद्व्यासवचनात् ॥२३९॥

''सर्वात्मा'' २४० इति । सर्वेषु वस्तुषु आत्मा-अधिष्ठानं यस्य स तथा । 'आत्मा-ऽधिष्ठान-मनसोः ॥' इत्यनेकार्थः ॥२४०॥

''सर्वस्वः'' २४१ इति । सर्वं-स्थावरजङ्गमात्मकं जगत् स्वम्-आत्मीयं यस्य स तथा । सर्वेषां स्वं-धनं यस्मादिति वा ॥२४१॥

''सर्वस्वी'' २४२ इति । सर्वं च तत् स्वं च सर्वस्वम् । तद् विद्यते यस्य यस्मिन् वा, सकलद्रव्याधिष्ठातृत्वात् । सर्वविषयिकं स्वः-ज्ञानं यस्येति वा । 'स्वः स्यात् पुंस्यात्मनि ज्ञाने ॥' इति मेदिनिः । 'स्वं ज्ञातावात्म-धनयोरात्मीये च प्रचक्षते ॥' इति विश्वः ॥२४२॥

''सर्वद्योतः'' २४३ इति । सर्वत्र द्योतः-प्रकाशो यस्य स तथा ॥२४३॥

''सर्वद्युतिकरः'' २४४ इति । सर्वेषां द्युतिं करोतीति सः, सर्वेषां शोभाजनक इत्यर्थः ॥२४४॥

''सर्वजितांवरः'' २४५ इति । सर्वान् शत्रून् जयन्तीतिं सर्वजितः, विष्णुप्रभृतयो देवाः । तेषां मध्ये वरः-प्रधानः, सर्वेषां चक्रवर्तिनां वरो यस्माद् वा ॥२४५॥

''सर्वोदधिस्थितिकरः'' २४६ इति । सर्वस्मिन् उदधौ स्थितिं करोतीति सः, विष्णुरूपेण तच्छायित्वात् । सर्वेषामुदधीनां-समुद्राणां पृथ्वीरूपमवलम्ब्य स्थितिं करोतीति वा । 'स एव सर्वस्थित्यर्थं पृथिवीरूपतां गतः ॥' इत्युक्तेः ॥२४६॥

''सर्ववृतः'' २४७ इति । सर्वैरर्थान्माठरादिभिर्वृतः-स्वामित्वेन स्वीकृत इत्यर्थः ॥२४७॥

''सर्वमदनः'' २४८ इति । सर्वान् मदयति-आंनन्दयतीति सः, सर्वाह्लादकत्वात् ॥२४८॥

''सर्वप्रहरणायुधः'' २४९ इति । सर्वे प्रह्रियन्तेऽनेनेति सर्वप्रहरणम् । एवंविधमायुधं यस्य स तथा, प्रलये सर्वसंहारकारित्वात् ॥२४९॥

''सर्वप्रकाशकः'' २५० इति । सर्वान् पदार्थान् प्रकाशयतीति सः । सर्वेषु वस्तुषु प्रकाशो यस्येति वा । सर्वः-समग्रः प्रकाशो यस्येति वा ॥२५०॥

''सर्वगः'' २५१ इति । सर्वत्र गच्छतीति सर्वगः, अप्रतिहतगतित्वात् । सर्वान्-वेदान् गायतीति वा, प्रथमवेदाध्यापकत्वात् । 'स्वयम्भुरेष भगवान् वेदो गीतः पुरा ॥' इत्युक्तत्वात् ॥२५१॥

''सर्वज्ञः'' २५२ इति । सर्वम्-अतीताऽनागतभेदभिन्नं वस्तु जानातीति सर्वज्ञः, सर्ववस्तुव्यवस्थाकारित्वात् । सर्वज्ञाः-पण्डिताः यस्येति वा ॥२५२॥

''सर्वकल्याणभाजनः'' २५३ इति । सर्वेषां कल्याणानां-श्रेयसां भाजनं-पात्रम् ॥२५३॥

''सर्वसाक्षी'' २५४ इति । सर्वेषां साक्षी-कार्योत्पादनावस्थायां निकटवर्ती ।

सर्वे साक्षिणो यस्येति वा ॥२५४॥

"सर्वशस्त्रभृतांवरः" २५५ इति । सर्वेषां शस्त्रभृतां-शस्त्रोपजीविनां वरः-पूज्यः, सूर्यप्रसादेन शस्त्राण्यमोघानि भवन्तीत्यर्थः ॥२५५॥

"सुरेशः" २५६ इति । सुराणां-शोभनदातृणाम्, ईशः-स्वामी ॥२५६॥

"सर्गः" २५७ इति । सृजतीति सर्गः-सृष्टिः, जन्यजनकयोरभेदात् ॥२५७॥

"सर्गादिकरः" २५८ इति । सर्गस्यादिः-ब्रह्मा, तं करोतीति सः । सर्गादयः=सर्ग-स्थिति-प्रलयाः, तान् करोतीति वा ॥२५८॥

"सुरकार्यज्ञः" २५९ इति । सुराणां कार्यः-यज्ञः, तं जानातीति सः । सुराणां कार्यं-कृत्यं करणीयतया जानातीति वा ॥२५९॥

"स्वर्गद्वारः" २६० इति । स्वर्यते-सुखहेतुतया कथ्यते इति स्वर्गः । तस्य द्वारमिव द्वारम्, तत्पुरस्कारेण तदुपलब्धेः । स्वर्गस्य द्वारं-गमनोपायो यस्माद् वा, वर्णाश्रमाचारप्रवर्तकमन्वादेरप्युपदेशकत्वात् ॥२६०॥

"स्वर्गप्रतर्दनः" २६१ इति । पापिनां स्वर्गं-सुखविशेषं प्रतर्दयति-खण्डयतीति सः । 'तर्द हिंसायाम्' इत्यस्य रूपम् ॥२६१॥

"स्रग्वी" २६२ इति । सर्वदा अविनश्वरा स्रग्-माला विद्यते यस्य स तथा ॥२६२॥

"सुरमणिः" २६३ इति । सुराणां मध्ये मणिरिव मणिः, तदधिकतेजस्वितया सर्वोत्कृष्टत्वात् । मणिः-नायक इति वा, तन्निग्रहाऽनुग्रहकारित्वात् ॥२६३॥

"सुरनिभाकृतिः" २६४ इति । सुराणां निभाः-सुरप्रतिमा आकृतयो यस्मात् स तथा ॥२६४॥

"सुरश्रेष्ठः" २६५ इति । सुराणां मध्ये श्रेष्ठः-पूज्यः पुराणपुरुषत्वात् । सुराः श्रेष्ठा यस्मादिति वा दैत्यसंहारकारित्वात् ॥२६५॥

"सृष्टिः" २६६ इति । सर्जनं-सृष्टिः, तदुपादानकारणत्वाद् जन्य-जनकयोरभेदोपचाराद् वा ॥२६६॥

"स्रष्टा" २६७ इति । ब्रह्मणस्तदंशत्वाद् अभेदोपचारः । कार्योत्पत्तौ तांस्तानुपायान् सृजतीति वा ॥२६७॥

"श्रेष्ठात्मा" २६८ इति । श्रेष्ठः प्रेक्षावतामात्मा-स्वरूपं यस्य सः, त्रिजगत्स्पृहणीयरूपत्वात् । श्रेष्ठ आत्मा-यत्नो यस्येति वा, सृष्टिविषयकनित्यप्रयत्नवत्त्वात् । 'आत्मा यत्नो धृतिर्बुद्धिः स्वभावो ब्रह्म वर्ष्म (र्त्म) वा ॥' इत्यमरः ॥२६८॥

"सृष्टिकृत्" २६९ इति । सृष्टिं कृन्ततीति सृष्टिकृत्, प्रतिसर्गे सृष्टिसंहारकारित्वात् । सृष्टिं-जन्मपरम्परां तद्ध्येतॄणां कृन्ततीति वा ॥२६९॥

"सृष्टिकर्ता" २७० इति । सृष्टिः-संसारः, तं करोतीति सः, स्वमायया तत्तत्प्रवृत्तिजनकत्वात् ॥२७०॥

"सुरथः" २७१ इति । सुष्ठु-अविनाशी रथो यस्य स तथा ॥२७१॥

"सितः" २७२ इति । शुभ्रवर्णत्वात्, उदयाऽ-स्तमनयो रक्तत्वमुपाधिजन्यम् ॥२७२॥

"स्थावरात्मकः" २७३ इति । स्थावराः-पृथिव्यादयः पदार्थाः, त एव आत्मानः-स्वरूपभेदा यस्येति सः । 'सर्वत्र स्थितिमद् ब्रह्म स्थावरादि चराचरः ॥' इति पुराणोक्तेः ॥२७३॥

"स्थानम्" २७४ इति । स्थीयत इति स्थानम्, सर्वेषामाधारभूत इत्यर्थः ॥२७४॥

"स्थूलदृग्" २७५ इति । स्थूलः-महान्, दृग्-ज्ञानगम्यः, पश्चात् कर्मधारयः । 'ज्ञानगम्ये स्त्रियां नेत्रे दृगिन्द्रिय-समूहयोः ॥' इति मेदिनिः । विष्णुरूपत्वे तु स्थूला-बाह्यार्थग्राहिणी दृग्-दृष्टिर्यस्येति वा ॥२७५॥

“स्थविरः” २७६ इति । यौवनमतिक्रम्य तिष्ठतीति स्थविरः-वृद्ध इति यावत्, पुराणपुरुषत्वात् ॥२७६॥

“स्थितः” २७७ इति । तिष्ठतीति स्थितः, कालत्रयेऽपि वर्तमान इत्यर्थः ॥२७७॥

“स्थेयः” २७८ इति । स्थातुं योग्यः स्थेयः, सर्वत्रावस्थानयोग्यः अनन्तशक्तिमत्त्वात् । तिष्ठतीति स्था, अविनश्वरा; ईः-लक्ष्मीः; तां यापयति-प्रापयतीति वा । ‘अः कृष्ण आ स्वयम्भूरिः काम ई श्रीरुरीश्वरः ॥’ इत्येकाक्षरः । स्थेयः-सर्वेषां साक्षीभूत इति वा । ‘प्रतिभूर्लग्नकः साक्षी स्थेय आधिस्तु बन्धकः ॥’ इत्युक्तेः ॥२७८॥

“स्थितिमान् २७९ इति । स्थितिः-उदया-ऽस्तमनलक्षणा, सा विद्यते यस्य स तथा ॥२७९॥

“स्थितिहेतुः” २८० इति । स्थितिः-मर्यादा वर्णानां स्वाचारनिष्ठत्वम्, तत्र हेतुः-कारणम् ॥२८०॥

“स्थिरात्मकः” २८१ इति । स्थिर आत्मा-स्वभावो यस्य सः, अविचलमर्याद इत्यर्थः ॥२८१॥

“स्थितिस्थेयः” २८२ इति । देवानाम् अन्तरिक्षावस्थानं स्थितिः, सर्वदा प्रकाशलक्षणा वा । तस्यां स्थेयः-योग्यः, स्थिति-स्थातृ-स्थेयस्वरूपः । अत्र मध्यपदलोपिसमासेन स्थातृपदलोपः ज्ञानज्ञातृज्ञेयवत् ॥२८२॥

“स्थितिप्रियः” २८३ इति । स्थितिः-स्वाचारनिष्ठता, सा प्रिया यस्येति सः । स्थितिः-जगतोऽवस्थानम्, तत् प्रियं यस्येति वा, विष्णुरूपेण प्रतिपालकत्वात् ॥२८३॥

“सुतपः” २८४ इति । सुष्ठु तपो यस्य स सुतपः, अकारान्तोऽयम् । यदाह चाणक्यः—

'सन्तोषस्त्रिषु कर्तव्यः स्वदारे भोजने धने ।
त्रिषु चैव न कर्तव्यो दाने चाऽध्ययने तपे ॥' इत्यकारान्तश्रवणात् ।
'नर-नारायणरूपेण बदरिकश्रमे तपस्तप्तम् ॥' इति पुराणोक्तेः ॥२८४॥

"सत्त्वः" २८५ इति । सत्त्वगुणप्रधानत्वात् सत्त्वः; सर्वप्राणिनां सत्त्वप्रदातृत्वाद् वा ॥२८५॥

"स्तोत्रम्" २८६ इति । स्तोत्रं-गुणसङ्कीर्तनात्मकं तवेति पुराणोक्तेः ॥२८६॥

"सत्यवान्" २८७ इति । सत्यं-नित्यज्ञानम्, तद् विद्यते यस्मिन् स तथा ॥२८७॥

"सत्यः" २८८ इति । सत् साधुत्वात् सत्यः । सत्यमिति पाठे सर्वेषां विनाशित्वेनायमेव नित्यतया प्रतिभासत इत्यर्थः ॥२८८॥

"सत्यसन्धिः" २८९ इति । सत्यः सन्धिः-सङ्घटनं यस्य स तथा, धर्माधर्मघटकत्वात् ॥२८९॥

॥ इत्येकसप्तत्यधिकशतं सादिनाम्नाम् ॥

"हुवः" २९० इति । हुवः-यज्ञस्वरूपः । 'हुवः आज्ञाध्वराह्वाने ॥' इति धरण्युक्तेः ॥२९०॥

"होमः" २९१ इति । हूयत इति होमः, यज्ञादिकार्याणां तदधीनत्वात् ॥२९१॥

"होमान्तकरणः" २९२ इति । होमस्यान्तः-परिसमाप्तिः फलप्राप्तिलक्षणा वा क्रियतेऽनेनेति सः ॥२९२॥

"होता" २९३ इति । जुहोतीति होता, होतॄणां तत्सान्निध्यस्यावश्यकत्वात् ॥२९३॥

"हयगः" २९४ इति । पदैकदेशे पदसमुदायोपचाराद् ह्यैः-अश्वमेधादिभिस्तुष्टिं गच्छतीति सः ॥२९४॥

"हेलिः" २९५ इति । भक्तापराधसहिष्णुः । 'आगः सहिष्णौ सूर्ये च हेलिः

स्याज्ज्योतिषि स्त्रियाम् ॥' इति मेदिनिः । अन्यमहसां व्रीडाजनक इति वा ॥२९५॥

"ह्रिमदः" २९६ इति । ह्रिमं-शैत्यं द्यतीति ह्रिमदः ॥२९६॥

"हंसः" २९७ इति । हन्ति शत्रून् इति हंसः, सर्वशरीरे गच्छतीति वा ॥२९७॥

"हरः" २९८ इति । हरति प्रलयकाले जगदिति हरः ॥२९८॥

"हरिः" २९९ इति । स्मृतिमात्रेण पुंसां पापं हरतीति हरिः ॥२९९॥

"हरिदश्वः" ३०० इति । हरितः-छन्दांसि अश्वा यस्य सः ।

'हयरूपधरैर्भूप ! छन्दोभिः किल सप्तभिः ।
उह्यते भगवान् सूर्यः सर्वलोकप्रदीपनः ॥' इति पुराणोक्तेः ॥

हरिद्-नीलम् अर्थात् तमः अश्नातीति हरिदश, तादृशं वा लोचनं तेजोलक्षणं यस्येति वा । 'वः स्वान्ते वरुणे वाते वकारः स्वं प्रकीर्तितः । गत्यर्थे नयने श्रेष्ठे ॥' इत्युक्तेः ॥३००॥

॥ इति पादसाहश्रीअकब्बरसूर्यसहस्रनामाध्यापक श्रीशत्रुञ्जयतीर्थकरमोचनाद्यनेकसुकृतविधापकमहोपाध्यायश्रीभानुचन्द्रगणिविरचितायां तच्छिष्याष्टोत्तरशतावधानप्रमुदितपादसाहश्रीअकब्बरप्रदत्त'खुस्फहमा'पराभिधानमहोपाध्यायश्रीसिद्धिचन्द्रगणिशोधितायां शेखश्रीअबुलफजलकारितायां चातुश्चत्वारिंशदधिक-श्रीसूर्यसहस्रनामटीकायां तृतीयशतविवरणं समाप्तम् ॥

"हरिप्रियः" ३०१ इति । हरयः-अश्वाः, त एव प्रियाः रथवोढारो यस्य सः । हरयः-अंशवः, अर्थात् शीतार्तानां प्रिया यस्येति वा । हरिः-विष्णुः प्रियो यस्येति वा ।

'यमाऽनिलेन्द्रचन्द्रार्कविष्णुसिंहांशु वाजिषु ।
शुकाऽहिकपिभेकेषु हरि र्ना कपिले त्रिषु ॥' इत्यमरः ॥
'प्रियः पुंसि प्रीतिपात्रे वाहके भर्तृवेशयोः ॥' इति धरणिः ॥३०१॥

"हर्यश्वः" ३०२ इति। हरयः-पिङ्गलाः, अश्वाः यस्य स तथा ॥३०२॥

"हरी" ३०३ इति । हरेः-विष्णोः ई-लक्ष्मीर्यस्मात् सः । पापान् हरतीत्येवंशीलो हरी ॥३०३॥

"हिरण्यगर्भः" ३०४ इति। हिरण्यमयमण्डं यद्वीर्यसम्भूतं तदस्य गर्भे ॥३०४॥

"हिरण्यरेताः" ३०५ इति। हिरण्यरेतः-अग्निः, तत्कारणत्वात् तथा।

'हिरण्यरेतसं वह्निं, विद्वांसः सम्प्रचक्षते।

सोऽस्मात् सञ्जात इत्येनं तन्नाम्नैव बुधाः जगुः ॥' इति पुराणोक्तेः॥

हिरण्यः-दैत्यः, तत्र रेतः-वीर्यं यस्य सः ॥३०५॥

"हरिताश्वः" ३०६ इति। हरिता-हरिद्वर्णा अश्वा यस्य सः। 'हरित्सवर्णा मिहिरस्य वाजिनः ॥' इत्युक्तेः। हरिताः-पक्षिविशेषाः, तान् आ-समन्तात् श्वसयति-जाड्यविध्वंसकत्वेन प्राणान् धारयतीति वा, डप्रत्यये रूपम् ॥३०६॥

"हुतः" ३०७ इति । हूयते इति हुतः । ज्योतिष्टोमादिसम्बन्धिनस्तद्धोमोद्देश्य इत्यर्थः ॥३०७॥

"हुताहुतिः" ३०८ इति। हुता आहुतयो यस्मै इति सः, स्वर्गसाधनत्वात् ॥३०८॥

॥ इत्येकोनविंशतिर्हकारादीनि नामानि ॥

"द्यौः" ३०९ इति । तद्गतिप्रदातृत्वात् । द्यौः-आकाशं वा सर्वदा तत्सम्बन्धत्वात् ॥३०९॥

"दुःस्वप्नाशुभनाशनः" ३१० इति। निद्रादोषदुष्टान्तःकरणजन्यं ज्ञानं स्वप्नः। दुः-दुष्टः स्वप्नः दुःस्वप्नः, तज्जनितं यदशुभं तस्य नाशनः-विनाशकः, सूर्यदर्शनेन तन्नाशात्। दुःस्वप्नं वाऽशुभं च ते नाशयतीति वा ॥३१०॥

"धाता" ३११ इति । दधाति सर्वलोकमिति धाता, सर्वेषां प्राणिनामाधारभूत इत्यर्थः ॥३११॥

"ध्वान्तापहृः" ३१२ इति। ध्वन्यते सर्वरोगहरतयेति ध्वान्तं, तमः। तमपहन्तीति सः ॥३१२॥

"ध्वान्तसूदनः" ३१३ इति। ध्वान्तम्-अज्ञानम्, तत् सूदयति-नाशयतीति सः ॥३१३॥

"ध्वान्तहा" ३१४ इति। ध्वान्तं-पापं हन्तीति स तथा। 'स्याद् ध्वान्तं तिमिरैनसोः ॥' इति विश्वः ॥३१४॥

"ध्वान्तविद्वेषी" ३१५ इति। ध्वान्तैर्विद्विष्यन्ति इति ध्वान्तविद्वेषाः, किरणाः। तेऽस्य सन्तीति तथा ॥३१५॥

"धूमकेतुः" ३१६ इति। अग्निस्वरूपः। तस्मिन् स्वदीप्त्याधायकत्वात्। 'अन्यं द्वीपं व्रजति दहने स्थापयित्वा स्वतेजः ॥' इति पुराणोक्तेः। धूमकेतुरिव धूमकेतुः, सेव्य-सेवकयोः कथञ्चिदभेदात् ॥३१६॥

"धीमान्" ३१७ इति। धीः-बुद्धिः, सा विद्यते यस्य यस्मिन् वा सः। धीश्च मा च ते अनिति-ददातीति वा। अन्धातोर्दानार्थत्वेन प्रतिपादनात् ॥३१७॥

"धीरः" ३१८ इति। तत्तत्कल्पादिकरणेऽप्यविचलितधैर्याद् धीरः। संसारप्रवृत्तिभूतां धियं ईरयतीति वा। धीः-सुवर्णं तदिव धीः-बुद्धिः, तस्या रः-अग्निः, तन्मालिन्यनाशकत्वात्। 'प्रज्ञा-हाटकयोः स्याद् धीः ॥' इति धरणिः ॥३१८॥

"धीरात्मा" ३१९ इति। धीर आत्मा-शरीरं यस्य स तथा। 'समुद्रकोटिगाम्भीर्यो हिमवत्कोटिनिश्चलः ॥' इत्यैतिह्यप्रामाण्यात् ॥३१९॥

"धनम्" ३२० इति। धनति-शब्दायते इति धनं, द्रव्यम्। तस्य तदधीनत्वात्। धनं वा तद्वत् सर्वोपादेयत्वात् ॥३२०॥

"धनाध्यक्षः" ३२१ इति। धने नियुक्तः, धनस्वामीत्यर्थः। धनस्याधिं-पीडाम्, अक्षयतीति वा ॥३२१॥

"धनदः" ३२२ इति। धनं ददातीति सः। वैराग्यवासितान्तःस्वान्तानां धनं द्यति-खण्डयतीति वा, वैराग्योत्पादकत्वे धनाशाविच्छेदकारित्वात्। 'यस्यानुग्रहमिच्छामि तस्य वित्तं हराम्यहम्॥' इति भगवदुक्तेः॥३२२॥

"धन्वन्तरिः" ३२३ इति। बाह्याऽभ्यन्तरभेदभिन्नामयनिर्वर्तकत्वाद् धन्वन्तरिव धन्वन्तरिः। 'आरोग्यं भास्करादिच्छेत्॥' इत्युक्तेः॥३२३॥

"धनञ्जयः" ३२४ इति। धनञ्जयः-शरीरस्थो वायुः, तत्पोषकत्वाद्। 'धनञ्जयोऽर्जुने वह्नि-नागभिद्-देहमारुते॥' इति मेदिनिकारः॥३२४॥

"धन्यः" ३२५ इति। धनं लब्धा धन्यः, कृतकृत्यत्वात्॥३२५॥

"धनुर्धरः" ३२६ इति। धनुः-काण्डं धरतीति सः, तन्मन्त्रोपदेशकत्वात्। 'रामो भूत्वा धारयामास चापम्॥' इत्युक्तेर्वा॥३२६॥

"धनुष्मान्" ३२७ इति। धनुःक्रिया विद्यते यस्मिन् स तथा।

'धनुः पिपीलेना न स्त्री राशिभेदे शरासने।
क्लीबं वितस्तौ हस्ते च दयायां चन्दनेऽपि च॥'

इति मेदिनिः॥३२७॥

"धराधरः" ३२८ इति। धरां-पृथ्वीं धरतीति सः, वृष्टिकारित्वेन परम्परया तद्धारकत्वात्। धरः-उदयाचलः, स एव अधरः-आधारो यस्येति वा। 'विन्द्यादगारमागारमपगामापगामपि।आराममारमं चापि तथाऽधरमाधारवत्॥'

इति द्विरूपकोशः॥३२८॥

"ध्रुवः" ३२९ इति। ध्रुवतीति ध्रुवः, अप्रच्युता-ऽनुत्पन्न-स्थिरैकस्वभावत्वात्॥३२९॥

"धर्मः" ३३० इति। धरति-स्थापयति सुगताविति धर्मः॥३३०॥

"धर्माऽधर्मप्रवर्तकः" ३३१ इति। धर्मश्चाधर्मश्च तौ धर्माधर्मौ, तयोः प्रवर्तकस्तदुदयादेव तत्प्रवृत्तेः। अधर्मप्रवृत्तिं विना दैत्यानां नाशासम्भवात्।

तेष्वधर्ममुत्पाद्य तान्नाशयतीत्यर्थः ॥३३१॥

"धर्माऽधर्मवरप्रदः" ३३२ इति । गुण-गुणिनोरभेदोपचाराद् अत्र धार्मिकाऽ-धार्मिकयोः स्वानुरूपफलजनकः ॥३३२॥

"धर्मदः" ३३३ इति। धर्मं-यागादिजन्यमपूर्वं तद् ददाति-फलेन योजयति स तथा ॥३३३॥

"धर्मध्वजः" ३३४ इति। धर्मः-तमोविनाशित्वलक्षणः, स एव ध्वजः-चिह्नं ज्ञापकं यस्य स तथा। धर्मं-उदयाऽस्तमनलक्षणं ध्वजति-गच्छतीति वा। 'ध्वजश्चिह्ने पताकायां, ध्वजः शौण्डिक-शेफयोः ॥' इति विश्वः ॥३३४॥

"धर्मवृक्षः" ३३५ इति । वृश्च्यते-छिद्यत इति वृक्षः । धर्मेषु-सदनुष्ठानलक्षणेषु वृक्ष इव वृक्षः, तत्तत्कार्यप्रतिबन्धकीभूत-प्रभूतप्रत्यूहातपनिवारकत्वात् ॥३३५॥

"धर्मवृतः" ३३६ इति। धर्मैः-धर्मप्रधानैर्देवैर्वृतः-व्याप्तः ॥३३६॥

"धर्मवत्सलः" ३३७ इति। धर्माः-धार्मिकाः, तेषु वत्सलः। धर्म एव वत्सः धर्मवत्सः, तं लातीति वा ॥३३७॥

"धर्मकेतुः" ३३८ इति। धर्मस्य केतुः-संस्थापकः। 'केतुः संस्थापके चिह्ने ॥' इति मेदिनिः ॥३३८॥

"धर्मकर्ता" ३३९ इति। लोकशिक्षायै स्वयमेव धर्मानुष्ठातेत्यर्थः ॥३३९॥

"धर्मनित्यः" ३४० इति । धर्मो नित्यो यस्मात् स तथा; यन्नित्यतया धर्मोऽपि नित्यो भवतीत्यर्थः ॥३४०॥

"धर्मराजः" ३४१ इति। धर्मेण राजत इति धर्मराजः, जमजनकत्वाद् वा। 'आतमा वै जायते पुत्रः ॥' इति श्रुतेः ॥३४१॥

"धर्मरत्नः" ३४२ इति। धर्मकवच इत्यर्थः। 'रत्नं मणिविशेषे स्यात् क्लीबं वर्मणि चोत्तमे ॥' इति मेदिनिः ॥३४२॥

''धर्मरतः'' ३४३ इति। धर्मे-स्वाचारे, रतः-तत्पर इत्यर्थः। पाठोऽयं सार्वत्रिकः ॥३४३॥

''धरणीधरः'' ३४४ इति। दिग्गज-कुलाचलादिरूपेण धरणीं धारयतीति स तथा ॥३४४॥

''धृतातपत्रप्रतिमः'' ३४५ इति। धृतमातपत्रं यया एवंविधा प्रतिमा-मूर्तिर्यस्य स तथा, राजचिह्नोपेतत्वात्। धृतातपत्रेण पुरुषेण प्रतिमः-सदृशः सर्वदा तज्जनितसौन्दर्यभागित्यर्थः ॥३४५॥

''धृतिकरः'' ३४६ इति। धृतिः-धारणम्, अर्थाज्जगतः तत् करोतीति स तथा ॥३४६॥

''धृतिमान्'' ३४७ इति। धृतिः-धैर्यं सन्तोषो वा, तौ विद्येते यस्य स तथा। 'धृतिर्योगान्तरे धैर्ये धारणा-ऽध्वर-तुष्टिषु ॥' इति विश्वः ॥३४७॥

''दिवा'' ३४८ इति। दिवा इत्यव्ययं दिनवाचि, तत्कर्तृत्वाद् भगवानपि तथा ॥३४८॥

''द्वादशात्मा'' ३४९ इति। द्वादश आत्मानः-रूपाणि यस्य सः। 'द्वादश आदित्याः ॥' इति श्रुतेः ॥३४९॥

''द्वापरः'' ३५० इति। द्वौ अपरौ यस्मादिति द्वापरो युगः, तज्जनकत्वात् तद्व्यपदेशः। अभक्तानां स्वविषयकसन्देहाधायक इति वा। 'अभक्तानां च भक्तानां सन्देहोऽज्ञानमेव च ॥' इति पुराणेषु दर्शनात्। 'सन्देहो द्वापरो चाथ ॥' इत्यमरः ॥३५०॥

''दिवापुष्टः'' ३५१ इति। दिवा-दिवसे पुष्टो दिवापुष्टः, स्फुरत्कान्तिः। भगवतः सर्वदा परिपूर्णत्वेऽपि लोकैर्दिवसे तथा प्रतीयमानत्वात् ॥३५१॥

''दिवापतिः'' ३५२ इति। दिवा-दिवसस्य पतिः-स्वामी, दिनाधीशत्वात् ॥३५२॥

''दिवाकरः'' ३५३ इति। दिवाशब्देन स्वर्गवाचिना दुःखासम्भिन्नं सुखं लक्ष्यते। तस्य आकरः-खनिः तत्प्रदातृत्वात् ॥३५३॥

''दिवाकृत्'' ३५४ इति। दिवा-दिनम्, तत् कृन्ततीति तथा, द्वीपान्तर्गमनेन तदुच्छेदकारित्वात् ॥३५४॥

''दिवसपतिः'' ३५५ इति। दीव्यत इति दिवौ। एवंविधौ असौ हरि-हरौ तयोः पतिः-स्वामी, तयोस्तदधीनत्वात्। दिवसानाम्-अर्थात् तत्पर्वणां पतिः-स्वामी, सङ्क्रान्त्याद्यधीश इत्यर्थः ॥३५५॥

''दिविस्थितः'' ३५६ इति। दिवि-आकाशे स्थितं-स्थानं यस्य स तथा ॥३५६॥

''दिव्यवाहः'' ३५७ इति। दिव्या लोकोत्तरा वाहा यस्य स तथा ॥३५७॥

''दिव्यवपुः'' ३५८ इति। दिव्यं-मनोहरं वपुर्यस्मात् स तथा। दिव्यं-वैक्रियं वपुर्यस्येति वा ॥३५८॥

''दिव्यरूपः'' ३५९ इति। दिव्यम्-अलौकिकं रूपं-ज्योतिर्यस्य स तथा ॥३५९॥

''द्युवृक्षः'' ३६० इति। दिवः-आकाशस्य वृक्षो द्युवृक्षः, स्वर्गीयफलदातृत्वात् ॥३६०॥

''दयालुः'' ३६१ इति। परमकारुणिकः ॥३६१॥

''देहकर्ता'' ३६२ इति। देहः-शरीरम् करोतीति देहकर्ता, सर्वेषां शरीरोत्पत्तौ कारणभूत इत्यर्थः ॥३६२॥

''दीधितिमान्'' ३६३ इति। दीधीते-दीप्यते अस्या इति दीधितिः-कान्तिः, सा विद्यते यस्य स तथा। दीधितयः-किरणाः, तेषां मा-लक्ष्मीः, तामानयति-प्राणयतीति वा ॥३६३॥

''दीपः'' ३६४ इति। दीप्यते लोकत्रये इति दीपः,

अज्ञानान्धकारनाशकत्वात् ॥३६४॥

"दीप्तांशुः" ३६५ इति। दीप्तः-कान्तिमान् अंशुः-विभवो यस्मात् स तथा। 'अंशुर्नाविभवे करे ॥' इति मेदिनिः ॥३६५॥

"दीप्तदीधितिः" ३६६ इति। दीप्ताः-दीधितयो यस्मात् स तथा। 'नक्षत्रेऽग्राविन्दावुदरे कनके मणौ दृशि समूहे यत् खलु तेजस्तदधिकमोजायितमब्जमित्रस्य ॥' इति प्रामाणिकवचनात् ॥३६६॥

"देवः" ३६७ इति। आदिदेवव्याख्यानावसरे व्याख्यातः ॥३६७॥

"देवदेवः" ३६८ इति। देवानाम्-ईश्वरप्रभृतीनां देवः-पूज्यः। देवयन्ति-पीडयन्ति जनान् इति देवाः, असुराः। तेषां देवः-पीडक इति वा ॥३६८॥

"द्योतः" ३६९ इति। द्योत्यते इति द्योतः, प्रकाशः; तत्स्वरूपत्वात्। 'प्रकाशो द्योत आतपः ॥' इत्यमरः ॥३६९॥

"द्योतनः" ३७० इति। द्योतयति विश्वमिति द्योतनः, प्रकाशक इत्यर्थः। द्योतं-प्रकाशं नयति-अन्येषां प्रापयतीति वा। द्यां तनयति-उपतापयति स्वकिरणैरिति वा। 'तनु श्रद्धोपतापयोः ॥' इत्यस्य रूपम् ॥३७०॥

"द्योतितः" ३७१ इति। द्योतः-अनिर्वचनीयस्वरूपप्रकाशः सञ्जातोऽस्य अस्मिन् वा स तथा ॥३७१॥

"द्योतितानलः" ३७२ इति। द्योतितः-प्रकाशितोऽनलो येन स तथा, रात्रौ सूर्यकिरणप्रवेशेन वह्नेर्दीप्त्याधिक्यात् ॥३७२॥

"दिक्पतिः" ३७३ इति। दिशतीति दिक्, तस्याः पतिः-ज्योतिः। शास्त्ररीत्या पूर्वदिक्स्वामीत्यर्थः ॥३७३॥

"दिग्वासाः" ३७४ इति। दिशो वासः-वस्त्रं यस्य स तथा। दिक्षु वासः-वसनं येषां ते दिग्वासाः, लोकपालाः। तेषाम् आ-पितामह इति वा, तज्जनकत्वात्। दिक्षु वान्ति-गच्छन्तीति दिग्वाः, अन्धकाराः। तान्

अस्यति-क्षिपतीति वा ॥३७४॥

"दक्षः" ३७५ इति । दक्षते-आशु गच्छतीति दक्षः । दक्षयति-वर्धयति भक्तानिति वा । दक्षः-चतुरो वा, तत्तत्कर्तव्यतायां कुशल इत्यर्थः ॥३७५॥

"दिनाधीशः" ३७६ इति । दिनस्य अधि-सामस्त्येन ईशः-दिनाधीशः । दिनेषु आधिं इयन्ति-गच्छन्तीति दिनाधयः, दैत्याः । तान् श्यतीति-नाशयतीति सः । दिनोद्भवो य आधिः, तस्य ईः-लक्ष्मीः, तां श्यति-नाशयतीति वा ॥३७६॥

"दिनप्रणीः" ३७७ इति । दिनं प्रकर्षेण नयति-अवसानं प्रापयतीति सः ॥३७७॥

"दिनबन्धुः" ३७८ इति । द्यति तम इति दिनं, तेजः । तस्य बन्धुरिव बन्धुः, तत्पुष्टिकारित्वात् ॥३७८॥

"दिनकृत्" ३७९ इति । दिनं करोतीति दिनकृत्, विशिष्टदिवसकर्तृत्वात् । द्यति तम इति दिनं, तेजः । अथ दिन्येषां कृन्ततीति वा ॥३७९॥

"दिननाथः" ३८० इति । दिने नाथ्यते-याच्यते, अर्थादिसमये स्वसमीहितं जनैरिति सः । दिनस्य नाथ इति वा, तदुपघातकारितमसां विध्वंसकत्वात् । दिने पापान् कृन्ततीति वा ॥३८०॥

"दुराराध्यः" ३८१ इति । दुःखेनाराध्यते इति दुराराध्यः, यम-नियमोपवासादिभिर्महत्कष्टेनाराद्धुं योग्य इत्यर्थः ॥३८१॥

"पापनाशनः" ३८२ इति । पापान् नाशयतीति सः, स्मरणमात्रेणैव तन्नाशकत्वात् ॥३८२॥

"पावनः" ३८३ इति । पावयति-पवित्रयति स्वकिरणैस्त्रिजगदिति तथा । 'नानाविधदोषदुष्टानां वस्तूनां सूर्यकिरणैरेव पावित्र्यम् ॥' इति धर्मशास्त्रोक्तेः ॥३८३॥

"भास्वान्" ३८४ इति। भासत इति भाः क्विबन्तः। सा विद्यते यस्य स तथा, सदोद्भूतानभिभूतभास्वररूपवत्त्वात्। भानां-नक्षत्राणाम्, असून्-दीप्तीः, आ-समन्ताद् अनयति-भक्षयतीति वा। 'प्राण-दीप्त्योरसुः पुंसि ॥' इति मेदिनिः। अत्र 'अन्'धातुर्भक्षणार्थः स्वरादिः ॥३८४॥

"भास्करः" ३८५ इति। करा इव कराः। भास एव करा आदानोत्सर्गसमर्था यस्य स तथा। भाभिः-किरणैः कं-जलं राति-आदत्ते इति वा। 'कं सुखे सलिले शीर्षे ॥" इत्यनेकार्थः। भासा-दीप्त्या केभ्यः-ब्रह्मवायुप्रभृतिभ्यो रः-तीक्ष्णः, सर्वाधिकतेजस्कत्वादिति वा। 'रः स्मृतः पावके तीक्ष्णे, राः पुंसि स्वर्ण-वित्तयोः ॥' इति मेदिनिः ॥३८५॥

"भासन्तः" ३८६ इति। भासां-दीप्तीनाम् अन्तः-निश्चयो यस्मात् स तथा, अन्यासां दीप्तीनामेतदाधीनत्वात्। भान्यसन्तो जायन्ते यस्मादिति वा। भासां-नक्षत्रादिगतदीप्तीनामन्तः-विनाशो यस्मादिति वा। भाभिः-किरणैः, अन्तति-बध्नाति अर्थाद् रात्रिञ्चरानिति वा। 'अति बन्धने' इत्यस्य रूपम्। अत्र सकारस्य विसर्गीकरणमार्षम् ॥३८६॥

"भासतः" ३८७ इति। अतनम्-अतः। भासा-दीप्त्या अतः-गमनं यस्य सः। सर्वदा तत्सम्बद्धत्वात्। भानि-नक्षत्राणि आसते इति भासः, आकाशम्। तस्य ता-लक्ष्मीर्यस्मादिति वा। 'ता सा श्रीः कमलेन्दिरा ॥' इति हैमः ॥३८७॥

"भासितः" ३८८ इति। भासो जाता अस्य अस्मिन् वा सः। भाभिः सितः-उज्जवल इति वा। भानां-ग्रह-नक्षत्राणामसितं-दीप्तिर्जायते यस्मादिति वा। 'अस् दीप्त्यादानयोः' इत्यस्य रूपम्। 'सूर्येण सहैकत्रावस्थानमस्तगमनं, सूर्यमुक्तानां च पुनरुदयो दीप्त्याधिक्यं च ॥' इत्यद्भुतसागरादौ सुप्रसिद्धत्वात् ॥३८८॥

"भावितात्मा" ३८९ इति। भावित आत्मा येन सः,

वैराग्यरसोद्रेकवानित्यर्थः । भावितः-शोधितः आत्मा येनेति वा । 'भूक् शुद्धि-चिन्तयोः' इत्यस्य रूपम् । भया-कान्त्या अवितः-रक्षित आत्मा-संसारी येनेति वा ।

'आत्मा पुंसि प्रभावे च, प्रयत्न-मनसोरपि ।
धृतावपि मनीषायां संसार-ब्रह्मणोरपि ॥'

इति मेदिनिः ॥३८९॥

''भाग्यं'' ३९० इति । भाग्यम्-अदृष्टम्, तदुत्पादकत्वात् । भः-शुक्रः अग्यः-कुटिलगतियोग्यो जायते यस्मादिति वा । बुध-शुक्रयोस्तादृशसान्निध्यस्य वक्रताहेतुत्वात् । 'अग्य वक्रगतौ' इत्यस्य रूपम् । 'भः स्यान्मखेव शुक्रे च, भं नक्षत्रे प्रकीर्तितम् ॥' इति विश्वः । भाः-दीप्तयः, अग्याः-वृक्षहिता यस्येति वा, सूर्यकिरणानां वृक्षवृद्धिहेतुत्वात् ॥३९०॥

''भानुः'' ३९१ इति । भातीति भानुः, भानुस्वरूपत्वाद् वा ॥३९१॥

''भानेमिः'' ३९२ इति । भानां-नक्षत्राणां दीप्तीनां वा नेमिः-अवधिः । 'नेमिः कूलेऽवधौ ॥' इति मेदिनिः । भा नेमौ-वक्रान्ते यस्येति वा ॥३९२॥

''भानुकेसरः'' ३९३ इति । भानव एव केसराणि यस्य स तथा ॥३९३॥

''भानुमान्'' ३९४ इति । भानवः-किरणा विद्यन्ते यस्य यस्मिन् वा स तथा ॥३९४॥

''भानुरूपः'' ३९५ इति । भानुभिः-किरणैः रूपं-सौन्दर्यं यस्य स तथा । भानां-नक्षत्राणां सेव्यतया अनुरूपः-योग्य इति वा । भानूनां रूपं-सौन्दर्यं यस्मादिति वा ॥३९५॥

''बहुदायकः'' ३९६ इति । बहु-समीहिताधिकं ददातीति स तथा । बहुदाः-कर्णादयः, तेषामयः-शोभावहो विधिर्यस्मादिति वा, दातृकल्याणकर्तेत्यर्थः ॥३९६॥

"भूधरः" ३९७ इति । जलाप्लुतां भुवं तच्छोषणेन धरतीति यः स तथा । भूधरः-नगः, तदुत्पादकत्वाद् वा । भुवं-स्थितिमर्यादां धरतीति वा । 'भूरुत्पत्तिस्थितिभूमिषु' इत्युक्तेः ॥३९७॥

"भवद्योतः" ३९८ इति । भवः-संसार ईश्वरो वा, तयोर्द्योतौ-समुद्भवप्रकाशौ यस्मादिति सः । भवं-जन्म तत्तत्कर्मानुसारेण द्योतयति-प्रकाशयतीति वा । 'भवः संसार-सत्ता-निःश्रेयः-शङ्कर-जन्मसु ॥' इति विश्वः ॥

"भूपतिः" ३९८ इति । भूः-जगतामुत्पत्तिस्थानम्, तस्याः पतिः-पालयिता, सृष्टि-स्थितिकर्तेत्यर्थः ॥३९८॥

"भूष्यः" ३९९ इति । भूषयितुं योग्यो भूष्यः, स्वयं भूषितत्वेऽपि तद्भक्तैश्चन्दनादिना तन्मण्डलस्य भूष्यमाणत्वात् ॥३९९॥

"भोगी" ४०० इति । भोगः-सुखानुभवः, सोऽस्यास्तीति भोगी । भोगाः-सर्पशरीराणि रथरज्जुतया विद्यन्ते अस्य अस्मिन्निति वा ॥४००॥

॥ इति पादसाहश्रीअकब्बरसूर्यसहस्रनामाध्यापकश्रीशत्रुञ्जयतीर्थकरमोचनाद्यनेकसुकृतविधापकमहोपाध्यायश्रीभानुचन्द्रगणिविरचितायां तच्छिष्याष्टोत्तरशतावधानसाधनप्रमुदितपादसाहश्रीअकब्बरप्रदत्त 'खुसफहम' अपराभिधानमहोपाध्यायश्रीसिद्धिचन्द्रगणिशोधितायां शेखश्रीअबुलफलजकारितायां चतुश्चत्वारिंशदधिकश्रीसूर्यसहस्रनामटीकायां चतुःशतविवरणं समाप्तम् ॥

"भोक्ता" ४०१ इति । भुनक्तीति भोक्ता । सकलपदार्थोपभोगकारित्वात् । भुङ्क्ते इति भोक्ता सृष्टिविनाशकारी, प्रलये स्वयमेव जगन्नाशकत्वात् । 'सृजत्यवति भुङ्क्ते च सृष्टि-स्थित्यन्तकृद् विभुः ॥' इति पुराणोक्तेः ॥४०१॥

"भुवनपूजितः" ४०२ इति । भुवनैर्लक्षणया तत्रस्थैर्मनुष्यैः पूजितः-चन्दनादिनाऽर्चित इत्यर्थः । भुवनं पुनातीति भुवनपूः, एवंविधं जितं-जयो यस्येति वा ॥४०२॥

"भुवनेश्वरः" ४०३ इति । भुवनानां-चतुर्दशसङ्ख्याकानामीश्वरः-स्वामी, तद्योगक्षेमकारित्वात् ॥४०३॥

"भूष्णुः" ४०४ इति । भवतीत्येवंशीलो भूष्णुः, त्रैकालिक-सत्तायोगीत्यर्थः ॥४०४॥

"भूतात्मा" ४०५ इति । भूतानां-प्राणिनामात्मा, तत्सम्बन्धादेव तेषां चैतन्योपपत्तेः ॥४०५॥

"भूतादिः" ४०६ इति । भूताः-प्राणिनः, तेषामादिः-प्रथमः तदुत्पादकत्वात् । भूताः-देवविशेषाः, तेषामादिरिति वा । भूताः आदयः-अवयवा यस्येति वा ॥४०६॥

"भूतान्तकरणः" ४०७ इति । भूतानां-प्राणिनामन्तः-विनाशः क्रियतेऽनेनेति स तथा, संहारकारित्वात् । भूतानामन्तो यस्मात् स भूतान्तः, यमः । तस्य करणं-प्रकृष्टकारणमित्यर्थः ॥४०७॥

"भूताश्रयः" ४०८ इति । भूतानामाश्रयः-जीवनहेतुरित्यर्थः ॥४०८॥

"भूतिदः" ४०९ इति । भूतिं-सम्पदं ददातीति भूतिदः, सर्वसम्पत्प्रदः । भूतिः-संसारे समुत्पत्तिः, तां द्यतीति वा ॥४०९॥

"भूतभव्यः" ४१० इति । भूतेषु-प्राणिषु भव्यः-प्रशस्यः, तद्रक्षाकारित्वात् । भूतं-जातं भव्यं-मङ्गलं यस्मादिति वा ॥४१०॥

"भूतप्रभुः" ४११ इति । भूतानि प्रभवंते-सर्वकार्येषु प्रगल्भन्ते यस्मादिति सः । भूतेषु प्रभवतीति वा ॥४११॥

"भूतपतिः" ४१२ इति । भूतानां पतिः-स्वामी । भूताः पतयो यस्मादिति वा ॥४१२॥

"भूतविभुः" ४१३ इति । प्राणिमात्रेश्वर इत्यर्थः ॥४१३॥

"भूतेशः" ४१४ इति । भूतानामीष्टे सृष्ट्यादाविति स तथा ॥४१४॥

"भूषणं" ४१५ इति । भूष्यतेऽनेन विश्वमिति भूषणम्, त्रिजगच्छिरोऽवतंसायमानत्वात् ॥४१५॥

"भूषणोद्भासी" ४१६ इति । भूषणैः उत्-प्राबल्येन भासत इत्येवंशीलो यः स तथा, सर्वदा नानाविधालङ्कारोपयुक्त इव प्रतिभासमानत्वात् ॥४१६॥

"भयान्तकरणः" ४१७ इति । भयस्य-भीतेः, अन्तकः-नाशकः, रणः-शब्दो यस्य स तथा ॥४१७॥

"भीमः" ४१८ इति । भीमः-अधृष्योऽनाकलनीय इति यावत् ॥४१८॥

"भीमतः" ४१९ इति । भीमान्-मृत्युप्रभृतीन् तस्यति-क्षिपतीति स तथा । 'तस् उत्क्षेपे' इत्यस्य रूपम् । भीः-भयम्, तत्र मतः-सर्वैः स्मृतिगोचरीकृत इति वा ॥४१९॥

"भगः" ४२० इति । भजन्त्येनमिति भगः । भानि-ग्रहनक्षत्रादीनि गच्छन्ति-अर्थादस्तमस्मादिति वा ॥४२०॥

"भगवान्" ४२१ इति । भगः-ज्ञानवैराग्यैश्वर्यादिः, स विद्यते यस्य स तथा ।

'ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः ।
ज्ञान-वैराग्ययोश्चैव षण्णां भग इति स्मृतः ॥' इत्युक्तेः ।
'उत्पत्तिं प्रलयं चैव, भूतानामागतिं गतिम् ।
वेत्ति विद्यामविद्यां च, स वाच्यो भगवानिति ॥' वा ॥४२१॥

"भक्तवत्सलः" ४२२ इति । भक्ताः-तदुपास्तिकारिणो जनाः, तेषु वत्सलः-महाकारुणिक इत्यर्थः ॥४२२॥

"बहुमङ्गलः" ४२३ इति । बहूनि मङ्गलानि-मङ्गलकृत्यानि जायन्ते यस्मात् स तथा, उत्तरायणगते गभस्तिमालिनि नानाविधमाङ्गलिककर्मप्रवृत्तेः ॥४२३॥

"बहुरूपः" ४२४ इति । बहूनि-अनेकानि रूपाणि-आकृतयो यस्य स तथा, सृष्ट्यादिकार्यभेदाद् भिन्नभिन्नाकृतिधारीत्यर्थः ॥४२४॥

"भृताहारः" ४२५ इति। भृताः-सम्भृताः, अर्थात् प्राणिनामाहारा येन स तथा। भृतः-धृतः, आ-समन्ताद् हारो येनेति वा ॥४२५॥

"भिषग्वरः" ४२६ इति। भिषजां वरः-प्रधानः। 'आरोग्यं भास्करादिच्छेद् ॥' इति श्रुतेः। संसाररूपमहाव्याधिनाशकत्वाद् वा ॥४२६॥

"बुद्धः" ४२७ इति। बुद्ध्यते स्मेति बुद्धः, योगिभिः साक्षात्कृतः इत्यर्थः। धर्मा-ऽधर्मविवकेविचक्षण इति वा ॥४२७॥

"बुद्धिः" ४२८ इति। बोधनं-बुद्धिः, कथञ्चिद् धर्म-धर्मिणोरभेदात् तद्वति तद्व्यपदेशः ॥४२८॥

"बुद्धिवर्धनः" ४२९ इति। बुद्धेर्वर्धनो बुद्धिवर्धनः। तदुपास्तिकारिणां सर्वाधिकबुद्धिमत्त्वात्। बुद्धिं वर्धयति- छिनयत्यधार्मिकाणामिति वा ॥४२९॥

"बुद्धिमान्" ४३० इति। बुद्धिः-ज्ञानं विद्यते यस्य स तथा, अस्त्यर्थे मतुः। बुद्धिश्च मा च ते अनति-गच्छति प्राप्नोतीति वा ॥४३०॥

"बुध्नः" ४३१ इति। सर्वेषामादिभूतत्वात् सर्वात्मकत्वाद् रुद्ररूपो वा। 'बुध्नो ना मूल-रुद्रयोः ॥' इति धरणिः ॥४३१॥

"पद्महस्तः" ४३२ इति। पद्मनिधिर्हस्ते-नियोगे यस्य सः, पद्मप्रभृतिनिधीनां तदायत्तत्वात् ॥४३२॥

"पद्मपाणिः" ४३३ इति। पद्माकारोपलक्षितः पाणिर्यस्य सः, असंख्येयपाणिरिति वा ॥४३३॥

"पद्मबन्धुः" ४३४ इति। पद्मानां बन्धुरिव बन्धुः, तद्विकाशकारित्वात्। पद्मप्रदानां बन्धुर्वा, मध्यपदलोपीसमासः ॥४३४॥

"पद्मयोगी" ४३५ इति। पद्मम्-अम्बुजम्, तेन सह योगः-सम्बन्धो यस्य सः। पद्मः-निधिः, तेन सह योगो यस्मादिति वा। असंख्येया योगा विद्यन्ते यस्येति वा। पद्मेषु-हस्तिविशेषेषु योगः-नियोगोऽस्यास्तीति वा;

जगद्व्यवस्थापकतया तन्नियोगेन तेषां पृथिवी धारकत्वात्। पद्मानां-पन्नगानां रज्जुतया स्थितानां योगः-सङ्गतिरस्यास्तीति वा।

'पद्मोऽस्त्री शमके व्यूह-निधि-संख्यान्तरेऽम्बुजे।
ना नागे-स्त्री-कंजिका श्री-वारटी-पन्नगेषु च॥'

इति मेदिनिकारः॥४३५॥

"पद्मयोनिः" ४३६ इति। पद्मयोनिः-ब्रह्मा, तदुत्पादकत्वात्। पद्मानां योनिः-कारणम्, पर्जन्यकरत्वेन तडागादिपूरकत्वात्॥४३६॥

"पद्मोदरनिभाननः" ४३७ इति। पद्मस्य-कमलस्योदरम्-अर्थात् कोशः, तेन सदृशमाननं-मुखं यस्य स तथा। पद्मोदरेषु निभाः-प्रभाः, तास्वाननम्-अग्रभागो यस्येति वा॥४३७॥

"पद्मेक्षणः" ४३८ इति। पद्मं-कमलम्, तद्वद् ईक्षणे-लोचने यस्य यस्माद् वा स तथा, सुन्दरनयनप्रदातृत्वात्। पद्मायाः-लक्ष्म्या ईक्षणं-दर्शनं यस्मादिति वा। पद्मानाम् ईः-शोभा, तस्याः क्षणः-उत्सवो येनेति वा॥४३८॥

"पद्ममाली" ४३९ इति। पद्मं-कमलं निधिं वा पोषयति धारयतीत्येवंशीलः पद्ममाली। पद्मानां मा-शोभा, तस्या आलयः, तासाम् ईः-शोभा यस्मादिति वा॥४३९॥

"पद्मनाभः" ४४० इति। पद्मं नाभौ यस्य सः, नाभेः पद्माकृतिमत्त्वात् विष्णूत्पादकत्वाद् वा॥४४०॥

"पद्मिनीशः" ४४१ इति। पद्मिनीनां-कमलिनीनाम्, ईशः-स्वामी, तदुदये तासां विकाशसम्भवात्। पद्मो निधिर्विद्यते येषां ते पद्मिनः, देवाः। तान् नयति-सन्मार्गे प्रवर्तयति यः स पद्मिनीः, इन्द्रः। तस्य शं-सुखं यस्मादिति वा॥४४१॥

"पूतात्मा" ४४२ इति। पूतः-पवित्र आत्मा यस्य स तथा, निर्मलान्तःकरणः इत्यर्थः॥४४२॥

"पवित्रात्मा' -'४४३ इति । पवित्रः आत्मा-अन्तःकरणं जायते यस्मादिति सः । पवेः-वज्रात् त्रायते इति पवित्रः । एवंविध आत्मा-स्वरूपं यस्येति वा ॥४४३॥

"पूषा" ४४४ इति । पूषति-वर्धते ऋतुभेदाद् रश्मिभिः स तथा ॥४४४॥

"पीतवासाः" ४४५ इति । पीतानि वासांसि यस्येति स तथा, पीताम्बर इत्यर्थः । पीतः-गणेशः, वः-वरुणः, अः-विष्णुः, सः-यमः, एतान् आसयति-स्वस्वाधिकारे स्थापयति इति आः, तत्तदधिकारस्थापक इति वा । 'आस् उपवेशने' इत्यस्य आः । 'पीतं पीते हरिद्रायां, स्त्रियां पुंसि विनायके ॥' इति मेदिनिः । 'वकारो वरुणो प्रोक्तः ॥' इत्येकाक्षरकोशात् । 'सकारो धर्मराजे स्याद् ॥' इति तत्रैव । अः सुप्रसिद्ध एव ॥४४५॥

"पक्षः" ४४६ इति । पवन्ति भूतानि अत्रेति पक्षः पञ्चदशदिनात्मकः, तत्सम्पादकत्वात् ॥४४६॥

"बलदः" ४४७ इति । बलं-शरीरस्थमोजः, सैन्यं वा ददाति स तथा । दुष्टानां बलं द्यति-खण्डयतीति वा ॥४४७॥

"बलभृद्" ४४८ इति । बलं-त्रैलोक्यरक्षणसामर्थ्यं बिभर्तीति स तथा ॥४४८॥

"बलप्रियः" ४४९ इति । बं-ज्ञानम्, लान्ति-आददते इति बलाः, पण्डिताः । ते प्रिया यस्य स तथा ॥४४९॥

"बलवान्" ४५० इति । बलं-सर्वाधिकरूपं विद्यते यस्य यस्मिन् वा स तथा । 'बलं गन्धे रसे रूपे ॥' इति मेदिनिः ॥४५०॥

"बली" ४५१ इति । बलीनामा दैत्यः, तद्विदारकत्वात् तदभिधेयता । बलं-सैन्यं ग्रहादिरूपं विद्यते यस्य स तथा ॥४५१॥

"बलिनांवरः" ४५२ इति । बलिनां-हरिहरप्रभृतिदेवानां मध्ये वरः-प्रधानः, सर्वोत्कृष्टत्वात् ॥४५२॥

"पिनाकधृग्" ४५३ इति। ईश्वररूपेण पिनाकं-धनुर्धर्षतीति स तथा ॥४५३॥

"बिन्दुः" ४५४ इति। निराकार इत्यर्थः।

'पुंसि वृक्षविशेषे स्याद्, बिन्दुर्दण्डक्षतान्तरे।
भ्रुवोर्मध्ये निराकारे, कृतौ च पृषतौ तथा ॥'

इति मेदिनिः ॥४५४॥

"बन्धुः" ४५५ इति। बध्नाति प्रीतिं जनोऽस्मिन्निति बन्धुः, सर्वेषां हितकारित्वात् ॥४५५॥

"बन्धहा" ४५६ इति। बध्नातीति बन्धः, अर्थात् संसारबन्धं हन्तीति स तथा ॥४५६॥

"पुण्डरीकाक्षः" ४५७ इति। पुण्डरीकं-सिताम्भोजम्, तद्वदक्षिणी यस्य स तथा। पुण्डरीकाणाम् अक्षः-जीवातुरिति वा। 'बिभीतकतरौ चक्रे, जीवातौ पाशके पुमान् ॥' इति मेदिनिः। पुण्डरीकः-सितो वर्णः, तम् अक्ष्णोतीति वा ॥४५७॥

"पुण्यसङ्कीर्तनः" ४५८ इति। पुण्यं-पवित्रं सङ्कीर्तनं यस्य स तथा, स्मृतिमात्रेणैव सर्वपापप्रणाशकारित्वात् ॥४५८॥

"पुण्यहेतुः" ४५९ इति। पुण्यं-सत्कर्मपुद्गलाः, तस्य हेतुः-कारणम्, धर्मप्रतिबन्धकीभूतप्रत्यूहविनाशकारित्वात् ॥४५९॥

"परः" ४६० इति। सर्वोत्कर्षकाष्ठां गतः। प्रपञ्चाद् विभिन्न इति वा ॥४६०॥

"प्राप्तयानः" ४६१ इति। प्राप्तं यानं-एकचक्ररथलक्षणं येन स तथा। प्राप्तं यानं-गमनं यस्मादिति वा, तदुदये तत्प्रवृत्तेः ॥४६१॥

"परावरः" ४६२ इति। परान्-लोकान्, आवृणोति-अनुग्रहबुध्या गृह्णातीति परावरः। पराः-शत्रवः, तेषाम् अवरः-अनुत्तमः, तदुच्छेदकारित्वाद् वा। परान् अवति-रक्षतीति परावः, एवंविधो रः-शब्दो

यस्येति वा । परः-परमात्मा, तदपेक्षया अवरः-जीवः, तत्स्वरूप इति वा, परात्मन एव अविद्यावच्छिन्नस्य जीवत्वात् । 'कर्मबद्धो भवेज्जीवः, कर्ममुक्तो भवेच्छिवः ॥' इत्युक्तेः । अवनम्-अवः, परोऽवः परावः, तं राति-आदत्ते इति वा, सर्वोत्कृष्टपालनवानित्यर्थः ॥४६२॥

"परावरज्ञः" ४६३ इति । परः-उत्कृष्टः, आ-ब्रह्मा, तं वरं जानातीति सः । परः-सज्जनः, तदपेक्षया अवरः-अधमः, तौ जानातीति वा, सदसद्विवेकज्ञातृत्वात् ॥४६३॥

"परायणः" ४६४ इति । जगत्प्रकाशे परायणः-तत्परः । जगतामभीष्टदातृत्वेन परायणः-अभीष्ट इति वा । 'परायणमभीष्टे स्यात् तत्परा-ऽऽश्रययोरपि ॥' इति मेदिनिः । परम्-उत्कृष्टम्, अयनं-गमनं यस्येति वा ॥४६४॥

"प्राज्ञः" ४६५ इति । प्राज्ञः-विद्वान् । प्रगताऽज्ञा यस्मादिति वा । प्रकृष्टा आज्ञा यस्येति वा । प्रकृष्टा आ-समन्ताद् ज्ञा यस्येति वा ॥४६५॥

"पराक्रमः" ४६६ इति । परान्-शत्रून् आक्रमत इति पराक्रमः । पराप्रातिलौम्येनाक्रमति तम इति पराक्रमः, शक्तिरिति वा; धर्म-धर्मिणोरभेदोपचारात् ॥४६६॥

"प्राणधारकः" ४६७ इति । प्राणान् धारयतीति सः । नानाविधव्याधिविनाशकत्वेन प्राणधारक इति वा । प्राणः-सर्वोत्कृष्टबलम्, तद् धारयति भक्तानामिति वा ॥४६७॥

"प्राणवान्" ४६८ इति । प्रकृष्टमणतीति वेदवक्तृत्वात् । प्राणः-ब्रह्मा, स विद्यते यस्य स तथा । अणनम्-अणः । प्रकृष्टोऽणः प्राणः-वेदध्वनिलक्षणः, स विद्यते यस्येति वा, तत्प्रयोक्तृत्वात् ॥४६८॥

"प्रांशुः" ४६९ इति । प्रांशुः-उच्चः, गगनावलम्बित्वात् । प्रकृष्टा अंशवः-

किरणा यस्येति वा ॥४६९॥

"प्रसन्नात्मा" ४७० इति। प्रसन्नः-निर्मलः, आत्मा-स्वरूपं यस्य स तथा, रजस्तमोभ्यां रहितत्वात्। प्रसन्नताम् अतति-गच्छतीति वा, अवाप्तसर्वकामत्वात् ॥४७०॥

"प्रसन्नवदनः" ४७१ इति। प्रसन्नं वदनं यस्य स तथा। प्रसन्नं वदनम्-उक्तिर्यस्मादिति वा ॥४७१॥

"ब्रह्मा" ४७२ इति। जगन्निष्पादकत्वात् बृंहणाद् वा। 'बृंह वृद्धौ' ॥४७२॥

"ब्रह्मचर्यवान्" ४७३ इति। ब्रह्मज्ञानोपलक्षितं चर्यं-चर्या, तदस्यास्तीति सः। ब्रह्मणि-अधिष्ठानभूते चरति-विविधं स्वकार्यमासञ्जयतीति ब्रह्मचरी, अविद्या। ताम् अवानति-नाशयतीति वा। अवपूर्वकस्य अनतेर्हिंसार्थकस्य रूपम् ॥४७३॥

"प्रद्योतः" ४७४ इति। प्रकृष्टः-नानाविधो द्योतः-प्रकाशो यस्य स तथा ॥४७४॥

"प्रद्योतनः" ४७५ इति। प्रकर्षेण द्योत्यते-प्रकाश्यते बाह्याभ्यन्तराणि वस्तूनि येनेति सः। प्रकृष्टां-दिवं स्वतेजसा तनोतीति वा ॥४७५॥

"प्रभावनः" ४७६ इति। प्रभाव्यते-प्राप्यते समीहितमनेनेति स तथा। प्रभावं नयति-प्रापयतीति वा। प्रभावानाम् अवनं-रक्षणं यस्मादिति वा। प्रकृष्टा भावना यस्मादिति वा ॥४७६॥

"प्रभाकरः" ४७७ इति। प्रभाणामाकरः-उत्पत्तिस्थानम्। प्रभया-दीप्त्या कं-जलं रातीति वा। प्रभां करोतीति वा ॥४७७॥

"प्रभञ्जनः" ४७८ इति। प्रकृष्टं भञ्जनं अर्थात् संसारस्य, दैत्यानां वा *यस्मादिति सः। प्रभज्यते तमोऽनेनेति वा। प्रभञ्जनः-वायुः, तद्वदिति वा,* पापद्रुमाणां समूलोन्मूलकत्वात् ॥४७८॥

"परप्राणः" -४७९ इति । पराः-उत्कृष्टाः प्राणा यस्य स तथा, त्रिजगद्व्यापकत्वात् । परेषां प्राण इव प्राणः सर्वप्रियत्वात् ॥४७९॥

"परपुरञ्जयः" ४८० इति । परेषां-शत्रूणां पुरं-नगरं जयतीति स तथा ॥४८०॥

"प्रजाद्वारः" ४८१ इति । प्रजायाः-सन्ततेर्द्वारं-मूलोपायः ॥४८१॥

"प्रजापतिः" ४८२ इति । प्रकर्षेण जायन्ते इति प्रजाः, चतुर्विधानि भूतानि । तेषां पतिः-स्वामी, तत्कर्तृत्वात् ॥४८२॥

"प्रजनः" ४८३ इति । जननं-जनः, प्रकृष्टो जनो यस्मादिति सः, प्रकृष्टजन्मसम्पादकत्वात् ॥४८३॥

"पर्जन्यः" ४८४ इति । पर्जन्यः-मेघः, तद्धेतुत्वात्; आध्यात्मिकादितापत्रयोपशामकत्वाद् वा ॥४८४॥

"प्रियः" ४८५ इति । सर्वेषां प्रेमास्पदीभूत इत्यर्थः ॥४८५॥

"प्रियदर्शनः" ४८६ इति । प्रियं दर्शनं-शास्त्रं यस्य स तथा । प्रियं दर्शनं-रूपमिति वा । 'दर्शनं शास्त्र-रूपाक्षी ॥' इति विश्वः ॥४८६॥

"प्रियकारी" ४८७ इति । भक्तानां प्रियं कर्तुं शीलमस्येति स तथा । अरं-चक्रम्, तदस्यास्तीति अरी, विष्णुः । प्रिय एव प्रियकः, एवंविधः अरी-विष्णुर्यस्येति वा ॥४८७॥

"प्रियकृद्" ४८८ इति । प्रियं करोतीति प्रियकृत्, सर्वेषां हितकर्तृत्वात् । प्रियं-दैत्यं कृन्ततीति वा । 'प्रियो हितेऽन्यवत् पुंसि दैत्यनामौषधेषु च ॥' इति मेदिनिः ॥४८८॥

"प्रियंवदः" ४८९ इति । प्रियं-हितं वदतीति प्रियंवदः ॥४८९॥

"प्रियङ्करः" ४९० इति । प्रियं-मनोज्ञं करोतीति सः, सर्वेषां प्रियकारित्वात् । प्रियाः-मनोहारिणः करा यस्येति वा ॥४९०॥

"प्रयत:" ४९१ इति। लोकरक्षायै प्रयततीति प्रयतः, तदुद्देशेनैव तत्प्रवृत्तेः ॥४९१॥

"प्रीति:" ४९२ इति। प्रीतिः-सन्तोषः, तद्धेतुत्वात् ॥४९२॥

"प्रयतानन्द:" ४९३ इति। प्रयताः-साधवः, तान् आनन्दयतीति सः, तेषामानन्दो यस्मादिति वा ॥४९३॥

"प्रयतात्मा" ४९४ इति। प्रयतं-सनियमम्, आत्मा-अन्तःकरणं जायते यस्मादिति सः ॥४९४॥

"प्रीतात्मा" ४९५ इति। प्रीतः-सर्वभूतेषु समः, आत्मा यस्य स तथा, सर्वभूतेषु सदृश इत्यर्थः ॥४९५॥

"प्रीतिमना:" ४९६ इति। प्रीतौ-सन्तोषे मनो यस्य स तथा, सकलतृष्णोच्छेदकत्वात् ॥४९६॥

"प्रकाशन:" ४९७ इति। प्रकाशयतीति प्रकाशनः, अखिलपदार्थावभासकत्वात् ॥४९७॥

"प्रकृति:" ४९८ इति। प्रकृतिः-माया, तत्प्रवर्तकत्वात् ॥४९८॥

"प्रकृतस्थित:" ४९९ इति। प्रकर्षेण कृतं स्थितः-स्थानं भक्तानां येनेति सः ॥४९९॥

"प्रलम्बहार:" ५०० इति। प्रलम्बो-लम्बो हारो यस्य स तथा। प्रलम्बतेऽस्मिन् पापिनः इति प्रलम्बः, नरकः। तं हरतीति वा ॥५००॥

॥ इति पादशाहश्रीअकब्बरसूर्यसहस्रनामाध्यापक-श्रीशत्रुञ्जयतीर्थकरमोचनाद्यनेकसुकृतविधापकमहोपाध्यायश्रीभानुचन्द्रगणिविरचितायां तच्छिष्याष्टोत्तरशतावधानसाधनप्रमुदितपादशाहश्रीअकब्बरप्रदत्त'खुस्फहमा'पराभिधानमहोपाध्यायश्रीसिद्धिचन्द्रगणिशोधितायां शेखश्रीअबुलफजलकारितायां चतुश्चत्वारिंशदधिकश्रीसूर्यसहस्रनामटीकायां पञ्चमशतविवरणं समाप्तम् ॥

"परमः" ५०१ इति। परमः-उत्कृष्टः, अनन्याधीनत्वात् केवलचिदानन्दमयस्वरूपत्वाद् वा। परा-उत्कृष्टा मा-माया मा-शक्तिर्ज्ञानं वा यस्येति वा। यदुक्तमन्यत्र—

'उत्कृष्टतां व्यनक्तीह, परशब्दः समासगः।

ज्ञान-श्री-शक्ति-हिंसार्थवाचि मा ध्वनिना समम्॥' इति।

परेषां जनानां मं-ज्ञानं यस्मादिति वा॥५०१॥

"परमोदारः" ५०२ इति। परमश्चासावुदारश्च परमोदारः, सर्वेषां समीहितार्थसार्थसम्पादकत्वात्। परेषां मा-लक्ष्मीः, उः-दीप्तिः, ते दारयतीति वा। 'उ विषादेऽनुकम्पायां दीप्त्यां पुनरनव्ययम्॥' इति मेदिनीकारः। परमाः-योगिनः, तैरुदीर्यते-गम्यते इति वा॥५०२॥

"परमेष्ठी" ५०३ इति। परमे-प्रकृष्टे, स्वे-महिम्नि स्थातुं शीलमस्येति स तथा॥५०३॥

"पुरन्दरः" ५०४ इति। सुराणां शत्रुभूतं पुरं दारयतीति यः स तथा। पुरं द्यतीति पुरन्दरः, इन्द्रः। तस्य रः-रक्षणं यस्मादिति वा॥५०४॥

"प्रणतार्तिहा" ५०५ इति। प्रणतानां-भक्तानां अर्तिं-पीडां हन्तीति स तथा। प्रकृष्टं णं-ज्ञानं येषां ते प्रणाः, तेषां ताः-श्रियः, तासाम् अर्तिः-पीडा विनश्वरत्वलक्षणा, तां हन्तीति वा॥५०५॥

"प्रणतार्तिहरः" ५०६ इति। प्रकर्षेण नताः प्रणताः, विनयवादिनः। तेषामर्तिः-कामजनिता चित्तविप्लुतिः, तस्यां हर इव हरः। प्रणतानां-भक्तानां राज्ञां अर्तौ-धनुष्कोटौ स्थित्वा हरः, अर्थात् सर्वशत्रुविनाशक इति वा। 'अर्तिः पीडा-धनुःकोट्योः॥' इत्यमरः॥५०६॥

"परन्तपः" ५०७ इति। परम्-अत्यर्थं तपतीति सः। परं-शत्रुवर्गमिति वा, ग्रीष्मर्तौ सर्वेषामधिकतापकारित्वात्॥५०७॥

''प्रेरेता:'' ५०८ इति। प्रकृष्टं रेतः-बलं वीर्यं यस्य स तथा, सर्वैरप्रतिहतशक्तित्वात् ॥५०८॥

''प्रशान्तः'' ५०९ इति। प्रकर्षेण शान्तः प्रशान्तः, द्वेषकालुष्यरहित इत्यर्थः; समाधौ लीन इति वा ॥५०९॥

''प्रशमः'' ५१० इति। प्रकर्षेण शमः-शान्तिर्जायते यस्मादिति स तथा ॥५१०॥

''प्रतापवान्'' ५११ इति। कोशः-द्रण्डजतेजः प्रतापः, स विद्यते यस्य स तथा, राजसु तदंशप्रतीतेः सार्वजनीनत्वात्। प्रकृष्टस्तापः प्रतापः, प्रकाशः। तद्वानिति वा ॥५११॥

''प्रतापनः'' ५१२ इति। प्रतापयति शत्रूनिति सः। प्रगतस्तापो येभ्यस्ते प्रतापाः, मुनयः। तेषां नं-ज्ञानं यस्मादिति वा ॥५१२॥

''पृथ्वी'' ५१३ इति। सर्वंसहत्वात् पृथुत्वाद्वा पृथ्वीव पृथ्वी। पृथुः-अधिका, आ-अनुकम्पा, सा अस्यास्तीति वा ॥५१३॥

''प्रथितः'' ५१४ इति। प्रथितः-विख्यातः, त्रिजगज्जनताध्येय नामधेयत्वात् ॥५१४॥

''प्रतीतात्मा'' ५१५ इति। प्रतीतः-लोकैर्ज्ञानपथं नीतः आत्मा-यत्नौ यस्य स तथा ॥५१५॥

''प्रत्यूहः'' ५१६ इति। प्रतिशब्दस्य सादृश्यार्थपरत्वेन प्रति-सदृशं स्वानुरूपम्, ऊहः-ज्ञानं यस्य स तथा। प्रत्यूहः-अन्तरायः, पापिनां तज्जनकत्वाद् तदुपचार इति वा। प्रति-प्रत्येकम्, ऊहः-ज्ञानं यस्येति वा, प्रत्येकप्राणिविषयकज्ञानवत्त्वात् ॥५१६॥

''पुरुषः'' ५१७ इति। पुरं-शरीरं शेते इति पुरुषः।

'नवद्वारं पुरं पुण्यमेतैर्भावैः समन्वितम्।

प्राप्य शेते महात्मा यत्, तस्मात् पुरुष उच्यते ॥'

इति महाभारते ।

पुरुषु-महत्सूत्कर्षशालिषु सर्वेषु सीदतीति वा । पुरूणि-फलानि, सनोति-ददातीति वा । पुरूणि-उत्पन्नानि संहारसमये स्यति-नाशयतीति वा । पूरणत्वाद् वा, पुराणत्वाद् वा, सदनाद् वा पुरुषः । 'पूरणात् सदनाच्चैव ततोऽसौ पुरुषो मतः ॥' इति ॥५१७॥

''पुरुषोत्तमः'' ५१८ इति । पुरुषेषु-त्रिजगद्वर्तिजनेषु उत्तमः-प्रधानः, सर्वाधिकतेजस्कत्वात् ॥५१८॥

''पशुमान्'' ५१९ इति । पशवः-चतुष्पदाः, अर्थादश्वाः । ते विद्यन्ते यस्य स तथा । 'आब्रह्मसम्भवपर्यन्तं पशवः परिकीर्तिताः ॥' इत्युक्तेः । तद्वान् तदधिपतिरिति वा ॥५१९॥

''पिता'' ५२० इति । सर्वेषां जनकत्वात् ॥५२०॥

''पितामहः'' ५२१ इति । पितामहः-ब्रह्मा, तद्द्वारेणैव सृष्टिकर्तृत्वात् ॥५२१॥

''पतगः'' ५२२ इति । पतौ-पक्षौ अहोरात्रिलक्षणौ, ताभ्यां गच्छतीति स तथा । पतनं-पतः, 'पतङ् ऐश्वर्ये' इत्यस्य रूपम् । तं गच्छति जनो यस्मादिति वा ॥५२२॥

''पतङ्गः'' ५२३ इति । लोकदृष्ट्या पंतन्निव गगनमार्गे गच्छतीति सः । पतङ्गः इव पतङ्गः सर्वदा व्योमचारित्वात् ॥५२३॥

''पितृद्वारः'' ५२४ इति । पितृणां द्वारमिव द्वारम्, पूर्वेषां मुक्तिप्रदातृत्वात् ॥५२४'॥

''पुष्कलनिभः'' ५२५ इति । पुष्कला निभा-उपमा यस्य स तथा, प्रकृष्टोपम इत्यर्थः । पुष्कलः-सीममर्यादाकृतो भूमिक्षिप्तपाषाणविशेषः, तस्य निभः-सदृशः, जगद्व्यवस्थापकत्वात् ॥५२५॥

''वषट्कारः'' ५२६ इति। वषट्-आहुतिशब्दविशेषः, तस्य कारः-करणं यदुद्देशेन स तथा ॥५२६॥

''ज्यायान्'' ५२७ इति। अतिशयेन ज्येष्ठः ज्यायान्, सनातनत्वात् ॥५२६॥

''जामदग्र्यजित्'' ५२८ इति। जमदग्नेरिदं जामदग्र्यं, तस्य प्रतिज्ञावचस्तज्जयतीति तथा। जमदग्निना सूर्यमण्डलभेदे प्रतिज्ञाते वरदानेन तन्निवारणात्। जमदग्नेरयं जामदग्र्यः-परशुरामः, तं रामरूपेण जयतीति वा ॥५२८॥

''चारुचरितः'' ५२९ इति। चारु-मनोहारि चरितं-भक्तोद्धरणलक्षणं यस्य स तथा। चारूणि-पुण्यकारीणि कर्माणि चरन्तीति चारुचराः, मुनयः। तैः इतः-प्राप्तः इति वा ॥५२९॥

''जाठरः'' ५३० इति। ब्रह्माण्डजठरवर्तित्वाद् जाठरः, जाठरोऽग्निभेदस्तद्रूपत्वात् वा। जायन्ते इति जाः, उत्पत्तिभाजः। ठाः-शून्याः, तान् राति-आदत्त इति वा, ज्ञानशून्यप्राण्यनुग्राहक इत्यर्थः ॥५३०॥

''जातवेदाः'' ५३१ इति। जातवेदाः-अग्निः, तद्रूपेणैव सर्वे यज्ञांशभोक्तृत्वात्। जाता वेदा यस्मात् स ब्रह्मा, तम् अस्यतीति वा; प्रतिकल्पं ब्रह्मान्तरस्थापनात् ॥५३१॥

''छन्दवाहनः'' ५३२ इति। छन्दानि-स्वाधीनानि वाहनानि यस्य यस्माद्वा स तथा। छन्दाः-अभिप्रायाः, त एव वाहनानि यस्येति वा, स्वाभिप्रायेणैव सर्वत्र गमनात्। 'छन्दो वशेऽप्यभिप्राये ॥' इति मेदिनीकारः। छं-निर्मलं ददातीति छन्दः, अर्थात् पानीयम्। तस्य वाहः-मेघः, तं नयतीति वा।

'छः सूत्रछेदके ख्यातस्तथा संवरणे भवेत्।
छं च छन्दसि तडिति निर्मले च तथा स्मृतः ॥'

इत्येकाक्षरः ॥५३२॥

''योगी'' ५३३ इति। योगः-सकलमूर्तद्रव्यसंयोगः, सोऽस्यास्तीति सः,

त्रिजगद्व्यापकत्वात् । योगाः-ज्योतिःशास्त्रप्रसिद्धा विष्कम्भादयः, ते विद्यन्ते यस्येति वा ॥५३३॥

"योगीश्वरपतिः" ५३४ इति । योगिनः-योगाभ्यासकारिणः । तेषु ईश्वराः याज्ञवल्क्यादयः, तेषां पतिः-पूज्य आराध्य इति यावत् ॥५३४॥

"योगनित्यः" ५३५ इति । योगे नित्यः-स्थिरप्रकृतिक इत्यर्थः । योगः-प्राप्तिः, सा नित्या-सर्वदा यस्मादिति वा, व्यापकत्वेन सर्वत्र सन्निहितत्वात् ॥५३५॥

"योगतत्परः" ५३६ इति । योगाः-पर्वविशेषाः, तेषु तत्परः-अभियुक्तः, पापिनां समुद्धरणाय तादृशयोगनिर्मातृत्वात् ॥५३६॥

"ज्योतिरीशः" ५३७ इति । ज्योतिषां-चन्द्रग्रहनक्षत्राणां महसां वा ईशः-स्वामी, तत्पुष्टिकारित्वात् ॥५३७॥

"जयः" ५३८ इति । 'जीयतेऽनेनेति जयः, तत्प्रदातृत्वात् । सर्वान् जयतीति वा ॥५३८॥

"जीवः" ५३९ इति । जीवति-प्राणान् धारयतीति जीवः ॥५३९॥

"जीवानन्दः" ५४० इति । जीवान् आनन्दयतीति सः । जीवानामानन्दः-मोक्षो यस्मादिति वा । "महानन्दोऽमृतं सिद्धिः कैवल्यमपुनर्भवः ॥" इति हैमः ॥५४०॥

"जीवनः" ५४१ इति । जीव्यन्ते लोका अनेनेति सः । जीवस्य-बृहस्पतेर्जीवानां वा नं-ज्ञानं यस्मादिति वा । 'नो बुद्धिर्ज्ञान-बन्धयोः । अस्मानस्माकमस्मभ्यमेषां स्थाने भवेच्च नः ॥' इत्येकाक्षरः । जीवान् नयति स्वर्गमिति वा ॥५४१॥

"जीवनाथः" ५४२ इति । जीवानां-प्राणिनाम्, जीवस्य-बृहस्पतेर्वा नाथः-स्वामी, तेषां स्वस्वकर्मानुसारिफलप्रदातृत्वात् । 'ईश्वरप्रेरितो गच्छेत् स्वर्गं वा

श्वभ्रमेव च ॥' इति श्रुतेः । जीवैः स्वाभिलषितं नाथ्यते-याच्यत इति वा ॥५४२॥

"जीमूतः" ५४३ इति । जीवनस्य-जलस्य मूतं-पुटबन्धः, पृषोदरादित्वान्निपातः, वृष्टावुपादानकारणीभूतत्वात् । भक्तानां धृतिकर इति वा । 'जीमूतोऽद्रौ धृतिकरः ॥' इति मेदिनिः ॥५४३॥

"जयनप्रियः" ५४४ इति । जयं नयन्ति-प्रापयन्तीति जयनाः, सुभटाः । तेषां प्रियः-वल्लभ इत्यर्थः । 'यजनप्रियः' इति पाठे यजनं-घृतादीनां वह्नौ निक्षेपः, तदेव प्रियं यस्य सः, सर्वदेवात्मकत्वेन यज्ञांशभोक्तृत्वात् ॥५४४॥

"जेता" ५४५ इति । जयतीति जेता, सर्वदैत्योपसंहारकर्तृत्वात् ॥५४५॥

"युगं" ५४६ इति । वत्सरपञ्चात्मकं युगम्, सूर्यपरिस्पन्दजनितत्वेन तस्मिंस्तदुपचारः । 'युगं भवेद् वत्सरपञ्चकेन ॥' इति श्रुतेः ॥५४६॥

"युगादिकृत्" ५४७ इति । युगानामादिं करोतीति युगादिकृत्, तेषां तज्जनितत्वात् ॥५४७॥

"युगावर्तः" ५४८ इति । युगानि कृतादीनि आवर्तयतीति सः, कल्पान्तानन्तरं पुनस्तत्करणात् ॥५४८॥

"जगदाधारः" ५४९ इति । जगतामाधारः-अधिकरणम्, प्रलयादौ जगतस्तत्रावस्थानात् ॥५४९॥

"जगदादिजः" ५५० इति । जगत आदिं जनयतीति स तथा, प्रतिकल्पं नवीनसृष्टिकर्तृत्वात् । जगत आदिर्यस्मात् स अनाद्यनन्तः कश्चित् पुरुषविशेषस्तस्माज्जायत इति वा तदंशीभूतत्वात् ॥५५०॥

"जगदानन्दः" ५५१ इति । जगतामानन्दो यस्मात् स तथा ॥५५१॥

"जगद्दीपः" ५५२ इति । जगति-लोके दीप इव दीपः, अज्ञानान्धतमसाक्रान्तजगत्प्रकाशकत्वात् ॥५५२॥

"जगज्जेता" ५५३ इति। जगज्जयतीति जगज्जेता, त्रैलोक्यजयशालीत्यर्थः ॥५५३॥

"यज्ञः" ५५४ इति। यजनं यज्ञः-वेदोक्तमन्त्रोच्चारणपूर्वकमाहुतिविशेषः, एतदुद्देशेन क्रियमाणत्वात् ॥५५४॥

"यज्ञपतिः" ५५५ इति। यज्ञानां-ज्योतिष्टोमप्रभृतीनां पतिः-स्वामी, तत्प्रत्यूहकारिणां विनाशकत्वात् ॥५५५॥

"चक्रपाणिः" ५५६ इति। चक्रं पाणावस्येति सः। चक्रं-संसारचक्रं पातीति चक्रपः-विष्णुः, ततोऽपि अणिः-दक्ष इति वा। 'अणिराणवदक्षाग्रे ॥' इति विश्वः ॥५५६॥

"चक्रबन्धुः" ५५७ इति। चक्राणां-चक्रवाकानां बन्धुरिव बन्धुः, रजनिजनिततद्विरहोच्छेदकारित्वात् ॥५५७॥

"चक्रवर्ती" ५५८ इति। चक्रे-ज्योतिश्चक्रे वर्तितुं शीलमस्येति स तथा। चक्रवद् वर्तितुं भ्रमिकर्तुं शीलमस्येति वा निरन्तरभ्रमणशीलत्वात् ॥५५८॥

"जगन्नाथः" ५५९ इति। जगतां नाथा यस्मादिति सः, जगद्व्यवस्थायै तत्पालकजनोत्पादकत्वात्। जगता नाथ्यते-प्रार्थ्यते स्वसमिहितमिति वा ॥५५९॥

"जगत्" ५६० इति। जङ्गमीतीति जगत्, तत्स्वरूपत्वात्। तद्व्यतिरेकेण तदभावात् ॥५६०॥

"जगतामन्तकारणः" ५६१ इति। जगतामन्तः-विनाशः, तत्र कारणं-हेतुः प्रलये सर्वेषामुच्छेदकत्वात्। जगतामन्तकश्चासौ अरणश्चेति कर्मधारयो वा। सङ्ग्रामव्यतिरेकेण जगत्संहारकर्तेत्यर्थः ॥५६१॥

"जगतांपतिः" ५६२ इति। जगतां-चतुर्दशभुवनानां पतिः-स्वामी तद्रक्षाकारित्वात् ॥५६२॥

''जगत्साक्षी'' ५६३ इति। जगतां साक्षीव साक्षी, अन्तर्यामितया सर्वेषां समीपवर्तित्वात्। जगतः-लोकस्य सा-लक्ष्मीः, तस्या अक्षः-ज्ञानं विद्यते यस्येति वा ॥५६३॥

''जगत्प्रियः'' ५६४ इति। जगत् प्रीणातीति सः। 'पृ पालन-पूरणयोः' इत्यस्य रूपम्। जगत्पालकत्वात् समीहितार्थपूरकत्वाद् वा ॥५६४।

''जगत्पतिः'' ५६५ इति। जगद्रूपश्चासौ पतिश्चेति कर्मधारयः, तद्व्यतिरेकेण वस्त्वन्तराभावात् ॥५६५॥

''जगत्पिता'' ५६६ इति। जगतां पिता-जनयिता, आहारसंयोजनादिना तत्पोषकत्वात् ॥५६६॥

''यमः'' ५६७ इति। यमयतीति यमः कालस्वरूपत्वात्। नियम इति वा, तदुद्देशेन क्रियमाणत्वात् ॥५६७॥

''जनानन्दः'' ५६८ इति। जनानां-पामराणामप्यानन्दो यस्मात् स तथा, तदुदयेनैव तेषां स्व-स्वकर्मणि प्रवृत्तेः। जः-तेजः, नं-ज्ञानम्, ताभ्यामानन्दो यस्मिन्निति वा ॥५६८॥

''जनार्दन'' ५६९+१ इति। जनानर्थाद् दैत्यादीनर्दयति-हिनस्तीति सः। जनैः समीहितमर्द्यते-याच्यत इति वा ॥५६९+१॥

''चण्डकरः'' ५६९ इति। चण्डाः-तीक्ष्णाः, कराः-किरणा यस्येति सः। चण्डं-साहसिकं भक्तं करोतीति वा। चण्डानां-दुष्टानां करः-दण्डो यस्मादिति वा। चण्डा एव चण्डकाः, तेजस्विनः; अर्थाद् अग्निप्रभृतयः, तेभ्योऽपि रः-तीक्ष्ण इति वा ॥५६९॥

''जनेश्वरः'' ५७० इति। जनानां-लोकानामीश्वरो जनेश्वरः। जनाः-पामरा अपि ईश्वरा यस्मादिति वा, यत्सपर्यावशतः प्राकृतजना अपि ईश्वरतां भजन्तीत्यर्थः। 'जनो लोके महल्लोकात्, परलोके च पामरः ॥' इति मेदिनिः ॥५७१॥

"जनयिता" ५७२ इति । जनयतीति जनयिता, प्रयोजनव्यतिरेकेणैव विश्वजनकस्वभावत्वात् ॥५७२॥

"जङ्गमः" ५७३ इति । जङ्गमतीति जङ्गमः, निरन्तरगमनशीलत्वात् ॥५७३॥

"चराचरात्मा" ५७४ इति । चराः-द्वीन्द्रियादयः, अचराः-पृथिव्यादयः पदार्थाः । तेषु आत्मा-ज्ञानं यस्य स तथा । चरेषु-प्राणिमात्रेषु आ-अनुकम्पा, तामाचरतीति च चराचरः; तादृश आत्मा-स्वभावो यस्येति वा, सकल-प्राण्यनुग्राहकत्वात् । चराश्चाचराश्च तान् अतति-सततं गच्छतीति वा ॥५७४॥

"यशस्वी" ५७५ इति । यशोऽस्यास्तीति यशस्वी, जगत्पालकतया सर्वत्र विख्यात इत्यर्थः ॥५७५॥

"जिष्णुः" ५७६ इति । जयनशीलो जिष्णुः, प्रत्यहं सन्देहानां जेतृत्वात् ॥५७६॥

"जितावरीशः" ५७७ इति । जिताः अवराः-अधमाः कीचकादयस्ते, अर्थात् पाण्डवाः । ते विद्यन्ते यस्यासौ जितावरी, विष्णुः । तस्य ईशः-स्वामी । आवृणोतीत्यावरी माया । जिता आवरी यैस्ते जितावर्यः-मुनयः, तेषामीशः-ध्येय इति वा ॥५७७॥

"जितवपुः" ५७८ इति । जितं वपुः-संसारप्रवृत्तिहेतुकं येनेति सः ॥५७८॥

"जितेन्द्रियः" ५७९ इति । जितानि इन्द्रियाणि-ज्ञानकर्मेन्द्रियाणि येन स तथा, केवलज्योतिःस्वरूपत्वात् ॥५७९॥

"चतुर्भुजः" ५८० इति । चतसृषु दिक्षु भुजा एव किरणा यस्य स तथा ॥५८०॥

"चतुर्वेदः" ५८१ इति । चत्वारो वेदा यस्य यस्माद् वा स तथा । चतसृषु दिक्षु वान्तीति चतुर्वाः-अन्धकाराः, तेषाम् ईः-लक्ष्मीः, तां द्यति-खण्डयतीति वा । चतुर्षु मासेषु इतस्ततो वान्ति-निर्गच्छन्तीति चतुर्वाः, मेघाः ।

तेषाम् ई-लक्ष्मीं ददातीति वा। चतुर्भिः प्रमाणैर्वेदः-ज्ञानं यस्येति वा ॥५८१॥

"चतुर्वेदमयः" ५८२ इति। चत्वारो वेदाः प्रधाना यस्मिन् स तथा ॥५८२॥

"चतुर्मुखः" ५८३ इति। चतुर्णां वेदानां मुखं-प्रणवः, तत्स्वरूपत्वात्। चतसृषु दिक्षु मुखं यस्येति वा, सर्वत्र सम्मुख इत्यर्थः ॥५८२॥

"चित्राङ्गदः" ५८४ इति। चित्राणि-विचात्राणि, अङ्गानि-शरीराणि ददातीति स तथा। चित्रम्-आश्चर्यकृदङ्गं ददातीति वा ॥५८४॥

"वासुकिः" ५८५ इति। वसुकस्यापत्यं वासुकिः, वसुन्धराधारकत्वात्। वः-वरुणः, तस्य असवः-जलानि किरतीति वा ॥५८५॥

"वासरस्वामी" ५८६ इति। वासरः-दिवसः, तस्य स्वामी, तत्प्रवृत्तेस्तदधीनत्वात्। वं-वरुणम्, आ-समन्तात् सरतीति वासरः, इन्द्रः। तस्य स्वामी तद्ध्येयत्वात् ॥५८६॥

"वासरप्रभुः" ५८७ इति। वासराणां-पुण्यवासराणां प्रभुः-देवतेत्यर्थः। वासं रान्तीति वासराः, स्थानाधिष्टारः पुरुषाः। तेषां प्रभुः-समर्थ इति वा ॥५८७॥

"वासरप्रियः" ५८८ इति। वासरे भवा वासराः, जीवविशेषाः। तेषां प्रियः-इष्टः ॥५८८॥

"वासरेशिता" ५८९ इति। वासः-गृहम्, तद् रान्ति ते वासराः, गृहस्थाः। तेषां ईशिता-विशेषेणाराध्य इत्यर्थः ॥५८९॥

"वासरेश्वरः" ५९० इति। वासं-सौगन्ध्यं रान्ति-आददते इति वासराः, ऋतवः। तेषामीश्वरः तत्प्रवर्तकत्वात् ॥५९०॥

"वाहनार्तिहरः" ५९१ इति। वाहनानां-स्वकीयाश्वानां निरन्तरं निरालम्बे पथि भ्रमताम्, अर्तिं-श्रमं हरतीति स तथा ॥५९१॥

"वायुः" ५९२ इति। वाति-निरन्तरं परिस्पन्दं करोतीति स तथा ॥५९२॥

"वायुवाहनः" ५९३ इति। वायुवच्छीघ्रगामी वाहनं यस्य स तथा ॥५९३॥

"वायुरतः" ५९४ इति। वायुः-देवविशेषः, स रतः-अनुरक्तो यस्मिन् स तथा ॥५९४॥

"वाग्विशारदः" ५९५ इति। वाचि-वेदरूपायां विशारदः-प्रथमाध्यापक इत्यर्थः ॥५९५॥

"वाग्मी" ५९६ इति। वाग्-वाणी ब्रह्ममयी विद्यते यस्य स तथा ॥५९६॥

"वारिदः" ५९७ इति। वारि-जलं ददातीति स तथा।

'अग्नौ प्राप्ताहुतिः सम्यगादित्यमुपतिष्ठते।
आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः ॥' इत्युक्तेः ॥५९७॥

"वारणः" ५९८ इति। वारयति शत्रूनिति वारणः। वारम्-अर्थाद् जनसमुदायं नयति स्वस्थानमिति वा वारः। 'सूर्यादिदिवसो वारोऽवसर-वृन्दयोः ॥' इति विश्वः ॥५९८॥

"वसुदाता" ५९९ इति। वसु-द्रव्यं ददातीति सः ॥५९९॥

"वसुप्रदः" ६०० इति। वसु-तेजः प्रकृष्टं ददातीति स तथा, तदुपास्तिकृतां सर्वाधिकतेजस्कत्वात् ॥६००॥

॥ इति पादसाहश्रीअकब्बरसूर्यसहस्रनामाध्यापकश्रीशत्रुञ्जयतीर्थकरमोचनाद्यनेकसुकृतविधापकमहोपाध्यायश्रीभानुचन्द्रगणिविरचितायां तच्छिष्याष्टोत्तरशतशतावधानसाधनप्रमुदितपादसाहश्रीअकबरप्रदत्त 'खुस्फहमा'ऽपराभिधानमहोपाध्यायश्रीसिद्धिचन्द्रगणिशोधितायां शेखश्रीअबुलफजलकारितायां चतुश्चत्वारिंशदधिकश्रीसूर्यसहस्रनामटीकायां षष्ठशतविवरणं समाप्तम् ॥

"विश्वप्रियः" ६०१ इति। विश्वेषां-सर्वेषां प्रियः-वल्लभः सर्वसाधारणत्वात्। विश्वं प्रियं यस्येति वा स्वकार्यत्वात् ॥६०१॥

"वसुमान्" ६०२ इति। वसु-तेजो द्रव्यं वा विद्यते यस्य स तथा ॥६०२॥

"विसृजः" ६०३ इति। विशेषेण सृजतीति विसृजः, पृषोदरादित्वादच्,

समीहितार्थाधिकप्रदातृत्वात् ॥६०३॥

"विहारी" ६०४ इति। विहरतीत्येवंशीलो विहारी, अन्यकार्यकारित्वेऽपि प्रायशो भ्रमणशीलत्वात् ॥६०४॥

"विहगः" ६०५ इति। वीन्-पक्षिणो हन्तीति विहः, व्याधः। तं गमयति-नाशयतीति स तथा। 'विः श्रेष्ठेऽतीते नानार्थे आकाशे विहगेऽपि च ॥' इत्येकाक्षरः ॥६०५॥

"वहनः" ६०६ इति। अग्नौ हुतामाहुतिं वहतीति वहनः अभेदोपमायाम्। वहनं-यानपात्रमिति वा, संसारसागरे निमज्ज्जनानामाधारभूतत्वात् ॥६०६॥

"विहङ्गः" ६०७ इति। विहङ्ग इव विहङ्गः, सर्वदा व्योमचारित्वात् ॥६०७॥

"विहङ्गमः" ६०८ इति। विहायसा-आकाशेन गच्छन्तीति विहङ्गाः, मरीचिप्रभृतयो मुनयः। तान् मन्यते इति सः। विहायसा-आकाशेन गमयति ज्योतिश्चक्रमिति वा, निपातात् साधुः ॥६०८॥

"विहितः" ६०९ इति। सर्वकर्मस्वधिष्ठातृत्वेनोचितः। विशेषेण सर्वेषां हित इति वा, सर्वोपकारकत्वात् ॥६०९॥

"वदान्यः" ६१० इति। दानशौण्डः। सर्वसाधारणमिति चेद्! न, मुक्तिप्रदातृत्वेन सर्वेभ्योऽधिकदातृत्वात् ॥५१०॥

"विधिः" ६११ इति। विधिः-कर्तव्यार्थोपदेशः, तदुपदेष्टृत्वात् तन्नामता ॥६११॥

"विधाता" ६१२ इति। विदधाति-पुष्णातीति विधाता, सृष्टेरनन्तरं त्रिजगत्पालकत्वात्। विशेषेण दधाति भूधरानिति वा ॥६१२॥

"विधेयः" ६१३ इति। विधातव्यो विधेयः, सर्वेषामवधारयितुं योग्यत्वात्। विधीयन्ते कर्माण्यस्मिन्निति वा ॥६१३॥

"विद्वान्" ६१४ इति। वेत्तीति विद्वान्, सर्वविषयकज्ञानवानित्यर्थः ॥६१४॥

"विद्या" ६१५ इति। विद्याश्चतुर्दश प्रसिद्धाः, गुण-गुणिनोरभेदविवक्षया तद्रूप इत्यर्थः। वेत्तीति वित्, बृहस्पतिः। तं मित्रबुद्ध्या यातीति वा ॥६१५॥

"विद्यावान्" ६१६ इति। विद्याः पूर्वोक्ता विद्यन्ते यस्य यस्मिन् वा स तथा ॥६१६॥

"विद्याराजः" ६१७ इति। विद्यानाम्-अष्टादशविद्यानां राजा-प्रभुः, स्वातन्त्र्येणैवोपदेष्टृत्वात्। विद्याभी राजत इति वा ॥६१७॥

"विद्योतनः" ६१८ इति। विशेषेण द्योतयति जगदिति विद्योतनः। वीनां-पक्षिणां द्योतं नयतीति वा ॥६१८॥

"विद्युद्वान्" ६१९ इति। विशिष्टा चासौ द्युच्च तद्वान् ॥६१९॥

"विद्युत्" ६२० इति। आकाशे विद्युदिव राजत इत्यभेदोपमायां विद्युत् ॥६२०॥

"विदिताशयः" ६२१ इति। विदिता आशयाः-सर्वलोकानां मनोगतभावा येन स तथा ॥६२१॥

"विपाप्मा" ६२२ इति। विगतः-नष्टः पाप्मा-पापं यस्मात् सः ॥६२२॥

"विभावसुः" ६२३ इति। विभाः-कान्तयः, वसूनि-रत्नानि यस्य स तथा ॥६२३॥

"विभवः" ६२४ इति। विशिष्टं भवति विश्वमस्मादिति सः। विगतो भवः-संसारो यस्मादिति वा। विशिष्टः-जगत्संहारकारी भवः-रुद्रो यस्मादिति वा। विभवः-सम्पदिति वा ॥६२४॥

"वचसांपतिः" ६२५ इति। वचसां-वाचां पतिः-स्वामी, तासां तदुत्पत्तिहेतुकत्वात् ॥६२५॥

"विजयः" ६२६ इति। विशिष्टो जयो जायते यस्मात् स तथा। विजयते ज्ञान-वैराग्यैश्वर्यादिभिर्विश्वमिति वा ॥६२६॥

''विजयप्रदः'' ६२७ इति। विजयं प्रददातीति सः, तदुपास्तिकृतां सर्वत्र जयोपपत्तेः। वयः-पक्षिणः, तेषां जयम्-उल्लासं प्रददातीति वा ॥६२७॥

''विजेता'' ६२८ इति। विशेषेण-अपुनर्भावेन जयति कर्मादिशत्रूनिति विजेता ॥६२८॥

''विचक्षणः'' ६२९ इति। विशेषेण चष्टे इति विचक्षणः, निपुणः। प्राणिनां स्व-स्वकर्मानुरूपफलजनकत्वात् ॥६२९॥

''विचित्ररथः'' ६३० इति। विशिष्टानि चित्राणि यस्मिन्, एवंविधो रथो यस्य स तथा। वियद्गामित्वेन विशिष्टं चित्रं जनानां यस्माद्, एवंविधो रथो यस्येति वा ॥६३०॥

''विवस्वान्'' ६३१ इति। विवः-तेजो विद्यते यस्य स तथा। विशेषेण वसु-द्रव्यम्, आ-समन्ताद् भक्तेभ्यः अनति-ददातीति वा ॥६३१॥

''विविधः'' ६३२ इति। अनेकप्रकारः नानारूपत्वात्। वयः-पक्षिणः उलूकादयो विद्यन्ते येनेति वा ॥६३२॥

''विविधासनः'' ६३३ इति। विविधानि आसनानि-इन्द्रपदादीनि यस्मात् स तथा ॥६३३॥

''वज्रधरः'' ६३४ इति। वज्रं-शस्त्रविशेषं धरतीति सः, इन्द्ररूपेण तद्धारकत्वात् ॥६३४॥

''आसः'' ६३५ इति। विशेषेण आसन्ते पदार्था अस्मिन्निति सः, कल्पान्ते सर्वेषां तदुदरान्तःपातित्वात् ॥६३५॥

''व्याधिहा'' ६३६ इति। व्याधिं हन्तीति व्याधिहा, सर्वरोगोपशामकत्वात्। विः-पक्षी चक्रवाकः, तस्य आधिः-विरहोद्भवा पीडा, तां हन्तीति वा ॥६३६॥

''व्याधिप्रणाशनः'' ६३७ इति। व्याधिं प्रणयन्तीति व्याधिप्रणाः, असुराः। ते अश्यन्ते येनेति सः ॥६३७॥

"वेदाङ्गः" ६३८ इति। वेदा एव अङ्गं-शरीरं यस्य स तथा, तन्मयशरीरत्वात् ॥६३८॥

"वैद्यः" ६३९ इति। वैद्यः-चिकित्सकः तच्छास्त्रोपदेशकत्वात् ॥६३९॥

"वेदपारगः" ६४० इति। वेदानां पारम्-अन्तं गच्छतीति सः, सहस्रशाखोपयुक्तवेदोपदेशकत्वात्। वेदपाः-ब्राह्मणाः, तान् रगति-रक्षतीति वा। 'रग-नग् रक्षणे' इत्यस्य रूपम् ॥६४०॥

"वेदभृद्" ६४१ इति। वेदं बिभर्तीति सः ॥६४१॥

"वेदवाहनः" ६४२ इति। वेदं वाहयति-योजयति तत्तत्क्रियास्विति सः छन्दोमयरथगामित्वाद् वा ॥६४२॥

"वेदवैद्यः" ६४३ इति। वेद एव वैद्यः, स्वार्थेऽण्। वेदेन वैद्यो वेदवैद्यः, वेदैकप्रमाणगम्य इत्यर्थः। वेदेनैव वैद्य इति वा, तत्तत्कर्मोपदेशनेन संसाररोगविनाशकत्वात् ॥६४३॥

"वेदविद्" ६४४ इति। वेदान् वेत्ति-विचारयतीति सः ॥६४४॥

"वेदकर्ता" ६४५ इति। वेदान् करोतीति वेदकर्ता, वेदनिर्मातेत्यर्थः। मीमांसकमते वेदस्य नित्यत्वात् प्रथमवेदाध्येता। यदुक्तम्—

'स्वयम्भूरेष भगवान्, वेदो गीतस्त्वया पुरा।
शिवाद्या ऋषिपर्यन्ताः स्मर्तारोऽस्य न कारकाः ॥' इति ॥६४५॥

"वेदमूर्तिः" ६४६ इति। वेदा एव मूर्तिः-शरीरान्तरं यस्य स तथा ॥६४६॥

"वेदनिलयः" ६४७ इति। वेदुषु नितरां लयः-चित्तैकाग्र्यं यस्य स तथा। वेदा एव निलयं-गृहं यस्येति वा ॥६४७॥

"व्योमगः" ६४८ इति। व्योम्नि-आकाशे गच्छतीति स तथा ॥६४८॥

"व्योममणिः" ६४९ इति। व्योम्नः-आकाशस्य मणिरिव मणिः, तदलङ्कारकारित्वात् ॥६४९॥

"वेगवान्" ६५० इति। वेगः-जवः, तद् विद्यते यस्य स तथा, शीघ्रगामित्वात्। तदुक्तम्—

'योजनानां सहस्रे द्वे, द्वे शते द्वे च योजने।

एकेन निमिषार्धेन, क्रममाण! नमोऽस्तु ते॥' इति॥६५०॥

"व्यक्ताव्यक्तः" ६५१ इति। चक्षुर्ग्राह्यमण्डलत्वेन व्यक्तः, चिदानन्दरूपतया अव्यक्तः; पश्चात् कर्मधारयः॥६५१॥

"वीरः" ६५२ इति। विशेषेण ईरयति-कम्पयति शत्रूनिति वीरः, प्रत्यहं सन्देहोपघातकारित्वात्॥६५२॥

"वैश्रवणः" ६५३ इति। वै-निश्चयेन श्रवणं-श्रुतिर्यस्य स तथा, सर्वत्र विख्यातत्वात्। वैश्रवणः-धनद इति वा, सकलद्रव्याणामेतदधीनत्वात्॥६५३॥

"विगाही" ६५४ इति। जगद्विगाहितुं शीलमस्येति स तथा॥६५४॥

"विघ्नशमनः" ६५५ इति। विघ्नान् शमयतीति सः॥६५५॥

"विघृणः" ६५६ इति। विशिष्टा घृणा-दया यस्य स तथा, सर्वेषु दयावानित्यर्थः॥६५६॥

"विग्रहः" ६५७ इति। विशिष्टो ग्रहः-ग्रहणं यस्य स तथा; विशिष्टा ग्रहा यस्मादिति वा॥६५७॥

"विकृतिः" ६५८ इति। विविधाः कृतयः-सृष्ट्यादिरूपा यस्य स तथा॥६५८॥

"वक्ता" ६५९ इति। वक्तीति वक्ता, अनेकशास्त्रप्रणेतृत्वात्॥६५९॥

"विगतारिष्टः" ६६० इति। विगतमरिष्टं यस्मात् स तथा, 'शुभस्थाने स्थिते सूर्ये सर्वारिष्टं विनश्यति॥' इति ज्योतिःशास्त्रप्रसिद्धे। विगतमरिष्टं-सूतिकागृहं यस्मादिति वा, तदुपास्तिकृतां भवे पुनर्भावाभावात्॥६६०॥

"विगतात्मा" ६६१ इति। विशेषेण विविधै रूपैर्वा गतः-अवगतः आत्मा-

प्रभावो यस्य स तथा ॥६६१॥

"विमलः" ६६२ इति। विगतो मलः-मायालक्षणो यस्य सः ॥६६२॥

"विमलद्युतिः" ६६३ इति। विमला-परतेजोभिरनभिभूता द्युतिः-दीप्तिर्यस्य स तथा ॥६६३॥

"विमन्युः" ६६४ इति। विगतो मन्युः-क्रोधो यस्मात् स तथा। विविधा मन्यवः-यज्ञा यस्मादिति वा, तत्प्रवर्तकत्वात्। 'मन्युः क्रोधे क्रतौ दैत्ये ॥' इति विश्वः ॥६६४॥

"विमर्षी" ६६५ इति। विशेषेण भक्तागसो मर्षितुं-क्षन्तुं शीलमस्य स तथा ॥६६५॥

"विनिद्रः" ६६६ इति। विगता निद्रा यस्मात् स तथा, सर्वदा जागरूकत्वात् ॥६६६॥

"विराजः" ६६७ इति। विशिष्टा राजानो यस्मात् स तथा ॥६६७॥

"विराड्" ६६८ इति। विशेषेण राजते इति सः ॥६६८॥

"बृहस्पतिः" ६६९ इति। बृहतां-महतां पतिः बृहस्पतिः, निपातनात् साधुः ॥६६९॥

"बृहत्कीर्तिः" ६७० इति। बृहती कीर्तिर्यस्य यस्माद् वा स तथा ॥६७०॥

"बृहत्तेजाः" ६७१ इति। तेजोऽन्तरापेक्षया बृहद्-महत् तेजो यस्य स तथा ॥६७१॥

"वरदः" ६७२ इति। वरं-प्रधानं ददातीति वरदः। दुष्टानां वरं-प्रधानं द्यति खण्डयतीति वा ॥६७२॥

"वरदाता" ६७३ इति। वरं-प्रसादं ददातीति वरदाता। 'वरोऽभीष्टे देवतादेर्वरो जामातृशिङ्गयोः ॥' इति विश्वः ॥६७३॥

"वृद्धिः" ६७४ इति। वर्धनं-वृद्धिः, तद्धेतुत्वात् ॥६७४॥

''वृद्धिदः'' ६७५ इति । वृद्धिं ददातीति सः । तमसां वृद्धिं द्यति-खण्डयतीति वा ॥६७५॥

''वरप्रदः'' ६७६ इति । वराः-प्रकृष्टाः प्रदाः-दानशौण्डाः यस्मात् स तथा ॥६७६॥

''वर्चसः'' ६७७ इति । वर्चः-तेजः, तदस्यास्तीति सः, अर्शादिभ्यो मत्वर्थेऽच् ॥६७७॥

''विरूपाक्षः'' ६७८ इति । विरूपाणि-जगद्विलक्षणानि अक्षाणि-इन्द्रियाणि यस्य स तथा ॥६७८॥

''विरोचनः'' ६७९ इति । विशेषेण रोचयति जगदिति स तथा ॥६७९॥

''वरीयान्'' ६८० इति । अतिशयेन वरो वरीयान् सर्वोत्कृष्ट इत्यर्थः ॥६८०॥

''वरेण्यः'' ६८१ इति । सर्वेषां देवानां मध्ये वरेण्यः-श्रेष्ठ इत्यर्थः ॥६८१॥

''वरुणः'' ६८२ इति । वृणोतीति वरुणः, सस्योत्पत्तिहेतुत्वात् ॥६८२॥

''वर्णाध्यक्षः'' ६८३ इति । वर्णानां-वैश्यशूद्रभेदभिन्नानाम्, अध्यक्षः-अधिकारी । तान् अध्यक्ष्णोति-व्याप्नोतीति वा ॥६८३॥

''वरनायकः'' ६८४ इति । वरश्चासौ नायकश्चेति सः, जगतो योग्याधिपतिरित्यर्थः ॥६८४॥

''वरुणेशः'' ६८५ इति । वरुणो नाम दिक्पतिः, तस्येशः-स्वामी । उश्च अरुणश्च वरुणौ, तयोरीश इति वा । तावीशौ यस्येति वा । 'उकारः पाकशासने ॥' इत्येकाक्षरकोशोक्तेः ॥६८५॥

''वृत्तिः'' ६८६ इति । वर्तनं-वृत्तिः, तत्कारणत्वात् ॥६८६॥

''वृत्तिधरः'' ६८७ इति । वृत्तिं-मर्यादां धरतीति वृत्तिधरः तद्व्यवस्थाकारित्वात् ॥६८७॥

''वृत्तिचारी'' ६८८ इति । वृत्तिं तत्तद्वर्णोक्तजीविकां चारयति-

सञ्चारयतीति स तथा ॥६८८॥

"वृषाकपिः" ६८९ इति । वृषं-धर्मं, आ-समन्तात्, कपति-गच्छतीति स तथा ।-वृषाकपिः-विष्णुर्वा प्रतिकल्पं तदुत्पादकत्वात् ॥६८९॥

"वृषध्वजः" ६९० इति । वृष एव ध्वजः-चिह्नं यस्य स तथा ॥६९०॥

"वशानुगः" ६९१ इति । वशाः-आयत्ताः भक्ताः,ताननुगच्छतीति स तथा, भक्तवश्य इत्यर्थः । वशाः-वशवर्तिनः, अनुगाः-सेवका यस्मादिति वा ॥६९१॥

"विशाखः" ६९२ इति । विविधाः शाखाः-माध्यन्दिनीप्रभृतयो यस्मात् स तथा, वेदशाखाप्रवर्तकत्वात् । विगताः शाखाः—पुत्र-पौत्रादिलक्षणा यस्येति वा, संसारातीतस्वरूपत्वात् ॥६९२॥

"विश्वः" ६९३ इति । जगद्रूपत्वात् ॥६९३॥

"विश्वामित्रः" ६९४ इति । विश्वामित्रः-मुनिविशेषः, ध्यातृध्येययोरभेदोपचारः ॥६९४॥

"विश्वात्मा" ६९५ इति । विश्वा-परिपूर्णा आत्मा-बुद्धिर्यस्य स तथा । 'आत्मा यत्नो धृतिर्बुद्धिः ॥' इत्यमरः ॥६९५॥

"विश्वभावनः" ६९६ इति । विश्वं भावयति-वर्धयतीति स तथा ॥६९६॥

"विश्वयोनिः" ६९७ इति । विश्वस्य-संसारस्य योनिः-कारणम् ॥६९७॥

"विश्वजिद्" ६९८ इति । विश्वं जयतीति स तथा ॥६९८॥

"विश्वविद्" ६९९ इति । विश्वं वेत्तीति विश्ववित्, विश्वविषयकज्ञानवानित्यर्थः ॥६९९॥

"विश्वेश्वरः" ७०० इति । विश्वानां-देवानाम्, ईश्वरः ॥७००॥

॥ इति

पादसाहश्रीअकब्बरजल्लालदीनसूर्यसहस्रनामाध्यापकश्रीशत्रुञ्जयतीर्थ-

करमोचनाद्यनेकसुकृतविधापकमहोपाध्यायश्रीभानुचन्द्रगणिविरचितायां तच्छिष्याष्टोत्तरशतावधानसाधनप्रमुदितपादशाहश्रीअकबरप्रदत्त'खुस्फहमा'ऽपराभिधानमहोपाध्यायश्रीसिद्धिचन्द्रगणिशोधितायां शेखश्रीअबुलफजल-कारितायां चतुश्चत्वारिंशदधिकश्रीसूर्यसहस्रनामटीकायां सप्तमशतविवरणं समाप्तम् ॥

"विशोकः" ७०१ इति । विगतः शोकः-मनोऽस्वास्थ्यं यस्मात् सः, सर्वदानन्दमयत्वात् ॥७०१॥

"विश्वकर्मा" ७०२ इति । विश्वमेवं कर्म यस्य स तथा ॥७०२॥

"विश्वम्भरः" ७०३ इति । विश्वं बिभर्ति-पोषयतीति विश्वम्भरः ॥७०३॥

"विश्वनिलयः" ७०४ इति । विश्वमेव निलयः-निवासस्थानं यस्य स तथा । विश्वस्य निलयः-आधारः इति वा, परब्रह्मणो ज़गदाधारत्वात् ॥७०४॥

"विश्वरूपी" ७०५ इति । विश्वमेव रूपं विद्यते यस्य स तथा, तत्कर्तृत्वेन प्रतीयमानत्वात् ॥७०५॥

"विश्वतापनः" ७०६ इति । विश्वं तापयतीति स तथा, सर्वेषां तप्तिजनकत्वात् ॥७०६॥

"विश्वतोमुखः" ७०७ इति । विश्वतः-सर्वतः मुखम्-आभिमुख्यं यस्य स तथा । यत्र कुत्रचिदप्युपास्यमानः सन्मुख एव भवतीत्यर्थः ॥७०७॥

"विशेषविद्" ७०८ इति । विशेषाः-प्रतिव्यक्तिनियता असाधारणधर्माः, तान् वेत्तीति सः ॥७०८॥

"विष्णुः" ७०९ इति । व्याप्नोति विश्वमिति विष्णुः, विषेर्व्याप्तिविधायिनः ष्णुप्रत्ययान्तस्य रूपम् ॥७०९॥

"विशिष्टः" ७१० इति । स्वारसिकवेदप्रामाण्याभ्युपगन्तारः शिष्टाः, तेषां वेदोपदेशकत्वादयमेव विशिष्टः ॥७१०॥

''विशिष्टात्मा'' ७११ इति । विशिष्टः-अधिकः, आत्मा-बुद्धिर्यस्य स तथा, सर्वविषयकाभ्रान्तिबुद्धिमत्त्वात् ॥७११॥

''विषादः'' ७१२ इति । विषं-पानीयम् अत्तीति विषादः, ग्रीष्मर्तौ जलशोषकत्वात् । 'विषं जले वृक्षभेदे भवेत् क्ष्वेडेऽपि न स्त्रियाम् ॥' इति मेदिनिः । विषं-पानीयमादत्त इति वा ॥७१२॥

''काकः'' ७१३ इति । केन-ब्रह्मणा अक्यते-ज्ञायते इति सः, गत्यर्थानां ज्ञानार्थकत्वात् । केन-सुखेन अकति-गच्छतीति वा । कः-यमः, तस्य अकं-दुखं यस्मादिति वा ।

'कः सूर्य-मित्र-वाथग्नि-ब्रह्मा-ऽऽत्म-यम-केकिषु ।

प्रकाश-वक्त्रयोश्चापि, कं नीर-सुख-मूर्धसु ॥' इति सुधाकलशः ॥७१३॥

''कालः'' ७१४ इति । कायति-क्षिपति सर्वभावानिति कालः, अहोरात्राद्युपाधिकजनकत्वात् । कः-ब्रह्मा, अः-विष्णुः, आ-महादेवः, तेषां द्वन्द्वः; तान् लाति-अनुगृह्णातीति वा ॥७१४॥

''कालानलद्युतिः'' ७१५ इति । कालस्य-प्रलयकालस्य, योऽनलः-वह्निः, तद्वद् द्युतिः-दीप्तिर्यस्य स तथा । काले-अर्थात् सायंकाले वह्नौ द्युतिर्यस्येति वा । 'श्रीसूर्यः स्वतेजो वह्नौ निधायाऽस्तं याति ॥' इति श्रुतेः ॥७१५॥

''कालहा'' ७१६ इति । कालः-असमये मृत्युः, तं हन्तीति स तथा, अपमृत्युनाशक इत्यर्थः ॥७१६॥

''कालचक्रः'' ७१७ इति । काल एव चक्रं-चिह्नं ज्ञापकं यस्य स तथा, कालानुमेय इत्यर्थः । 'चक्रः कोके पुमांश्चिह्ने, व्रजे सैन्य-रथाङ्गयोः ॥' इति मेदिनिः ॥७१७॥

''कालचक्रप्रवर्तकः''७१८ इति । काला-ऽपकालज्ञानाय यच्चक्रं-ज्योतिश्चक्रं तस्य प्रवर्तकः, स्वकान्तिप्रदानपूर्वकं तेषां प्रवर्तकत्वात् ॥७१८॥

''कालकर्ता'' ७१९ इति । कालं करोतीति स तथा, अहोरात्रादितत्तदुपाधिजनकत्वात् । कालं-यमं करोतीति वा, तज्जनकत्वात् ॥७१९॥

''कालनाशनः'' ७२० इति । कल्यन्ते-क्षिप्यन्ते विषयादिषु साधवो येनेति कालः, अहङ्कारः । तस्य नाशकः, गुण-गुणिनोरभेदात् । कालं-तमः, तं नाशयतीति वा ॥७२०॥

''कालत्रयः'' ७२१ इति । अतीतादिकालत्रयसत्तायोगात् कालत्रयः ॥७२१॥

''कामः'' ७२२ इति । कामयतेऽनेनेति कामः, विषयादिलक्षणः; तत्प्रदातृत्वात् ॥७२२॥

''कामारिः'' ७२३ इति । कामस्यारिःकामारिः । शम्भुरूपेण तद्विनाशकत्वात् ॥७२३॥

''कामदः'' ७२४ इति । कामं-यथाभिलषितं ददातीति कामदः । मुनीनां कामं-विषयाभिलाषं द्यति-खण्डयतीति वा ॥७२४॥

''कामचारी'' ७२५ इति । कामेन-स्वेच्छया चरितुं शीलमस्य स तथा, अन्यानपेक्षगतित्वात् ॥७२५॥

''काङ्क्षिकः'' ७२६ इति । काङ्क्षा-आकाङ्क्षा विद्यते येषां ते काङ्क्षिणः, विशेषफललिप्सवः । तेषां कं-सुखं यस्मात् स तथा । काङ्क्षया-जगदुत्पत्त्यादानलक्षणया वा, दीव्यतीति वा, तेन दीव्यति खनति जयति जितमिति ठक् ॥७२६॥

''कान्तिः'' ७२७ इति । कमनं-कान्तिः, गुण-गुणिनोरभेदोपचारः । कः-ब्रह्मा, तस्य अन्तिः-बन्धनं यस्मादिति वा, यन्मायया ब्रह्माऽपि बद्धस्तिष्ठतीत्यर्थः ॥७२७॥

''कान्तिप्रदः'' ७२८ इति । कान्तिं-शोभां प्रददातीति स तथा । कान्तिम्-अर्थाद् ग्रहाणां प्रकर्षेण द्यति-खण्डयतीति वा ॥७२८॥

"कार्यम्" ७२९ इति। क्रियते इति कार्यम्, कार्यकारणयोरभेदात्। 'कार्यः' इति पाठे; केन-सुखेन युतः अर्यः-स्वामीति व्याख्या। 'अर्यः स्वामि-वैश्ययोः ॥' इत्यमरः ॥७२९॥

"कारणावहः" ७३० इति। कारणं-कारणत्वमावहतीति स तथा, जगदुत्पत्तिहेतुत्ववानित्यर्थः ॥७३०॥

"कारुणिकः" ७३१ इति। निरुपधिपरदुःखप्रहाणेच्छा करुणा, सा विद्यते यस्य स तथा; सर्वभूतेषु दयावानित्यर्थः ॥७३१॥

"कार्तस्वरः" ७३२ इति। तत्प्रदातृत्वात् तत्सदृशमण्डलत्वाद् वा। कृतयुगस्यायं कार्तः, एवंविधः सुष्ठु-शोभनः अरः-मर्यादा यस्मात् स तथा, सर्वदा कृतयुगसम्बधिमर्यादाप्रवर्तकत्वात्। 'मर्यादायामरं शीघ्रे शीघ्रगे पुण्यवद् ॥' इति धरण्युक्तेः ॥ केन-अग्निना आर्ताः-पीडिताः, तेषां स्वरः-नामाक्षराणि यस्येति वा ॥७३२॥

"काश्यपेयः" ७३३ इति। कश्यपस्यापत्यं-काश्यपेयो गरुडः, सकलस्थावर-जङ्गमविषविनाशित्वादभेदोपमायां तन्नामता। काश्यपस्य-बौद्धस्य ईः-लक्ष्मीः शून्यवादव्यवस्थापनरूपा, तत्र यः-वह्निरिति वा, किञ्चिद् नास्तीति वदतां भगवद्दर्शनेन तन्मतव्यवच्छेदो भवतीति तात्पर्यार्थः। कश्यं-मद्यं तं पिबन्तीति काश्यपाः, मद्यपाः; तेषां समूहः काश्यपम्। तस्य ईः-शोभा, तस्या यः-यम इति वा, तदुदये तच्छोभानिवृत्तेः। 'यस्तु वह्नौ यमेऽपि च ॥' इत्येकाक्षरकोषाः। काशः-ब्रह्म, तस्येदं काश्यं-ब्रह्मज्ञानम्, तेन पेय इति वा ॥७३३॥

"काष्ठा" ७३४ इति। काष्ठा-दिक् तस्यास्तत्परिस्पन्दजनितत्वात्, अष्टादशनिमेषात्मकालोपाधिजनकत्वाद् वा ॥७३४॥

"खम्" ७३५ इति। खम्-आकाशम्, निराकारत्वाद् व्यापकत्वाद् वा।

'खः' इति पाठे खन्यते तमोऽनेनेति व्याख्या ॥७३५॥

"खतिलकः" ७३६ इति। खे-आकाशे तिलक इव तिलकः, तच्छोभाकारित्वात्। खे-नभसि तिलकाः-अश्वविशेषा यस्येति वा। 'तिलकोऽश्व-द्रुमभेदयोः ॥' इत्यनेकार्थः ॥७३६॥

"खद्योतः" ७३७ इति। खे-नभसि द्योतते-प्रकाशत इति सः। खानि-इन्द्रियाणि प्रकाशत इति वा ॥७३७॥

"खोल्का" ७३८ इति। खानां-नाशकानाम्, उल्का-सन्तापकारी। 'नाशके इन्द्रिये क्लीबं भवेत् खं तु स्त्रियां खनौ ॥' इत्येकाक्षरकोशः ॥७३८॥

"खगः" ७३९ इति। खे-वियति गच्छतीति खगः ॥७३९॥

"खगसत्तमः" ७४० इति। खगाः-ग्रहाः, तेषु सत्तमः। खेन गम्यन्ते इति खगाः-पदार्थाः, तेषु सत्तमः, चक्षुर्विषयकपदार्थानामनित्यत्वेऽपि तद्विषयत्वेऽपि तस्य नित्यत्वात् ॥७४०॥

"घर्मांशु" ७४१ इति। घर्माः-उष्णा अंशवो यस्येति स तथा ॥७४१॥

"घृणी" ७४२ इति। घृणा-दया विद्यते यस्य स तथा ॥७४२॥

"घृणिमान्" ७४३ इति। घृणिः-त्यागः, तद् विद्यते यस्य स तथा। 'घृणिर्भा किरणे त्यागे ॥' इति धरण्युक्तेः। 'सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः ॥' रघुवंशे इत्युक्तेः ॥७४३॥

"कपिः" ७४४ इति। कं-जलं रश्मिभिः पिबतीति कपिः ॥७४४॥

"गभस्तिमाली" ७४५ इति। गभस्तयः-किरणाः, तेषां माला-परम्परा, साऽस्यास्तीति स तथा। गभस्तयः-स्वाहाः, तद्वान्; स्वाहा-स्वधाद्याहुतीनां तदायत्तत्वात्। 'गभस्तिः किरणे सूर्ये ना स्वाहायां च योषिति ॥' इति मेदिनिः ॥७४५॥

"कुबेरः" ७४६ इति। कुबेरः-धनदः, तदंशीभूतत्वात् तदभिधेयता। कुः-

पृथ्वी, बः-वरुणः, ईः-लक्ष्मीः, एतान् राति-गृह्णातीति वा। कुवं-चन्द्रविकाशि कमलम्, ईर्ते-कम्पयतीति सः, तदुदयेनैव तत्सङ्कोचात् ॥७४६॥

"कपिलः" ७४७ इति। कं-जलं पिबतीति। कपयः-रश्मयः, तान् लातीति सः ॥७४७॥

"कपर्दी" ७४८ इति। कपर्दी-ईश्वरः, तद्रूपत्वात् ॥७४८॥

"कविः" ७४९ इति। कवते कौति वा कविः, पण्डित इत्यर्थः ॥७४९॥

"गोपतिः" ७५० इति। गोः-स्वर्गस्य पतिः गोपतिः, तद्गमनस्य तदधीनत्वात् ॥७५०॥

"कवचः" ७५१ इति। भक्तानामवननिदानभूतत्वेन कवच इव कवचः ॥७५१॥

"कवची" ७५२ इति। कवचं-तनुत्राणं तेजोलक्षणम्, तदस्यास्तीति कवची, निरन्तरमच्छेद्याभेद्य इत्यर्थः ॥७५२॥

"गोविन्दः" ७५३ इति। गां विन्दतीति गोविन्दः, तदुक्तमन्यत्र—

'नष्टां वै धरणीं पूर्वमविंदं वै गुहागताम्।
गोविन्द इति तेनाहं देवैर्वाग्भिरभिष्टुतः ॥' इति।
गोवेषात् तु तथा वाणी, तां च विन्दयते भवान्।
गोविन्दस्तु ततो देवो मुनिभिः कथ्यते भवान् ॥' इति ॥७५३॥

"गोमान्" ७५४ इति। गावः-लोचनानि ज्ञानमयानि विद्यन्ते यस्य स तथा। गोमान्-स्वर्गवानिति वा ॥७५४॥

"ज्ञानवान्" ७५५ इति। ज्ञानं विद्यते यस्य स तथा, जगद्विलक्षणनित्यसर्वविषयकज्ञानवानित्यर्थः ॥७५५॥

"ज्ञानगम्यः" ७५६ इति। ज्ञानेनैव गम्यते-ज्ञायते इति सः। 'ज्ञानेनैव तु कैवल्यम् ॥' इति पुराणोक्तेः ॥७५६॥

"ज्ञानशोभनः" ७५७ इति। ज्ञानं शोभनं यस्मिन् यस्माद् वा स तथा ॥७५७॥

''ज्ञेय:'' ७५८ इति। ज्ञातुं योग्यो ज्ञेय:, श्रुति-स्मृति-पुराणादिभिर्बोद्धुं योग्य इत्यर्थ: ।।७५८।।

''केयूरी'' ७५९ इति। केयूरम्-आभरणविशेष:, तदस्यास्तीति तथा ।।७५९।।

''कीर्ति:'' ७६० इति। कीर्तिप्रदातृत्वाद् लोकै: कीर्त्यत इति वा कीर्ति:।।७६०।।

''कीर्तिवर्धन:'' ७६१ इति। एकदिग्गामिनी कीर्ति:, तां वर्धयति-वृद्धिं नयतीति स तथा। कीर्तिं वर्धयति-नाशयति अर्थाद् दैत्यानामिति वा ।।७६१।।

''कीर्तिकर:'' ७६२ इति। कीर्ति:-विस्तारम् अर्थाज्जगत: करोतीति स तथा। 'कीर्तिर्यशसि विस्तारे प्रसादे कर्दमे ।।' इत्यनेकार्थ: ।।७६२।।

''केतुमान्'' ७६३ इति। केतु:-ग्रहविशेष:, सोऽस्यास्तीति केतुमान् ।।७६३।।

''गगनकेतु:'' ७६४ इति। गगनस्य-आकाशस्य केतुरिव केतु:, गगनशोभाकारित्वेन चिह्नरूपत्वेन स्थितत्वात् ।।७६४।।

''गगनमणि:'' ७६५ इति। गगने मणिरिव मणि:, तदुद्द्योतकत्वात् ।।७६५।।

''कला'' ७६६ इति। षोडशोंऽश: कला शशिन:, तद्वृद्धिकारित्वात्। 'द्विसप्तति: कला: पुंसां, चतु:षष्टिस्तु योषिताम् ।।' तदुपदेष्टृत्वात् ।।७६६।।

''कल्प:'' ७६७ इति। कल्पहेतुत्वात् स: ।।७६७।।

''कल्पान्त:'' ७६८ इति। कल्पस्य अन्त:-अवसानं यस्मात् स तथा। कल्पस्य अन्त:-निश्चयो यस्मादिति वा ।।७६८।।

''कल्पान्तक:'' ७६९ इति। कल्पे-युगान्ते अन्तक इव अन्तक:, सकलोच्छेदकारित्वात् ।।७६९।।

कल्पान्तकरण:'' ७७० इति। कल्पस्य-आचारस्य अन्त:-निश्चय: क्रियतेऽनेनेति स:। मधु-कैटभादिनाशार्थं कल्पान्ते के-जले रणो यस्येति वा ।।७७०।।

"कल्पकरः" ७७१ इति। कल्पं-देवलोकं करोतीति सः, भक्तानां तद्गतिहेतुत्वात्। कल्प एव कल्पकः, तत्र रः-तीक्ष्ण इति वा। 'तीक्ष्णे वैश्वानरे कामे रो ध्वनौ ॥' इत्येकाक्षरकोषः ॥७७१॥

"कल्पकृद्" ७७२ इति। कल्पनं कल्पः-प्रपञ्चादि, तत् कृन्ततीति सः, तत्साक्षात्कारानन्तरं तन्निवृत्तेः ॥७७२॥

"कल्पकर्ता" ७७३ इति। कल्पान्-दक्षान् करोतीति स तथा। कल्पानां प्रवर्तक इति वा ॥७७३॥

"कल्पतां वरः" ७७४ इति। कल्पतां-नवीननिर्माणकारिणां मध्ये वरः-प्रधानः श्रेष्ठ इति यावत् ॥७७४॥

"कलिकालज्ञः" ७७५ इति। कलिकालं-कलियुगं जानातीति सः। कलिः-नाशः सर्वसंहारलक्षणः, तस्य कालम्-अवसरं जानातीति वा।" इति मेदिनिः ॥७७५॥

"कल्याणः" ७७६ इति। कल्यां-सत्यवाचम् अणतीति स तथा, श्रेयोरूपत्वाद् वा ॥७७६॥

"कल्याणकरः" ७७७ इति। कल्याणं-मङ्गलं भक्तानां करोतीति सः ॥७७७॥

"कल्याणकृद्" ७७८ इति। कल्याणं-शुभम्, अर्थाद् दैत्यानां कृन्ततीति सः ॥७७८॥

"कल्पवपुः" ७७९ इति। कल्पं-नीरोगं वपुर्यस्य स तथा ॥७७९॥

"कल्मषापहः" ७८० इति। कल्मषं-पापम्, तदपहन्तीति स तथा। 'भगवान् पापनाशकः ॥' इति प्रसिद्धेः ॥७८०॥

"कमलाकरबोधनः" ७८१ इति। कमलानामाकरो बोध्यतेऽनेनेति स तथा। कमलाकरं बोधनं यस्येति वा ॥७८१॥

"कमलानन्दः" ७८२ इति। कमलानां-पद्मानामानन्दो यस्मात् स तथा।

कमलाया आनन्दो यस्मादिति वा, विष्णुरूपेण तद्भोक्तृत्वात् ।।७८२।।

''गुणः'' ७८३ इति । सकलगुणाश्रयत्वेन गुण-गुणिनोरभेदोपचारः । सत्त्वरजस्तमोरूपगुणत्रयात्मक इति वा ।।७८३।।

''गन्धवहः'' ७८४ इति । गन्धवहः-वायुः, तद्वदिव सर्वत्राप्रतिबद्धत्वात् ।।७८४।।

''कुण्डली'' ७८५ इति । कुण्डलं-कुण्डलाकृतिः, प्रस्तावान्मण्डलं लक्ष्यते, तद्वान् । कुण्डलम्-आभरणम्, तदस्यास्तीति वा केयूरवान् मकरकुण्डलवानिति ध्येयरूपत्वात् । कुण्डली-सर्पः, शेषरूपेण वसुधाधारकत्वात् ।।७८५।।

''गणपतिः'' ७८६ इति । गणानां नन्द्यादीनां पतिः-स्वामी ।।७८६।।

''कञ्चुकी'' ७८७ इति । कञ्चुकं-वर्म, तदस्यास्तीति स तथा; सन्देहविनाशार्थं सर्वदा कवचोपयुक्तत्वात् ।।७८७।।

''गुणवान्'' ७८८ इति । गुणाः-शौर्यादयः, ते सन्त्यस्मिन्निति स तथा ।।७८८।।

''गणेशः'' ७८९ इति । गणः-समूहः, अर्थाद् देवानाम्, तस्य ईशः-स्वामी । गणानाम्-अर्थाद् दैत्यगणानाम् ई-लक्ष्मीं श्यतीति वा ।।७८९।।

''गणेश्वरः'' ७९० इति । गणः-प्रथमः, अर्थाद् ब्रह्मा; तस्येश्वरस्तस्य तदुत्पाद्यत्वात् । 'गणः प्रथम-संख्ययोः ।।' इत्यनेकार्थः ।।७९०।।

''गणनायकः'' ७९१ इति । गणः-ज्योतिःशास्त्रव्यवहारः, तत्र नायकः-प्रभुः समर्थ इति यावत्, तत्प्रणेतृत्वात् ।।७९१।।

''गुरुः'' ७९२ इति । हिताऽहितोपदेशकत्वात् ।।७९२।।

''गृहदः'' ७९३ इति । गृहं-स्थानं स्वर्गलक्षणं भक्तानां ददातीति सः ।।७९३।।

''ग्रहपतिः'' ७९४ इति । ग्रहाणां पतिः-पालयिता, तेषां हीनतेजसां

स्वतेजोभिरुपबृंहणकारित्वात् ।।७९४।।

"ग्रहपुषः" ७९५ इति । ग्रहान्-सोमप्रमुखान् पुष्णातीति स तथा ।।७९५।।

"ग्रहेशः" ७९६ इति । ग्रहाणाम् ई-लक्ष्मीं श्यति-खण्डयतीति सः, तदुदये तच्छोभानिवृत्तेः । ग्रहाः प्रवरा ईशा यस्मादिति वा ।।७९६।।

"ग्रहेश्वरः" ७९७ इति । ग्रहाणां मध्ये ईश्वरः-प्रधानः, सर्वोत्कृष्टत्वात् ।।७९७।।

"ग्रहनाथः" ७९८ इति । ग्रहैर्नाथ्यते-प्रार्थ्यत इति स तथा ।।७९८।।

"ग्रह-नक्षत्रमण्डनः" ७९९ इति । ग्रहाश्च नक्षत्राणि च तानि मण्ड्यन्ते-भूष्यन्तेऽनेनेति स तथा ।।७९९।।

।। इति

पादसाहश्रीअकब्बरजल्लालदीनसूर्यसहस्रनामाध्यापकश्रीशत्रुञ्जयतीर्थ-करमोचनाद्यनेकसुकृतविधापकमहोपाध्यायश्रीभानुचन्द्रगणिविरचितायां तच्छिष्याष्टोत्तरशतावधानसाधनप्रमुदितपादशाहश्रीअकब्बरप्रदत्त'खुस्फहमा'ऽपराभिधानमहोपाध्यायश्रीसिद्धिचन्द्रगणिशोधितायां शेखश्रीअबुलफजलकारितायां चतुश्चत्वारिंशदधिकश्रीसूर्यसहस्रनामटीकायामष्टमशतविवरणं समाप्तम् ।।

"क्रियाहेतुः" ८०१ इति । क्रियाः-कर्तव्यरूपाः, तासां हेतुः-कारणम्, वेदोक्तयाग-होमादिक्रियाप्रवर्तकत्वात् ।।८०१।।

"क्रियावान्" ८०२ इति । क्रिया-अवधानम्, तद्वान्; जगद्रक्षणविषये सावधान इत्यर्थः । 'क्रिया रूपापवेष्टयोः । आरम्भ-निःकृतौ पूजा-ऽवधान-वसु-कर्मसु ।।' इति मेदिनिकारः ।।८०२।।

"गरीयान्" ८०३ इति । अतिशयेन गुरुः गरीयान्, सर्वदेवेभ्यो विशिष्ट इत्यर्थः ।।८०३।।

"किरीटी" ८०४ इति । किरीटं-मुकुटम्, तदस्यास्तीति किरीटी । केयूरवान् मकरकुण्डलवान् किरीटी इत्याकारेण ध्येयरूपत्वात् ।।८०४।।

''कर्मसाक्षी'' ८०५ इति । कर्मणां-शुभाऽशुभकर्मणां साक्षीव साक्षी, तद्द्रष्टेत्यर्थः ॥८०५॥

''करणम्'' ८०६ इति । क्रियतेऽनेनेति शुभा-ऽशुभकर्मेति तत् तथा । वाडवाग्निरिति वा, जलशोषकत्वात् । 'करणं हेतु-कर्मणोः । वाडवाग्नौ हस्तलेपे ॥' इति मेदिनिकारः । केन-सुखेन मुक्तो रणः-शब्दो यस्येति वा ॥८०६॥

''किरणः'' ८०७ इति । किरति तमः इति किरणः, गुण-गुणिनोरभेदोपचारः ॥८०७॥

''कर्णसूः'' ८०८ इति । कर्ण्यते-आकर्ण्यते धर्मार्थिभिरिति कर्णः, वेदः । तं सूते-करोतीति सः ॥८०८॥

''कृष्णवासाः'' ८०९ इति । कृष्णम्-अर्थात्तद्वर्णमाकाशम्, वासः-वस्त्रं यस्य स तथा । राम इति वा, तदंशत्वेन तद्रूपत्वात् ॥८०९॥

''कृष्णवर्त्मा'' ८१० इति । कृष्णवर्त्मा-अग्निः, तत्स्वरूपत्वात् । कृष्णः-व्याप्तः तस्य वर्त्म-मार्गो यस्मादिति वा ॥८१०॥

''कृतम्'' ८११ इति । कृतं-सत्ययुगम्, तत्प्रवर्तकत्वात् तथा ॥८११।

''कर्ता'' ८१२ इति । करणशीलः कर्ता, परानपेक्षकर्तृत्वात् ॥८१२॥

''कृताहारः'' ८१३ इति । कृतः प्रलयसमये विश्वस्य आहारः-हरणं येन स तथा ॥८१३॥

''कृतान्तसूः'' ८१४ इति । कृतान्तं-सिद्धान्तं सूते इति सः, सर्वसिद्धान्त-प्रणेतृत्वात् । कृतान्तं यममिति वा, तज्जनकत्वात् । 'कृतान्तो यम-सिद्धान्त-दैवा-ऽकुशलकर्मसु ॥' इत्यमरः ॥८१४॥

''कृतात्मा'' ८१५ इति । कृताः-निष्पादिताः, आत्मानः-जीवा येनेति स तथा ॥८१५॥

''कृतातिथ्यः'' ८१६ इति । कृत आ-समन्तात् तिथ्यः-तिथिव्यवहारो येन

स तथा। सोमस्य स्वकलाप्रदानेन कृतः प्रतिपदादिव्यवहार इत्यर्थः ॥८१६॥

"कृतपतिः" ८१७ इति। कृतं-कर्म तस्य पतिः-स्वामी, तत्फलजनकत्वात्। कृतयुगस्य पतिर्वा, तत्प्रवर्तकत्वात्। कृता पतयो येनेति वा ॥८१७॥

"कृतविश्वः" ८१८ इति। कृतं विश्वं-जगद् येन स तथा, सृष्टिकर्तृत्वात्। कृता विश्वाः-देवा येनेति वा ॥८१८॥

"कृती" ८१९ इति। कृतमस्यास्तीति कृती, सर्वविलक्षणजगन्निर्माणकुशल इत्यर्थः ॥८१९॥

"कृतकृत्यः" ८२० इति। कृतं कृत्यं येनेति सः, अवाप्तसकलकामत्वेन कर्तव्यतारहितः ॥८२०॥

"कृतमङ्गलः" ८२१ इति। कृतानि मङ्गलानि यस्मै येनेति स तथा। कृतो मङ्गलः-कुजो येनेति वा ॥८२१॥

"कृतिनांवरः" ८२२ इति। कृतिनां-प्रेक्षावतां वरः-श्रेष्ठो मुख्य इति यावत् ॥८२२॥

"क्षान्तिः" ८२३ इति। क्षान्तिः-क्षमा, तद्गुणयोगात्। क्षान्तिः, तेजसां हि न वयः समीक्ष्यते इति वत् ॥८२३॥

"क्षुधाजः" ८२४ इति। क्षुधां-विषयवासनाम्, अजति-क्षिपतीति स तथा ॥८२४॥

"क्षेमः" ८२५ इति। क्षीयते क्लेशोऽनेनेति सः ॥८२५॥

"क्षेमस्थितिप्रियः" ८२६ इति। क्षेमा-मङ्गलकारिणी या स्थितिः सा प्रिया यस्य स तथा। क्षेमः(मं)-मर्यादा, तस्यां स्थितिर्येषाम्, ते प्रिया यस्येति वा। 'मर्यादा-शुभयोः क्षेमम् ॥' इति विश्वः ॥८२६॥

"क्षमा" ८२७ इति। अपराधिष्वपि क्षमावानित्यर्थः ॥८२७॥

"कश्मलापहः" ८२८ इति। कश्मलं-मालिन्यम्, तदपहन्तीति तथा ॥८२८॥

''गतिमान्'' ८२९ इति। गतिः-ज्ञानम्, तद्वान्; सर्वविषयकज्ञानवानित्यर्थः। मङ्गलारिभ्यः शीघ्रगतिमत्वाद् वा ॥८२९॥

''लोहिताङ्गः'' ८३० इति। लोहितमङ्गं यस्य स तथा। उदयाऽस्तमनयोस्तथाप्रतिभासमानत्वात्। लोहिताङ्गः-मङ्गलः, तत्कारणत्वाद् वा। 'आरो वक्रो लोहिताङ्गो मङ्गलोऽङ्गारकः कुजः ॥' इति हैमः ॥

''लोकाध्यक्षः'' ८३१ इति। लोकान् अध्यक्ष्णोति-व्याप्नोतीति स तथा। लोकानामध्यक्षः, तद्रक्षायै नियुक्त इति वा ॥८३१॥

''लोका-ऽलोकनमस्कृतः'' ८३२ इति। लोकाः-संसारान्तर्वर्तिनो जनाः, तद्व्यतिरिक्ताः-अलोकास्तैर्नमस्कृतः-प्रणतिविषयीकृत इत्यर्थः। लोकः-ज्ञानं तेनालोको येषां ते लोकालोकाः, परमयोगिनः। तैर्नमस्कृत इति वा ॥८३२॥

''लोकसाक्षी'' ८३३ इति। लोकानामन्तर्यामित्वेन तत्कृतकर्मणां साक्षी-प्रतिभूः ॥८३३॥

''लोकबन्धुः'' ८३४ इति। लोकानां बन्धुरिव बन्धुः, परमोपकारकारित्वात् ॥८३४॥

''लोकवत्सलः'' ८३५ इति। लोकानां वत्सलः-हितकारी ॥८३५॥

''लोकेशः'' ८३६ इति। लोकाः-चतुर्दश, तेषामीशः-स्वामी ॥८३६॥

''लोककरः'' ८३७ इति। लोकं-जगत् करोतीति सः ॥८३७॥

''लोकनाथः'' ८३८ इति। लोकैर्नाथ्यते-याच्यतेऽभीष्टमिति सः। लोकस्य नाथा यस्मादिति वा ॥८३८॥

''लोकत्रयाशयः'' ८३९ इति। लोकत्रये आशयः-अन्तकरणं यस्य स तथा। लोकत्रितयरक्षायां दत्तमानसः। लोकत्रयस्याश्रयो वा, कल्पान्ते सर्वेषां तत्रावस्थितेः। 'आशयः स्यादभिप्रायेऽप्याश्रये पनसद्रुमे।' इति मेदिनिः ॥८३९॥

''लयः'' ८४० इति। लीयते कल्पान्तावस्थायां जगदस्मिन्निति सः ॥८४०॥

"मासः" ८४१ इति। सूर्यपरिस्पन्दजनितः कालविशेषो मासः, तत्प्रवर्तकत्वात् ॥८४१॥

"मानिदामा" ८४२ इति। मानं विद्यते यस्य तन्मानि, एवंविधं दाम यस्य स तथा, शोभनस्रगित्यर्थः। मानं विद्यते येषां ते मानिनः-दैत्याः, तान् द्यन्तिखण्डयन्ति ये ते मानिदाः, सुराः। तेषां मां-लक्ष्मीं आनयति-प्राणयतीति वा ॥८४२॥

"मान्धाता" ८४३ इति। मान्धाता-राजा तत्कारणत्वात् ॥८४३॥

"मानी" ८४४ इति। मानं-पूजाविशेषो विद्यते यस्य स तथा ॥८४४॥

"मारुतः" ८४५ इति। मया-लक्ष्म्या रुतः-अनेकैः प्रकारैः स्तुतः ॥८४५॥

"मार्तण्डः" ८४६ इति। मृतमण्डं जीवयतीति सः, स्वतेजसा ब्रह्माण्डमनुप्रविश्य तदुपबृंहणात् ॥८४६॥

"माता" ८४७ इति। मननशीलो माता, जनयित्री वा; जगन्निवासजठरत्वात् पोषकत्वाद् वा ॥८४७॥

"मातरः" ८४८ इति। मया-लक्ष्म्या दरिद्रोपद्रुतान् जनान् तारयतीति सः ॥८४८॥

"महास्वेताप्रियः" ८४९ इति। महास्वे नाम्नी नाडी, तस्याः प्रियः-तदधीशः। 'महास्वेताया नाड्याः श्रीसूर्यः स्वामी ॥' इति योगशास्त्रे प्रतिपादितत्वात्। औषधिविशेषो वा, तस्याः प्रियः। 'आदित्य-वारोद्धृतमहास्वेतामूलस्य बहुषु कार्येषूपयोगः ॥' इति रुद्रयामलादौ कथितत्वात् ॥८४९॥

"महाबाहुः" ८५० इति। महान्तो बाहवो यस्मात् स तथा ॥८५०॥

"महाबुद्धिः" ८५१ इति। महती-सकलपदार्थावभासिनी बुद्धिर्यस्य यस्माद्वा स तथा ॥८५१॥

''महाबलः'' ८५२ इति। बलिनामपि बलप्रदातृत्वान्महाबलः। महद् बलं यस्मादिति वा ॥८५२॥

''महायोगी'' ८५३ इति। महान्-अनिर्वचनीयस्वरूपो योगः-मनो-वाक्-कायनिरोधलक्षणो विद्यते यस्य स तथा ॥८५३॥

''महायशाः'' ८५४ इति। महद्-इयत्तावच्छिन्नपरिमाणरहितं यशो यस्य स तथा ॥८५४॥

''महावैद्यः'' ८५५ इति। महांश्चासौ वैद्यश्च सः, बाह्या-ऽऽभ्यन्तररोगोपशामकत्वात् ॥८५५॥

''महावीर्यः'' ८५६ इति। महद् वीर्यं-पराक्रमो यस्य स तथा ॥८५६॥

''महावराहः'' ८५७ इति। महांश्चासौ वराहश्चेति स तथा; वसुंधरोद्धरणक्षमत्वात् ॥८५७॥

''महावृत्तिः'' ८५८ इति। महती वृत्तिः-जीवनोपायो यस्मात् स तथा ॥८५८॥

''महाकारुणिकोत्तमः'' ८५९ इति। महान्तश्च ते कारुणिकाश्च महाकारुणिकाः, तेषु उत्तमः-प्रशस्यः ॥८५९॥

''महामायः'' ८६० इति। महती माया यस्य स तथा। महत्या मया-लक्ष्म्या अयते-उपजीव्यते इति वा ॥८६०॥

''महामन्त्रः'' ८६१ इति। महांश्चासौ मन्त्रश्चेति सः, गायित्र्यादिमन्त्रो-पदेशकत्वात्। महेषु-उत्सवेषु आमन्त्रयत इति वा। 'महश्चोत्सव-तेजसोः ॥' इत्यमरः। सर्वत्र आत्महतः समानाधिकरणजातीययोरिति टेरात्वम् ॥८६१॥

''महान्'' ८६१ इति। मह्यते-पूज्यते सर्वैरिति महान्, सर्वोत्तम इति वा ॥८६१॥

''महारथः'' ८६२ इति। महान्-सर्वत्राऽस्खलितगती रथः-यानं यस्य स तथा ॥८६२॥

"महाशक्तिः" ८६३ इति। महती शक्तिः-सामर्थ्यं जगद्रक्षण-विषयकमस्येति स तथा ॥८६३॥

"महाशनिः" ८६४ इति। महांश्चासौ अशनिश्चेति सः, दुष्टानां वज्रतुल्यत्वात् ॥८६४॥

"महातेजाः" ८६५ इति। महत् तेजो यस्य स तथा। यदुक्तमन्यत्र—

'तेजस्विनो यदीयेन, तेजसा पावकादयः।
तत्तेजो महदस्येति, महातेजाः प्रकीर्तितः॥' इति ॥८६५॥

"महात्मा" ८६६ इति। महान्-सर्वव्यापक आत्मा-स्वरूपं यस्य स तथा ॥८६६॥

"मुहूर्तः" ८६७ इति। मुहूर्तादिकालोपाधिनिर्मातृत्वात् तन्नामता ॥८६७॥

"महोत्साहः" ८६८ इति। महान् उत्साहः-आत्मगुणविशेषो यस्य स तथा, जगदुत्पत्ति-स्थिति-लयार्थमुद्युक्तत्वात् ॥८६८॥

"महेच्छः" ८६९ इति। महती-जगन्निर्माणलक्षणा इच्छा यस्य स तथा ॥८६९॥

"महेन्द्रः" ८७० इति। महांश्चासाविन्द्रश्चेति सः, सकलसुरेन्द्रादिभिः पूज्यत्वात् ॥८७०॥

"महेश्वरः" ८७१ इति। महांश्चासौ ईश्वरश्चेति सः, अचिन्त्यानन्तैश्वर्ययुक्तत्वात् ॥८७१॥

"मिहिरः" ८७२ इति। मिहति-सिञ्चति स्वतेजोभिर्जगदिति सः। अतिदयावानिति वा। 'मिहिरो भास्करेऽपि स्यान्मिहिरोऽतिदयावति॥' इति विश्वः ॥८७२॥

"महितः" ८७३ इति। महितः-पूजितः ॥८७३॥

"महत्तरः" ८७४ इति। अतिशयेन महान् महत्तरः, सर्वाधिकते-

जोमयत्वात् ॥८७४॥

"मधुसूदनः" ८७५ इति। मधोः-दैत्यस्य सूदनः-विनाशकः, कृष्णरूपेण तन्नाशकत्वात्। मधुसूः-पुष्पम्, तस्य उः-विशेषेण दनः-विकाशो यस्मादिति वा। 'उर्विशेषेऽनुकम्पायाम् ॥' इत्युक्तेः। 'दनुर्दैत्यप्रभेदे स्यात् प्रकाशे स्याद् दनः पुमान् ॥' इति मेदिनिः ।८७५॥

"मोक्षः" ८७६ इति। तत्प्रदातृत्वात् तन्नामता ॥८७६॥

"मोक्षाधारः" ८७७ इति। मोक्षम् आ-समन्ताद् भक्तानां धारयति-प्रापयतीति स तथा ॥८७७॥

"मोक्षहेतुः" ८७८ इति। संसारपाशान्मोचनं मोक्षः, तस्य हेतुः-कारणं तद्, मोक्षस्य तद्धेतुकत्वात् ॥८७८॥

"मोक्षदायकः" ८७९ इति। मोक्षं-मुक्तिं दापयतीति सः ॥८७९॥

"मोक्षद्वारम्" ८८० इति। सकलकर्मणां क्षयः-मोक्षः, तस्य द्वारमिव द्वारम्, तत्प्राप्तौ निदानीभूतत्वात् ॥८८०॥

"मौनी" ८८१ इति। अधार्मिकेषु धर्मानुपदेशः-मौनम्, तद्वान् ॥८८१॥

"मेधा" ८८२ इति। शब्दा-ऽर्थयोर्धारणवती धीर्मेधा, तदुपायीभूतत्वात् तन्नामता ॥८८२॥

"मेधावी" ८८३ इति। पूर्वोक्ता मेधा विद्यते यस्य स तथा ॥८८३॥

"मेध्यः" ८८४ इति। मेध्यः-पवित्रः। यदुक्तमन्यत्र—

'यद् भानुभिर्भूमिरापः शोध्यन्तेऽमेध्यगा अपि।

सर्वेभ्योऽप्यधिको मेध्यः श्रीसूर्य इति गीयते ॥' इति ब्रह्मपुराणोक्तेः ॥८८४॥

"मेधिकः" ८८५ इति। मेधया-पूर्वोक्तया दीव्यतीति मेधिकः। मा-लक्ष्मीः, इः-कामः, तयोः धिः-समूहः, तस्मात् कं-सुखं यस्येति वा। 'धिर्धिक्कारे समूहे स्यात्, स्त्रियां धीः स्मरणे मतौ ॥' इति धरणिः ॥८८५॥

"मेरुमेयः" ८८६ इति। मेरुणा मीयते, अर्थाद् द्वीपान्तर्गमनं यस्य स तथा ॥८८६॥

"मुकुटी" ८८७ इति। मुकुटं-शिरोभूषणम्, तदस्यास्तीति सः। मुः-मुक्तिः, तस्याः कुटः-वासः, तद्वानिति वा। 'स्त्रियां मुर्मोक्षणे मोक्षः॥' इति मेदिनिः। 'वासः कुटो द्वयोः शाला॥' इत्यमरः ॥८८७॥

"मनुः" ८८८ इति। मन्यते इति मनुः, कालविशेषः; तज्जनकत्वात् ॥८८८॥

"मुनिः" ८८९ इति। मननशीलः-मुनिः, सर्वविषयकभावनावानित्यर्थः ॥८८९॥

"मन्दारः" ८९० इति। मन्दन्ते-मोदन्ते देवा अनेनेति मन्दारः, पारिजातकः। नभसः शोभाकारित्वेन तत्प्रतिम इत्यर्थः। मन्देषु-पापिषु तदुच्छेदकारि अरं-चक्रं यस्येति वा ॥८९०॥

"मन्देहक्षेपणः" ८९१ इति। मन्देहाः-राक्षसाः क्षिप्यन्तेऽनेनेति स तथा ॥८९१॥

"मनोहरः" ८९२ इति। मनः-चित्तं हरतीति मनोहरः, रुचिराकारधारित्वात् ॥८९२॥

"मनोहररूपः" ८९३ इति। मनोहरं-चित्ताह्लादजनकं रूपं यस्मात् स तथा ॥८९३॥

"मङ्गलम्" ८९४ इति। मङ्गलं-शुभकर्म, तन्मयत्वात् ॥८९४॥

"मङ्गलालयः" ८९५ इति। मङ्गलस्य-अङ्गारकस्य, आलयः-स्थानं यस्मात् स तथा। प्रथमतः श्रीसूर्यादङ्गारको मेषं वृश्चिकं राशिद्वयं प्राप्तवानिति प्रसिद्धेः ॥८९५॥

"मङ्गलवान्" ८९६ इति। मङ्गलानि विद्यन्ते यस्य यस्मिन् वा स तथा ॥८९६॥

"मङ्गली" ८९७ इति। प्रतिदिनमुदयो मङ्गम्, तदस्यास्तीति स तथा ॥८९७॥

"मङ्गलकर्ता" ८९८ इति । मङ्गलानि-श्रेयांसि भक्तानां करोति-निष्पादयतीति स तथा ॥८९८॥

"मन्त्रः" ८९९ इति । मन्त्रयतीति मन्त्रः, नास्तिकैरननुभूतस्वरूपः ॥८९९॥

॥ इति पादसाहश्रीअकब्बरसूर्यसहस्रनामाध्यापकश्रीशत्रुञ्जयतीर्थकरमोचनाद्यनेकसुकृतविधापकमहोपाध्यायश्रीभानुचन्द्रगणिविरचितायां तच्छिष्याष्टोत्तरशतावधानसाधनप्रमुदितपादशाहश्रीअकब्बरप्रदत्त'खुस्फहमा'ऽपराभिधानमहोपाध्यायश्रीसिद्धिचन्द्रगणिशोधितायां शेखश्रीअबुलफजलकारितायां चतुश्चत्वारिंशदधिकश्रीसूर्यसहस्रनामटीकायां नवमशतविवरणं समाप्तम् ॥

"मन्त्रमूर्तिः" ९०१ इति । मन्त्राः-वेदमन्त्राः, तन्मयी मूर्तिर्यस्य स तथा । 'मन्त्रमयी देवता ॥' इति मीमांसकोक्तेः ॥९०१॥

"मरीचिमाली" ९०२ इति । मरीचिभिर्मालते-शोभते इत्येवंशीलो मरीचिमाली । मरीचीनां मया-शोभया लीयतेऽस्मिन्निति वा ॥९०२॥

"मृत्युः" ९०३ इति । म्रियतेऽनेनेति मृत्युः, रुद्ररूपेण संहारकत्वात् ॥९०३॥

"मरुतामीश्वरेश्वरः" ९०४ इति । मरुतामीश्वराः-इन्द्राः, तेषामपीश्वरः ॥९०४॥

"मरुतांपतिः" ९०५ इति । मरुतां-सर्वगायित्रीमन्त्राणां पतिः-अधिष्ठाता । 'मरुद् देवे समीरे ना गायित्री-ग्रन्थि-पर्णयोः ॥' इति मेदिनिः ॥

मिष्टाचारः" ९०६ इति । मिष्टः-शुभफलप्रद आचारो यस्य स तथा ॥९०६॥

"मतिः" ९०७ इति । मननं-मतिः, तत्प्रदातृत्वात् तन्नामता ॥९०७॥

"मतिमान्" ९०८ इति । मतिः-अनिर्वचनीया धीर्विद्यते यस्य यस्मिन् वा, स तथा ॥९०८॥

"नाकारः" ९०९ इति । न विद्यते आकारो यस्य स तथा, नाकारादित्वाद् अनभावः, निरंशत्वाद् ॥९०९॥

"नाकपालिः" ९१० इति । नाकस्य-स्वर्गस्य पालिरिव पालिः, तन्मर्यादीभूतत्वात् । नाकं पान्तीति नाकपाः, इन्द्राः । तेषाम् आलिः-सेतुः । 'अलिः सुरा पुष्पलिहोः पुंस्यालिर्विशदाशये ।
स्त्रियां त्रिषु वयस्यायां सेतौ पक्षे च कीर्तितः ॥' इति मेदिनिः ॥९१०॥

"नागराड्" ९११ इति । नागाः-पातालवासिनो देवाः, तेषां राट्-राजा । नागाः-तोयदा राजन्ते येनेति वा । "नागः पुं नाग-मातङ्ग-क्रूराचारिषु तोयदे ॥" इति मेदिनिकारः ॥९११॥

"नारायणः" ९१२ इति । नाराः-आपो भूतानि वा, तान् अयते इति सः । यदुक्तमन्यत्र—
'आपो नारा इति प्रोक्ता आपो वै नरसूनवः ।
तापदस्यायनं प्रोक्तं तेन नारायणः स्मृतः ॥' इति ॥९१२॥

"नाथः" ९१३ इति । नाथ्यते-याच्यते लोकैरिति सः । सर्वेश्वर इति वा ॥९१३॥

"नभः" ९१४ इति । नभ्यतीति नभः, आकाशम्; अनन्तत्वाद् तदभिधेयता । तद्वद् व्यापक इति वा ॥९१४॥

"नभस्वान्" ९१५ इति । नभस्वान्-वायुः, प्राणरूपत्वेन सकलप्राणिषु वर्तमानत्वात् ॥९१५॥

"नभोविगाहनः" ९१६ इति । नभः-आकाशं विगाह्यतेऽनेनेति सः ॥९१६॥

"नभःकेतनः" ९१७ इति । नभः-आकाशम् तदेव केतनं-गृहं यस्य स तथा, सर्वदा तत्रावस्थितिकारित्वात् ॥९१७॥

"नूतनः" ९१८ इति । नूतनः-नवः, प्रतिदिनमुदयशालित्वात्, जरसाऽनभिभूतत्वाद् वा ॥९१८॥

"नोत्तरः" ९१९ इति । उत्-प्राबल्येन तरति संसारमिति उत्तरः, गुरुः । न

विद्यते यस्य स तथा, सर्वेषामयमेव गुरुरित्यर्थः ॥९१९॥

"नयः" ९२० इति । नयति-प्रापयति, अर्थान्मुक्तिमिति स तथा । नीतिप्रवर्तकत्वाद् वा ॥९२०॥

"नैकरूपः" ९२१ इति । न विद्यते एकं रूपं यस्य स तथा, अनन्तरूपत्वात् ॥९२१॥

"नैकरूपात्मा" ९२२ इति । न विद्यन्ते एकरूपा आत्मानः-स्वभावा यस्य स तथा, अनेकस्वभावत्वात् ॥९२२॥

"नीलकण्ठः" ९२३ इति । नीलः कण्ठो यस्य सः नीलकण्ठः, ईश्वरः; एकमूर्तित्वात् । 'एकमूर्तिस्त्रयो देवाः ॥' इत्युक्तेः ॥९२३॥

"नीललोहितः" ९२४ इति । नीलश्चासौ लोहितश्चेति कर्मधारयः, अनेकवर्णोपेतत्वात् । 'श्वेतः कृष्णस्तथा रक्तः सृष्टि-स्थित्यन्तयोगतः ॥' इत्युक्तेः ॥९२४॥

"नेता" ९२५ इति । नयति शुभमार्गे जनानिति नेता ॥९२५॥

"नियतात्मा" ९२६ इति । नियतः-संयतः, आत्मा-अन्तःकरणं यस्य स तथा ॥९२६॥

"निकेतनः" ९२७ इति । निकेतनं-गृहम्, सर्वेषामाश्रयभूत इत्यर्थः । निकेत्यते-निमन्त्र्यते यज्ञेष्वसाविति वा ॥९२७॥

"निक्षुभापतिः" ९२८ इति । निर्गता क्षुभ् येषां ते निक्षुभाः, निःपरिग्रहाः । तेषाम् आ-समन्ताद्भावेन पतिः-स्वामी । 'क्षुभ् सञ्चने' इत्यस्य धातोः क्विबन्तस्य रूपम् ॥९२८॥

"नन्दिवर्धनः" ९२९ इति । सर्वाभिरुपपत्तिभिः समृद्धिः-नन्दिः, तद्वर्धनः-तत्पूरकः ॥९२९॥

"नन्दनः" ९३० इति । नन्दयति-आनन्दयति सर्वान् भक्तान् इति स तथा

॥९३०॥

"नरः" ९३१ इति। 'न रयतीति नरः प्रोक्तः परमात्मा सनातनः ॥' इति व्यासोक्तेः। स्वस्थानप्रापक इत्यर्थः। नं-ज्ञानं राति-ददातीति वा ॥९३१॥

"निराकुलः" ९३२ इति। निर्गतः आ-समन्तात् कुलः-बन्धनं यस्मात् सः ॥९३२॥

"निरहङ्कारः" ९३३ इति। निर्गतोऽहङ्कारो यस्मात् स तथा, स्वप्रतिमाभावात् ॥९३३॥

"निर्बन्धः" ९३४ इति। निर्गतो बन्धः-बन्धनं यस्मात् स तथा ॥९३४॥

"निर्गुणः" ९३५ इति। निर्गता गुणाः-सत्त्वरजस्तमांसि यस्मात् स तथा ॥९३५॥

"निरञ्जनः" ९३६ इति। निर्गतमञ्जनम्-उपाधिरूपं यस्मात् स तथा ॥९३६॥

"निर्णयः" ९३७ इति। निः-निश्चयेन नीयते-प्राप्यते जनैरिति सः निर्णयः, निश्चयः; तद्रूप इति वा ॥९३७॥

"नित्यः" ९३८ इति। नियतं भावः-नित्यः, त्रैकालिकसत्तावान् इत्यर्थः ॥९३८॥

"नित्योदितः" ९३९ इति। नित्यं-प्रतिदिनमुदितः, अन्यग्रहवन्न कदाचिदप्यस्ताभिलाषीत्यर्थः ॥९३९॥

"नित्यगामी" ९४० इति। नित्यं-सर्वदा गन्तुं शीलमस्येति स तथा ॥९४०॥

"नित्यरथः" ९४१ इति। नित्यः-अकृत्रिमो रथः-यानं स्वरूपं वा यस्य स तथा। 'स्वरूपे स्यन्दने रथे ॥' इति मेदिनिः ॥९४१॥

"राजा" ९४२ इति। राजते-दीप्यते इति राजा, चतुर्णामाश्रमाणां तत्तत्कर्मप्रवर्तकत्वेन तदधिपतिरित्यर्थः ॥९४२॥

"राज्ञीप्रियः" ९४३ इति । राज्ञी-चन्द्रस्य स्त्री, तस्याः प्रियः-इष्टः; स्वपत्युः पुष्टिकारित्वात् । राज्ञी-औषधी, सा प्रिया यस्येति वा । 'आदित्यदिने राज्ञीपत्रैः सूर्ये पूजिते सर्वाणि कार्याणि सिध्यन्ति ॥' इति यामलादौ कथितत्वात् ॥९४३॥

"राज्ञीपतिः" ९४४ इति । इडासुषुम्णान्तश्चारिणी राज्ञी नाडी, तदधीश इति योगशास्त्रादावुक्तत्वात् ॥९४४॥

"ऋद्धिः" ९४५ इति । अर्धनम् ऋद्धिः, महासम्पत्स्वरूपत्वात् ॥९४५॥

"रुद्रः" ९४६ इति । रोदयति संहारकाले प्रजामिति रुद्रः ॥९४६॥

"रजः" ९४७ इति । रज्यते-अनुरज्यतेऽस्मिन् जन इति स तथा । सृष्टिसमये रजोगुणात्मकत्वाद् वा ॥९४७॥

"रुचिप्रदः" ९४८ इति । रुचिः-धर्माभिलाषः, तं प्रददातीति सः ॥९४८॥

"रविः" ९४९ इति । रूयते-स्तूयते लोकैरिति सः ॥९४९॥

"रोचिष्णुः" ९५० इति । रोचनशीलो रोचिष्णुः, निरन्तरं सर्वेषां रुच्यमानत्वात् ॥९५०॥

"रोगहा" ९५१ इति । रोगं हन्तीति रोगहा, सर्वामयोच्छेदककत्वात् ॥९५१॥

"रेणुः" ९५२ इति । रीयते-क्षीप्यते हिममिति रेणुः, त्रसरेणुरिति वा; सर्वस्यापि कार्यजातस्यादिभूतत्वात् ॥९५२॥

"रेणवः" ९५३ इति । रः-वह्निः, ईः-कामः, ताभ्यां नवः-स्तवो यस्य स तथा ॥९५३॥

"रेवन्तः" ९५४ इति । रेवन्तः-सूर्यपुत्रः, अश्वानामधिष्ठाता देवः, तज्जनकत्वात् तथा ॥९५४॥

"हृषीकेशः" ९५५ इति । हृषीकाणाम्-इन्द्रियाणाम्, ईशः-स्वामी । अथवेन्द्रियाणि वशे यस्य वर्तते स परमात्मा हृषीकेशः । जगत्प्रीतिकराः हृष्टाः

केशाः-रश्मयो यस्येति वा। तथा चोक्तम्—

'सूर्याचन्द्रमसोः शश्वदंशुभिः केशसंज्ञितैः।
बोधयन् स्थापयंश्चैव जगदुत्तिष्ठते पृथक्॥
बोधनात् स्थापनाच्चैव जगतो हर्षणं भवेत्।
अग्नीषोमकृतैरेवं कर्मभिः पाण्डुनन्दनः॥
हृषीकेशोऽहमीशानो वरदो लोकभावनः॥' इति॥९५५॥

''रक्षोघ्नः'' ९५६ इति। रक्षसो जातुधानान् हन्तीति स तथा, यज्ञलोपकारिराक्षसनाशक इत्यर्थः॥९५६॥

''रक्ताङ्गः'' ९५७ इति। रक्तं-रक्तवर्णम्, अङ्गम्-मण्डलमधिष्ठानं यस्य स तथा, उदया-ऽस्तमनयोस्तथा दर्शनात्॥९५७॥

''रश्मिमाली'' ९५८ इति। पञ्च भूतानि, षट् ज्ञानेन्द्रियाणि, पञ्च कर्मेन्द्रियाणि, एतानि जगदुत्पत्तौ रश्मिभूतानि, तेषां माला-परम्परा, साऽस्यास्तीति तथा॥९५८॥

''ऋतुः'' ९५९ इति। इयर्तीति ऋतुः, तत्प्रवर्तकत्वात्॥९५९॥

''रथाधीशः'' ९६० इति। रथाः-अवयवाः, तेषामीशः, प्राणिनामवयवनिर्मातेत्यर्थः। 'रथोऽप्यवयवे पुमान्॥' इति मेदिनिः॥९६०॥

''रथाध्यक्षः'' ९६१ इति। शरीरमेव रथः, तत्राध्यक्षः-प्रभुः, सर्वप्राणिनां शरीराधिष्ठातेत्यर्थः। ''रथः स्यात् स्यन्दने काये वरणे वेतसेऽपि च॥'' इति विश्वः॥९६१॥

''रथारूढः:'' ९६२ इति। रथे-स्यन्दने आरूढः रथारूढः॥९६२॥

''रथपतिः'' ९६३ इति। रथाः-महारथाः कर्णप्रभृतयः, तेषां पतिः-पाता॥९६३॥

''रथी'' ९६४ इति। रथोऽस्यास्तीति स्पष्टम्॥९६४॥

"रथिनांवरः" ९६५ इति। परमपदप्रापकतया रथः-ज्ञानम्, तद्वतां वरः-प्रधानः ॥९६५॥

"शाश्वतः" ९६६ इति। शश्वद्-निरन्तरं भवतीति स तथा ॥९६५॥

"शान्तप्रियः" ९६७ इति। शान्ताः-योगिनः, तेषां प्रियः, तद्ध्येयत्वात्। शान्ता-विरक्ताः प्रिया यस्येति वा ॥९६७॥

"साष्टाक्षरः" ९६८ इति। अष्टाक्षरेण-अष्टाक्षरात्मकमन्त्रेण सह वर्तते यः स तथा ॥९६८॥

"शुद्धः" ९६९ इति। शुंद्ध्यतीति शुद्धः, अविद्यानास्कन्दितत्वेन सच्चिदानन्दरूपत्वात् ॥९६९॥

"शुभः" ९७० इति। शुभः-सर्वकार्येषु मङ्गलभूतः ॥९७०॥

"शुभाचारः" ९७१ इति। शुभः-शोभनः आचारो यस्मात् स तथा, तत एवाचारप्रवृत्तेः ॥९७१॥

"शुभप्रदः" ९७२ इति। शुभम्-अभ्युदयं प्रकर्षेण ददातीति स तथा ॥९७२॥

"शुभकर्मा" ९७३ इति। शुभं-लोकोत्तरचमत्कारकारि कर्म यस्य स तथा ॥९७३॥

"शब्दकरः" ९७४ इति। शब्दं-वेदोच्चारलक्षणं करोति स तथा। शब्दं-कीर्तिं करोतीति वा। 'शब्दः कीर्तौ ध्वनावपि ॥' इति मेदिनिः ॥९७४॥

"शुभ्रः" ९७५ इति। शुभ्रगुणयोगात् सः, विशदमूर्तिरित्यर्थः ॥९७५॥

"शुचिः" ९७६ इति। शुचिः-निर्लेपो मलादिकालुष्यरहित इति यावत् ॥९७६॥

"शिवः" ९७७ इति। शेते जगदस्मिन्निति शिवः, मङ्गलहेतुत्वाद् वा ॥९७७॥

"शोभा" ९७८ इति। शोभा-कान्तिः, तद्धेतुत्वात् तन्नामता ॥९७८॥

"शोभनः" ९७९ इति। जगत् शोभयतीति शोभनः ॥९७९॥

"शूरः" ९८० इति। शूरः-विक्रान्तः, सत्त्वगुणोपेतत्वात् ॥९८०॥

"शीघ्रगः" ९८१ इति। शीघ्रं-त्वरितं गच्छतीति स तथा ॥९८१॥

"शीघ्रगतिः" ९८२ इति। शीघ्रं गतिः-गमनं यस्य स तथा, मङ्गलादिभ्यस्त्वरितगतिमत्त्वात् ॥९८२॥

"शीर्णः" ९८३ इति। शीर्यते तमोऽनेनेति स तथा ॥९८३॥

"शेषः" ९८४ इति। प्रलयानन्तरमेक एक शिष्यत इति शेषः ॥९८४॥

"शुक्रः" ९८५ इति। शुक्रः-अग्निः, तत्स्वरूप इत्यर्थः। 'शुक्रः स्याद् भार्गवे ज्येष्ठमासे वैश्वानरे पुमान् ॥' इति मेदिनिकारः ॥९८५॥

"शुक्राङ्गः" ९८६ इति। शुक्रं-वीर्यं अङ्गम्-अवयवं यस्य स तथा। शुक्रमङ्गे यस्मादिति वा ॥९८६॥

"शुक्ररूपः" ९८७ इति। शुक्रं-वीर्यं रूपयति-प्रेरयतीति सः, सूर्यनाडीद्वारात् तत्प्रवेशात् ॥९८७॥

"शक्तिमान्" ९८८ इति। शक्तिः-सामर्थ्यम्, तद्वान्। कर्तुमकर्तुमन्यथाकर्तुं समर्थ इत्यर्थः ॥९८८॥

"शक्तिमतांश्रेष्ठः" ९८९ इति। शक्तिः-पराक्रमः, तद्वतां श्रेष्ठः-अग्रणीरित्यर्थः ॥९८९॥

"शनैश्चरः" ९९० इति। शनैः-शीघ्राभावेन चरति-गच्छतीति स तथा। चन्द्रापेक्षया अल्पगतित्वात्, कारणे कार्योपचार इति वा ॥९९०॥

"शनैश्चरपिता" ९९१ इति। शनैश्चरः-शौरिः, तज्जनकत्वात् सः ॥९९१॥

"शम्भुः" ९९२ इति। शं-सुखं भवत्यस्माद् भक्तानामिति सः ॥९९२॥

"शर्वः" ९९३ इति। शृणोति-हिनस्ति पापमिति शर्वः ॥९९३॥

"श्रीधरः" ९९४ इति। श्रियं-शोभां धरतीति सः ॥९९४॥

"श्रीपतिः" ९९५ इति। श्रीः-परा शक्तिः, प्रकृतिरिति यावत्। तस्याः

पतिः-तत्प्रवर्तयितेत्यर्थः ॥९९५॥

''श्रेयस्करः'' ९९६ इति। अनपायसुखावाप्ति श्रेयः करोतीति सः ॥९९६॥

''श्रीकण्ठः'' ९९७ इति। दैत्यानां श्रियं कण्ठयतीति तथा। 'कठि-मठि शोषणे' इत्यस्य रूपम्। कण्ठलग्नलक्ष्मीक इति वा ॥९९७॥

''श्रीमान्'' ९९८ इति। नानाविधाः श्रियो विद्यन्ते यस्य स तथा ॥९९८॥

''श्रीमतांवरः'' ९९९ इति। ऋग्-यजुः-सामलक्षणा श्रीर्विद्यते येषां ते विरञ्च्यादयः, तेषां मध्ये वरः-प्रधानः ॥९९९॥

''श्रीनिवासः'' १००० इति। श्रियां निवासः-वसतिर्यस्मात् सः ॥१०००॥

। इति पादसाहश्रीअकब्बरजल्लालदीनसूर्यसहस्रनामाध्यापकश्रीशत्रुञ्जयतीर्थ-करमोचनाद्यनेकसुकृतविधापकमहोपाध्यायश्रीभानुचन्द्रगणिविरचितायां तच्छिष्याष्टोत्तरशतावधानसाधनप्रमुदितपादशाहश्रीअकब्बरप्रदत्तखुस्फहमा'ऽ-पराभिधान-महोपाध्यायश्रीसिद्धिचन्द्रगणिशोधितायां नवाबशेखश्रीअबुलफ-जलकारितायां चतुश्चत्वारिंशदधिकश्रीसूर्यसहस्रनामटीकायां दशमशतविवरणं समाप्तम् ॥

पूर्वप्रतिपादिताष्टोत्तरशतनामभ्यश्चतुःषष्टिनामान्यत्रैवान्तर्गतानि, चतुश्चत्वारिंशदवशिष्टानि। तानि च श्रीशाहेरादेशाद् नवाबशेख-श्रीअबुलफजलाभिधानैः सहस्रनाम्नामुपरि व्यवस्थापितानि। प्रसङ्गतस्तानि व्याख्यायन्ते—

''श्रीनिकेतनः'' १००१ इति। श्रियां-सम्पदां निकेतनं-गृहम्, अर्थाद् भक्तो जायते यस्मात् स तथा ॥१००१॥

''श्रेष्ठः'' १००२ इति। अतिशयेन प्रशस्यः-श्रेष्ठः, सर्वोत्तम इत्यर्थः ॥१००२॥

''शरण्यः'' १००३ इति। संसारसागरादुत्तितीर्षूणां भयनाशकत्वात्

शरण्यः ॥१००३॥

"शरण्यार्तिहरः" १००४ इति । शरणागतानामर्तिं-पीडां हरतीति तथा ॥१००४॥

"श्रुतिमान्" १००५ इति । श्रुतयः-वेदा विद्यन्ते यस्य स तथा ॥१००५॥

"शतबिन्दुः" १००६ इति । शतं बिन्दवः-प्रभावा यस्य स तथा ॥१००६॥

"शतमुखः" १००७ इति । एकस्य वस्तुनः शतं मुखानि-उपाया उत्पादनप्रकारा यस्य स तथा । 'मुखमुपाये प्रारम्भे श्रेष्ठे निःसरणाऽऽस्ययोः ॥' इत्यनेकार्थः ॥१००७॥

"तापी" १००८ इति । तापः-प्रभावः शत्रुदमनकारी, सोऽस्यास्तीति तथा ॥१००८॥

"तापनः" १००९ इति । तापयति शत्रूनिति स तथा ॥१००९॥

"तारापतिः" १०१० इति । ताराणां-नक्षत्राणां पतिः-स्वामी ॥१०१०॥

"तार्क्ष्यवाहनः" १०११ तार्क्ष्यं-पद्मं वाहयति-प्रकाशेन युनक्तीति तथा । 'तार्क्ष्यो ना गरुडे युद्धे, कमले स्यान्नपुंसकम् ॥' इति धरणिः । तार्क्ष्येण-अरुणेन ऊह्यते इति वा । 'तार्क्ष्यः खगेश्वरे सूरसूते स्यन्दन-वाजिनोः ॥' इति मेदिनिः ॥१०११॥

"तपनः" १०१२ इति । तपतीति तपनः, सर्वदा प्रकाशस्वरूप इत्यर्थः ॥१०१२॥

"तपतांवरः" १०१३ इति । तपतां-ज्योतिष्मतां वरः-श्रेष्ठ इत्यर्थः ॥१०१३॥

"त्वरमाणः" १०१४ इति । त्वरयते इति त्वरमाणः ॥१०१४॥

"त्वष्टा" १०१५ इति । त्वक्ष्णोतीति त्वष्टा, तत्तत्कर्मोपदेशकत्वात् ॥१०१५॥

"त्विषामीशः" १०१६ इति । त्विषां-प्रभाणामीशः-स्वामी ॥१०१६॥

"तेजः" १०१७ इति । तेजयतीति तेजः, सर्वदा तद्रूपत्वात् ॥१०१७॥

''तेजसांपतिः'' १०१८ इति। तेजसां-प्रभावाणां पतिः-स्वामी ॥१०१८॥

''तेजसांनिधिः'' १०१९ इति। तेजसां-दीप्तीनां निधिः-आधारभूतः। 'सर्वतेजोनिधिः सूर्यः ॥' इति पुराणोक्तेः ॥१०१९॥

''तेजस्वी'' १०२० इति। तेजः-प्रकाशो विद्यते यस्य स तथा ॥१०२०॥

''तेजोनिधिः'' १०२१ इति। तेजांसि-वीर्याणि, तेषां निधिः-आकरः। 'तेजो दीप्तौ प्रभावे च स्यात् पराक्रम-रेतसोः ॥' इति मेदिनीकारः ॥

''तेजोराशिः'' १०२२ इति। तेजसां-प्रकाशानां राशिः-समूहो यस्मिन् स तथा ॥१०२२॥

''तेजोनिलयः'' १०२३ इति। तेजसां-पुण्यानां निलयः-गृहम्। ''सुकृतेऽपि भवेत् तेजः ॥'' इति मेदिनिः ॥१०२३॥

''तीव्रः'' १०२४ इति। तीव्रः-दुःसहप्रतापः ॥१०२४॥

''तीक्ष्णदीधितिः'' १०२५ इति। तीक्ष्णा दीधितयः-किरणा यस्य स तथा ॥१०२५॥

''तीर्थम्'' १०२६ इति। तीर्यते संसारसागरमनेनेति तीर्थम्। सर्वेषां धर्मोपदेशकत्वेन तीर्थं गुरुरिति वा। 'निपाना-ऽऽगमयोस्तीर्थमृषिजुष्टजले गुरौ ॥' इत्यमरः ॥१०२६॥

''तिग्मांशुः'' १०२७ इति। तिग्माः-तीक्ष्णाः अंशवः-किरणा यस्य स तथा ॥१०२७॥

''तिमिस्रहा'' १०२८ इति। तिमिस्रम्-अन्धकारं हन्तीति तथा ॥१०२८॥

''तमः'' १०२९ इति। विषयवासितान्तःकरणानां हृदि तद्रूपतयाऽपरिस्फुरणात् तमः तमोरूप इत्यर्थः ॥१०२९॥

''तमोहरः'' १०३० इति। तमः अर्थादज्ञानं हरतीति तथा ॥१०३०॥

''तमोनुदः'' १०३१ इति। तमः-पापं नुदति-प्रेरयति स तथा ॥१०३१॥

"तमोऽरातिः" १०३२ इति। तमः-पैशून्यम्, तस्य अरातिः-शत्रुः। 'कौटिल्याज्ञानपैशून्यविषयेषु भवेत् तमः॥' इति मेदिनिः॥१०३२॥

"तमघ्नः" १०३३ इति। तमः-राहुं हन्तीति तथा। 'राहौ ध्वान्ते गुणे तमः॥' इत्यमरः॥१०३३॥

"तिमिरापहः" १०३४ इति। तिमिरं-नेत्ररोगविशेषः, तमपहन्तीति तथा॥१०३४॥

"त्रिविक्रमः" १०३५ इति। त्रिषु लोकेषु विक्रमः-सामर्थ्यं यस्य स तथा॥१०३५॥

"त्रिविष्टपः" १०३६ इति। त्रिविष्टपं-भुवनत्रयम्, तज्जनकत्वात् तथा॥१०३६॥

"त्रयः" १०३७ इति। त्रिगुणात्मकत्वेन त्रिरूपत्वात्॥१०३८॥

"त्रेता" १०३८ इति। अग्नित्रितयात्मकत्वात्॥१०३८॥

"त्रिकसंस्थितः" १०३९ इति। त्रिकः-संस्थानविशेषः, तस्मिन् संस्थितः। त्रिकं-सत्त्वरजस्तमोलक्षणम्, तत्र संस्थित इति वा॥१०३९॥

"त्र्यक्षरः" १०४० इति। अकारोकारमकारात्मकः। त्रिभिः-ब्रह्मादिभिरक्षर इति वा॥१०४०॥

"त्रिलोचनः" १०४१ इति। त्रिषु—सृष्टि-स्थिति-प्रलयेषु लोच्यते-दृश्यते जनैरिति स तथा। त्रिषु लोकेषु लोचनं-ज्ञानं यस्येति वा॥१०४१॥

"त्रिलोकेशः" १०४२ इति। त्रयाणां लोकानामीशः-स्वामी। यद्वा लोकते ज्ञानेन सर्वमिति लोकाः, ब्रह्म-विष्णु-महेश्वराः। त्रयश्च ते लोकाश्च तेषामीश्वरः तत्तत्कार्यप्रेरकत्वात्॥१०४२॥

"तरणिः" १०४३ इति। तीर्यते संसारसागरमिति तथा॥१०४३॥

"त्र्यम्बकः" १०४४ इति। त्रीणि अम्बकानि-चिह्नानि महदैश्वर्यसूचकानि

नित्यज्ञानेच्छाप्रयत्नरूपाणि यस्य स तथा । 'अम्बकः पुंसि चिह्ने स्यात् ॥' इति धरणिः ॥१०४४॥

यत्कान्त्या विरलीकृतं नहि तमः कुत्रापि संलक्ष्यते,
यद्ध्यानामृतचारुसिक्तमनसां नैवापदः कुत्रचित् ।
जायन्ते यदुपासनात् करगताः सर्वाः सतां सम्पदः,
स श्रीमान् दिवसप्रभुः प्रतिदिनं पुष्णातु वो वाञ्छितम् ॥१॥

प्रत्यूषे करिणां कपोलफलके सिन्दूरपूरोपमः,
पृथ्व्याः प्रोन्नतपर्वतस्तनतटे सत्कुङ्कुमालेपवत् ।
कुञ्जेषु प्रतिशाखिपल्लवगणभ्रान्तिं समुत्पादयन्,
ध्वान्तारण्यधनञ्जयस्य तरणेर्भासां च यो भासते ॥२॥

आयामं वियतोऽङ्गुलीभिरतुलं को वा मिमीते जनो ?,
गङ्गायाः सिकताकणान् गणयितुं को वा समर्थः पुमान् ? ।
कः क्षीरोदधिजीवनस्य पृषतां संख्यां समासादयेत् ?,
तद्वद् गोत्रपरम्परां भगवतो वक्तुं न कोऽपि क्षमः ॥३॥

शोभापूरितसूरिहीरविजयस्यासीद् गणे पाठक-,
प्रष्ठः श्रीसकलादिचन्द्रचरमः श्रीसूरचन्द्रस्ततः ।
तच्छिष्योऽस्ति समस्तवाचकपतिः श्रीभानुचन्द्राभिधस्-,
तेनेदं विवृतं मुदा दिनमणेर्नाम्नां सहस्रं स्फुटम् ॥४॥

॥ इति प्रशस्तिः ॥

॥ इति पादसाहश्रीअकबरसूर्यसहस्रनामाध्यापकश्रीशत्रुञ्जयतीर्थकरमोचनाद्यनेकसुकृतविधापकमहोपाध्यायश्रीभानुचन्द्रगणिविरचितायांछष्याष्टोत्तरशतावधानसाधनप्रमुदितपादसाहश्रीअकबरप्रदत्त'खुस्फहमा'ऽपराभिधानमहोपाध्यायश्रीसिद्धिचन्द्रगणिशोधितायां नवाबशेखश्रीअबुलफजलकारितायां सूर्यसहस्रनामटीकायां चतुश्चत्वारिंशदधिकश्रीसूर्यसहस्रनामटीका समाप्ता ॥

श्रीहेमविजयगणिविरचितः

# श्रीसूर्यसहस्रनामसङ्ग्रहः

॥ ऐं नमः ॥

सिद्धार्थजातो भगवान् ,जगच्चक्षुः श्रियेऽस्तु वः ।
पन्थाः प्रकाश्यते दीप्रैर्यद् गवां निवहैः शिवः ॥१॥
कलयामासुरुल्लासं, यतः सुमनसां व्रजाः ।
स समस्तं  तमःस्तोमं, हन्तु मित्रोदयः सदा ॥२॥
भास्वान् रविरिनः सूर्यः, सूरः शूरः शुचिः खगः ।
हेलिर्हंसो हरिर्भानुश्चित्रभानुरहर्पतिः ॥३॥
तपनस्तरणिस्त्वष्टा, तापनः सविताऽर्यमा ।
अरुणः किरणस्तिग्मकिरणः कान्तिमान् भगः ॥४॥
दिवसेशो दिनाधीशो, दिवामणिरहर्मणिः ।
दिननाथो दिनस्वामी, दिनेशिता दिनेश्वरः ॥५॥
दिनरत्नं दिवारत्नमभ्ररत्नं नभोमणिः ।
व्योमरत्नं नभोरत्नं, घस्ररत्नं वियन्मणिः ॥६॥
विहायोरत्नमुष्णांशुर्विहायोमणिरुष्णभाः ।
महाधैर्यो महाखेशो, गभस्तिर्गगनध्वजः ॥७॥
वियत्केतुर्नभःकेतुरंशुमानंशुरंशुराट् ।
खररश्मिरशीतांशुरशीतार्चिर्विरोचनः ॥८॥
तमोरिपुस्तमोध्वंसी, तमःशत्रुस्तमोऽसुहृत् ।
मित्र-मार्ताण्डि-मार्तण्ड-तमोराति-तमोऽहिताः ॥९॥
भानुमाली महोमाली, रश्मिमाली खरद्युतिः ।
खरार्चिः खररुग् घर्मरश्मिः सहस्रदीधितिः ॥१०॥
दिनबन्धुर्दिवाबन्धुर्दिनमित्रं दिवासुहृत् ।

दिवामित्रमहर्बन्धुरहर्मित्रमशीतगुः ॥११॥
खरपादः खरज्योतिः, खरभानुः खरप्रभः ।
खररोचिः खरपृश्निः, खरधामा खरच्छविः ॥१२॥
खरदीप्तिः खराभीशुः, खरोस्रः खरदीधितिः ।
खरकेतुः खरकान्तिः, खरभा भास्करः कपिः ॥१३॥
॥इति सूर्यसहस्रनामसङ्ग्रहे प्रथमः प्रकाशः ॥
आदित्यो दीप्तिमानर्कः, प्रपीः पीथः सदागतिः ।
विभावानुस्रवान् ब्रध्नः, पादवानहिमद्युतिः ॥१॥
रोचिष्मान् रूचिमान् पूषा, शोचिष्मानुष्णदीधितिः ।
ज्योतिष्मान् शुचिमान् गोमानर्चिष्मानहिमच्छविः ॥२॥
केतुमान् घृणिमान् घर्ममरीचिर्वासरेश्वरः ।
मरीचिमानुष्णभानुः, प्रग्रहवानभीशुमान् ॥३॥
रश्मिमान् पृश्निमानुष्णकान्तिर्वासरनायकः ।
दीधितिमानशीतत्विड्, द्युतिमानहिमत्विषिः ॥४॥
छविमांस्त्विषिमान् भावान्, प्रभावान् भानुकेसरः ।
वास्रराड् वसुमान् गोराड्, गभस्तिमान् मयूखवान् ॥५॥
तीव्रभानुरुष्णदीप्तिरुष्णोपधृतिरुष्णरुक् ।
उष्णरोचिरुष्णशोचिरुष्णपृश्निः सहस्रभः ॥६॥
शीतेतरांशुरुष्णद्युदुष्णकेतु-र्द्युकेतनः ।
उष्णच्छविरुष्णधामा, घर्मधामा विभावसुः ॥७॥
भानेमिः कर्णसूर्ब्रह्मा, घर्मदीधितिरुष्णभः ।
घर्मरोचिर्घर्मशोचिरहस्करो-ऽम्बुतस्करः ॥८॥
घर्मोस्रो घर्मकिरणो, घर्मकेतुर्दिवाकरः ।

द्वादशात्मा घर्मघृणिर्घर्मांशुरहिमप्रभः ॥९॥
घर्माभीशुर्घर्मभानुर्घर्मपादः प्रभाकरः ।
घर्मच्छविर्घर्मदीप्तिर्घर्मपृश्निर्विभाकरः ॥१०॥
घर्मज्योतिर्घर्मकान्तिर्घर्मद्युतिरशीतरुक् ।
घर्मत्विषिर्घर्मतेजाः घर्मार्चिस्तिग्मदीधितिः ॥११॥
विनतातनुभूसूतो, विनतासुतसारथिः ।
विनतागात्रसम्भूतो, विनतात्मजसारथिः ॥१२॥
॥ इति सूर्यसहस्रनामसङ्ग्रहे द्वितीयः प्रकाशः ॥
जगच्चक्षुर्जगद्दीपो, जगत्साक्षी विकर्तनः ।
त्रयीतनुः कर्मसाक्षी, मिहिरोऽरुणसारथिः ॥१॥
खतिलकः सहस्रांशुर्लोकबन्धुर्नभोध्वजः ।
संवत्सररथो वेदोदयः सूनुः सुरावृतः ॥२॥
लोकप्रकाशनः पीतुंः, सहस्राङ्कः सहसभाः ।
प्रत्यूषाण्डं दिवापुष्टो, दशानो रात्रिनाशनः ॥३॥
विवस्वान् कालभृद् वाजी, बहुरूपो हरिद्हरिः ।
हरिदश्वो हरित्सप्तिर्हरिद्वाजी हरिद्हयः ॥४॥
हरिदर्वा हरिद्वातिर्हरित्तार्क्ष्यो दिनाधिपः ।
तिग्मरोचिस्तिग्मशोचिस्तिग्मभानुर्नभोध्वजः ॥५॥
तिग्मांशुस्तिग्मरुक् तिग्मज्योतिस्तिग्ममहाअविः ।
तिग्मोस्रस्तिग्मभास्तिग्मकेतुः कमलबान्धवः ॥६॥
तिग्मार्चिस्तिग्मगुस्तिग्ममयूखः कजबान्धवः ।
तिग्मपादस्तिग्मरश्मिस्तिग्मत्विट् पद्मबान्धवः ॥७॥
तिग्मोपधृतिरर्चीराट् तिग्माभीशुर्महःपतिः ।

प्रद्योतनः पतङ्गः कस्तिग्मद्युत् पद्मिनीसुहृत् ।।८।।
तीव्रगुस्तिग्मभस्तिग्मदीप्तिस्तमःपरः ।
तिग्मतेजास्तिग्मधामा, तिग्मपृष्णिस्तमोद्विषन् ।।९।।
तिग्मकरस्तीव्रपादस्तिग्मद्युतिरहःप्रभुः ।
तिग्मत्विषिस्तिग्मवसुस्तिग्मच्छविरहःप्रियः ।।१०।।
तिग्मप्रभस्तिग्मघृणिः खमणिर्गगनाध्वगः ।
व्योमाध्वगो वियत्पान्थो द्युमणिर्द्युपतिर्द्युराट् ।।११।।
नभोऽध्वन्यो नभःपान्थो, व्योमकेतुरहःसखः ।
अभ्राध्वन्यो-ऽभ्रपथिको, खाध्वनीनो-ऽशुनायकः ।।१२।।
।। इति सूर्यसहस्रनामसङ्ग्रहे तृतीयः प्रकाशः ।।
सहस्रोस्रः सहस्रद्युत्, सहस्रार्चिः सहस्रगुः ।
अहिमदीधितिरिन्द्रः, सहस्रत्विट् सहस्ररुक् ।।१।।
द्युरत्नं दिसवसपतिर्व्योमध्वजो-ऽम्बराध्वगः ।
व्योमपान्थो-ऽम्बरमणिर्व्योमाध्वन्यो दिनाधिशः ।।२।।
अभ्रकेतुरभ्रपान्थो, द्युराजो-ऽम्बरकेतनः ।
अभ्रध्वजो-ऽम्बराध्वन्यो, द्युनायको वियद्ध्वजः ।।३।।
नभोध्वनीनो द्युस्वामी, खपान्थो-ऽभ्रपथध्वजः ।
दिवास्वामी दिवाभर्ता, दिवासूर्यो दिवापतिः ।।४।।
दिवानेता दिवाराजो दिवाधिपो दिवाप्रभुः ।
दिवानाथो दिवाधीशो दिवाधिभूर्दिवाविभुः ।।५।।
वासरेन्द्रो दिनमणिर्वासरेशो दिनप्रभुः ।
दिनराड् गगनाध्वन्यो दिवाराड् व्योमकेतनः ।।६।।
दिवस्वामी दिवमणिर्दिवनाथो दिवप्रभुः ।

द्विनेता दिवभर्ता दिवेशोऽभ्रपथाध्वगः ॥७॥
दिवरत्नं वियद्ररत्नं, द्योरत्नं दिवसप्रभुः ।
द्योपान्थो दिवसस्वामी, द्योकेतुर्दिननायकः ॥८॥
दिनेन्द्रो दिवसाधीशो, दिवेन्द्रो दिवसाधिपः ।
द्योमणिर्गगनरत्नं, दिवेनो वियदध्वगः ॥९॥
द्योदेशिको द्योपथिको, द्योध्वजोऽभ्रपथाध्वगः ।
दिवेशिता द्युपथिको, द्योध्वनीनो दिवेश्वरः ॥१०॥
आकाशकेतुर्घस्रेशो-ऽम्बररत्नं महर्विभुः ।
अनन्तकेतुर्घस्रेन्द्रो-ऽम्बरकेतुर्दिनाधिभूः ॥११॥
घस्रेश्वरो घस्रराजो, घस्रभर्ता दिवाधिराट् ।
घस्रनेता घस्रपतिर्घस्रेनो घस्रनायकः ॥१२॥
घस्रेशिता घस्रविभुर्घस्रस्वामी खकेतनः ।
घस्राधिपो घस्रमणिर्घस्रनाथो हरीश्वरः ॥१३॥
सुधाशनपथाध्वन्यो, नक्षत्रसरणिध्वजः ।
कलिन्दनन्दनातातः, कलिन्दतनयापिता ॥१४॥
॥ इति सूर्यसहस्रनामसङ्ग्रहे चतुर्थः प्रकाशः ॥
अगो दशशतज्योतिर्भेशो दशशतद्युतिः ।
सहस्रधामाऽ-र्चिरीशः, सहस्रकेतुरंशुपः ॥१॥
प्रजापतिः प्रभामाली, धर्मतातो यमीपिता ।
धर्मवप्ता विश्वकर्मा, धर्मबप्पो हरिद्विभुः ॥२॥
धर्मबीजी यमीबीजी, हरिबीजी हरिप्रभुः ।
हरितातो धर्मपिता, हरिसूः सूर्यजापिता ॥३॥
हरिबप्पो हरिन्नेता, धर्मसूर्यमुनापिता ।

यमीसूर्हरितांनाथो, हरिद्भर्ता रुचांपतिः ॥४॥
दण्डयामपतिश्चित्ररथ-पुष्करबान्धवः ।
वास्ररत्नं वास्रमणिर्वास्रराजो-ऽर्कभूपिता ॥५॥
तमोदस्युस्तमोद्वेषी, तमोवैरी तमोन्तकृत् ।
ध्वान्तारिस्तिमिरारातिर्ध्वान्तध्वंसी तमोऽप्रियः ॥६॥
ध्वान्तशत्रुस्तमोदुर्हृत्, ध्वान्तद्विट् तिमिरासुहृत् ।
ध्वान्तद्वेषी तमिस्रारिर्ध्वान्तदस्युस्तमोन्तकः ॥७॥
ध्वान्तजिद् ध्वान्तमथनस्तमोभित्तिमिरान्तकः ।
ध्वान्तारातिस्तमोऽमित्रस्तमोद्विट् तिमिराहितः ॥८॥
ध्वान्तभिद् धर्मजनको, वास्रेशो हरिदीश्वरः ।
ध्वान्तघाती ध्वान्तदुर्हृत्, तमोहृत् तिमिरद्विषत् ॥९॥
दण्डयाममणिर्दण्डिजनको वास्रनायकः ।
दण्डयामाधिपो वास्राधिपतिस्तिमिरान्तकृत् ॥१०॥
द्युतिमाली विभामाली, गोर्मालीहरितामिनः ।
कान्तिमाली केतुमाली, दिनकृद् हरितांप्रभुः ॥११॥
शुचिमाली दिनकरस्त्विड्माली हरितांविभुः ।
घृणिमाली दिवकरो, द्युन्माली हरितांपतिः ॥१२॥
अंशुमाली पृश्निमाली, रुग्माली दिवबान्धवः ।
पृष्णिमाली वृष्णिमाली नलिनीजीवितेश्वरः ॥१३॥
॥ इति सूर्यसहस्रनामसङ्ग्रहे पंचमः प्रकाशः ॥
ग्रहनाथो ग्रहस्वामी, ग्रहेशो ग्रहनायकः ।
ग्रहनेता ग्रहपतिर्ग्रहभर्ता ग्रहेशिता ॥१॥
ग्रहेश्वरो ग्रहविभुर्ग्रहार्यो ग्रहपुङ्गवः ।

ग्रहाधिपो ग्रहपुषो ग्रहाधिभूर्ग्रहप्रभुः ॥२॥
ग्रहराजो ग्रहाधीशो, ग्रहेन्द्रो दिनबान्धवः ।
रोचिःपतिः शुचिस्वामी, शोचिरीशोऽर्चिरीश्वरः ॥३॥
उस्रस्वामी रुचिस्वामी, रुचिभर्ता रुचीश्वरः ।
रुचिनेता रुचिप्रेयान् रुचिराजो रुचिप्रभुः ॥४॥
रुचिकान्तो रुचामीशो, रुचांनाथो रुचांविभुः ।
रुचांभर्ता रुचांनेता, रुचामिन्द्रो रुचामिनः ॥५॥
रुचांस्वामी रुचांप्रेयान्, रुचांकान्तो रुचांप्रभुः ।
रुचीशिता रुचांराजो, रुक्प्रेयान् रुचिवल्लभः ॥६॥
रुचीशो रुचिरमणो, रुग्भर्ता रुचिनायकः ।
उस्रेशः शौचिषांनाथः, शुचीशो रोचिषांपतिः ॥७॥
गोस्वामी गोःपतिः कान्तिप्रणयी ज्योतिषांपतिः ।
ज्योतिरीशो गवामीशो, गवांस्वामी गवांपतिः ॥८॥
अंशुस्वामी करस्वामी, कराधीशः करप्रभुः ।
अर्चिनाथोऽर्चिषांनाथः, शुचिनाथः शुचिप्रियः ॥९॥
धामेशो महसामीशो, दीप्तीशो दीप्तिवल्लभः ।
घृणिप्रेयान् घृणिस्वामी, घृणिनाथो घृणिप्रियः ॥१०॥
घृणीशो घृणिरमणस्त्विषीशः प्रग्रहप्रभुः ।
द्युतीशः प्रग्रहस्वामी, प्रभेशः प्रग्रहाधिपः ॥११॥
विभेन्द्रः प्रग्रहाधीशो, गवीशः प्रग्रहेश्वरः ।
गभस्तीशस्त्विषामीशो मरीचीशस्त्विषांपतिः ॥१२॥
कलिन्दपुत्री सविता पवमानपथध्वजः ।
अब्जिनीजीविताधीशः, सरसीरुहबान्धवः ॥१३॥

॥ इति सूर्यसहस्रनामसङ्ग्रहे षष्ठः प्रकाशः ॥

पृष्ठिमान् हरितामर्यः, पृष्टिराट् पृष्णिवल्लभः ।
पृष्णीशो हरितांस्वामी पृष्णियो वास्रबान्धवः ॥१॥
हेतिमानर्चिषामीशो, हेतिनाथोऽर्चिषांपतिः ।
घर्महेतिर्द्युतामीशः, खरहेतिर्द्युतामिनः ॥२॥
उष्णहेतिश्छविस्वामी, हेतिराजोऽर्चिषांप्रभुः ।
उष्णभासो घर्मभासो, भासेशो भासवल्लभः ॥३॥
भासांभर्ता त्विषांनेता, भासांनाथो महोऽधिभूः ।
भासांप्रेयांस्त्विषांप्रेयान्, भासांकान्तत्विषामिनः ॥४॥
वृष्णिमांस्तेजासामीशो, वृष्णिराट् तेजसांपतिः ।
वृष्णीशस्तेजसांस्वामी वृष्णीन्द्रस्तेजसांप्रभुः ॥५॥
तेजोधिपश्छविप्रेयांस्तेजोनाथश्छवीशिता ।
तेजोधीशस्त्विषांकान्तस्तेजोभर्ता छवीश्वरः ॥६॥
द्युतांस्वामी द्युतांभर्ता, द्युतांप्रेयान् द्युतांपतिः ।
द्युतांनेता द्युतामर्यो, द्युतांराजो द्युतांविभुः ॥७॥
रश्मीशो दीधितिस्वामी, रश्मीन्द्रो दीधितिप्रभुः ।
धामराट् किरणस्वामी, धामार्यः किरणाधिपः ॥८॥
विभेशः किरणाधीशो, विभाप्रेयान् कराधिपः ।
विभाभर्ता करकान्तो, विभाकान्तः करेश्वरः ॥९॥
विभानेता विभाराजः, प्रभाप्रेयान् प्रभाप्रियः ।
प्रभार्यः किरणपतिः, प्रभाकान्तः प्रभापतिः ॥१०॥
प्रभाभर्ता प्रभास्वामी, प्रभाराट् किरणेश्वरः ।
प्रभानेता प्रभाधीशः, प्रभेनः केतुनायकः ॥११॥

छविकान्तो महःस्वामी, द्युतांकान्तो द्युतांप्रभुः ।
पादाधीशः करभर्ता, करराजः करेशिता ॥१२॥
सरसीरुहिणीप्रेयान्, शिशिरेतरदीधितिः ।
सुपर्वपदवीपान्थो, नक्षत्रनिगमध्वजः ॥१३॥
॥ इति सूर्यसहस्रनामसङ्ग्रहे सप्तमः प्रकाशः ॥
सप्तसप्तिरयुक्सप्तिः, सप्तवाहः कुमुद्रिपुः ।
सप्तवीतिरयुग्वाजी, सप्तवाजी कुमुत्परः ॥१॥
सप्ताश्वः कुमुदारातिः, सप्तताक्ष्यः कुमुद्विषत् ।
सप्तार्वा कुमुदद्वेषी, सप्तहेषी दिवासखः ॥२॥
कुमुच्छत्रुरयुग्वाहः, कुमुद्दस्युरयुग्हयः ।
कुमुदद्विद् सप्ततुरगोऽसमाश्वः सप्तपाकलः ॥३॥
अयुग्हरिरयुक्कुण्डी, शुष्मं सप्तप्रकीर्णकः ।
सप्तहंसः कुमुद्वैरी, सप्तकिण्वी महःशयः ॥४॥
अयुग्हंसो दिनस्निग्धो, महेशः सप्तकेशरी ।
सप्तप्रोथी दिवस्निग्धोऽ-समसप्तिर्महोधिपः ॥५॥
अयुग्वीतिरयुक्प्रोथी, द्युसखोऽसमकेसरी ।
अयुक्केसर्यहस्निग्धोऽसमार्वाऽसमपाकलः ॥६॥
सप्तकुण्डी दिवास्निग्धोऽ-समकिण्वी महाधिभूः ।
अयुगश्वोऽम्बुरुट्स्निग्धोऽसमवाहो महेशिता ॥७॥
अयुगर्वा द्युवयस्यो समवीतिर्महेश्वरः ।
अयुग्हेषी महाधीशोऽसमहंसो महःशमः ॥८॥
अयुक्किण्वी दिनसखोऽसमप्रोथी विभाशमः ।
अयुक्ताक्ष्यो महनेता, समताक्ष्यो महःप्रभुः ॥९॥

अयुगेकशफः सप्ततुरङ्गो शिशिरद्युतिः ।
महेन्द्रोऽसमतुरगो समवाजी महःप्रभुः ॥१०॥
असमैकशफः सप्तहयोऽसमतुरङ्गमः ।
शोचिःकरः प्रभापाणिरुस्रपाणिर्घृणीश्वरः ॥११॥
शोचिःपाणिरंशुहस्तो, रोचिःपाणिर्द्युबान्धवः ।
धामहस्तः प्रभाहस्तः केतुहस्तः पटुप्रभः ॥१२॥
समेतरहरिः सप्तहरिः सप्ततुरङ्गमः ।
अद्रिरम्भोजिनीनाथोऽभोजिनीशोऽब्जिनीप्रियः ॥१३॥
॥ इति सूर्यसहस्रनामसङ्ग्रहे अष्टमः प्रकाशः ॥
गोहस्तः किरणकरः, केतुपाणिर्दिवध्वजः ।
गोपाणिः किरणपाणिरंशुपाणिर्दिवाध्वगः ॥१॥
ज्योतिःकरो दिवाध्वन्यो ज्योतिर्हस्तोऽब्जबान्धवः ।
ज्योतिपाणिर्विभापाणिरर्चिर्हस्तोऽब्जिनीपतिः ॥२॥
घृणिपाणिर्घृणिहस्तः पृश्निपाणिर्मयूखराट् ।
पृश्निहस्तः पृष्णिकरः, पृष्णिपाणिरहःसुहृत् ॥३॥
पृष्णिहस्तः पृष्णिकरो, वृष्णिपाणिरशीतनः ।
वृष्णिहस्तो वृष्णिकरो, रश्मिहस्तोऽजडद्युतिः ॥४॥
रश्मिपाणी रश्मिकरस्त्विट्करः पद्मिनीप्रियः ।
द्युतिपाणिर्द्युतिकरो, द्युतिहस्तो जडत्विषिः ॥५॥
भानुपाणिर्भानुकरो, भानुहस्तो जडप्रभः ।
चण्डशोचिश्चण्डरोचिश्चण्डोस्रश्चण्डदीधितिः ॥६॥
.......................................... ।
..........................................॥७॥

चण्डांशुश्चण्डकिरणश्चण्डार्चिश्चण्डभाः ।
.......................... कोकबान्धवः ॥८॥
चण्डद्युतिश्चण्डकेतुश्चण्डद्युत् पद्मिनीधवः ।
चण्डत्विषश्चण्डभासश्चण्डत्विड् नलिनीप्रियः ॥९॥
चण्डच्छविश्चण्डवसुश्चण्डभोऽम्बुजबान्धवः ।
चण्डतेजाश्चण्डप्रभोऽब्जिनीधवः ॥१०॥
चण्डहेतिश्चण्डकान्तिः, सुरपद्धतिकेतनः ।
बहुकोज्योतिरम्भोजबन्धुरम्भोजिनीधवः ॥११॥
तीक्ष्णांशुस्तीक्ष्णकिरणस्तिक्ष्णार्चिस्तीक्ष्णदीधितिः ।
तीक्ष्णधामा, तीक्ष्णतेजास्तीक्ष्णोस्रस्तीक्ष्णप्रग्रहः ॥१२॥
धरणोऽंभोजिनीप्रेयान् दिविषत्पदवीमणिः ।
समीरपदवीरत्नं, समीरपथकेतनः ॥१३॥
॥ इति सूर्यसहस्रनामसङ्ग्रहे नवमः प्रकाशः ॥
निर्मोकमणिरम्भोजसवयास्तीव्रदीधितिः ।
पद्ममित्र-पद्मबन्धुः, सरसीरुहिणीप्रियः ॥१॥
सरोजमित्रमम्भोजपाणिः पङ्कजिनीप्रियः ।
सरोरुहकरः पद्मकरः पुष्करिणीप्रियः ॥२॥
तमोनुत्तिमिरध्वंसी नलिनीप्राणवल्लभः ।
वरुणः किरणप्रेयान् पद्मिनीहृदयेश्वरः ॥३॥
निर्मोकरत्नमम्भोजकरः कमलिनीश्वरः ।
कोकबन्धुः सरोजन्मबन्धुः पङ्कजबान्धवः ॥४॥
चक्रबन्धुः पयोजन्मबन्धुश्चक्राङ्गबान्धवः ।
आशुगः सरसीजन्ममित्रमम्भोजबान्धवः ॥५॥

भासन्तः पद्मिनीप्राणप्रियः पङ्कजिनीपतिः ।
कोकमित्रं सरोजातमित्रं पाथोजिनीप्रियः ॥६॥
पद्मिनीप्रणयी पद्मसुहृद् वारिजिनीप्रियः ।
असुरः सरसीजातमित्रं नीरजिनीवरः ॥७॥
कञ्जारोम्भोजिनीभर्ता किशोरोम्बुजिनीपतिः ।
पानीयरुहवयस्यः सुपर्णाग्रजसारथिः ॥८॥
पद्मिनीरमणः पद्मसवयाः मुर्मुरेश्वरः ।
अब्जिनीदयितः कोकवयस्यो बिसिनीप्रियः ॥९॥
बिसिनीप्रणयी पद्मसखः पाथोजिनीपतिः ।
नलिनीप्रणयी चक्रसखस्तोयजबान्धवः ॥१०॥
पद्मिनीशः पयोजन्मबान्धवोम्बोजिनीवरः ।
अब्जिनीशः सरोजन्मबान्धवोऽम्बुजिनीधवः ॥११॥
नलिनीशोम्बुजस्निग्धः कजस्निग्धोऽब्जिनीवरः ।
राजीवबन्धुरम्भोजसुहृज्जलजबान्धवः ॥१२॥
अरविन्दसुहृत् कोकसुहृत् पुष्करिणीधवः ।
बिसिनीशोऽब्जिनीजानिः पानीयरुहिणीपतिः ॥१३॥
पानीयरुहिणीप्रेयान् पद्मस्निग्धोऽब्जिनीश्वरः ।
शतपत्रसुहृत् पीथजन्मस्निग्धोऽब्जिनीप्रभुः ॥१४॥
नालीकबन्धुरम्भोजस्वजनोऽम्बुजिनीवरः ।
शतपत्रसखस्तोयजन्मस्निग्धोऽम्बुरुट्सुहृत् ॥१५॥
अरविन्दसखः पाथोजन्मस्निग्धोऽब्जिनीविभुः ।
अब्जिनीरमणः कोकसवयाः बिसिनीप्रभुः ॥१६॥
सहस्रपत्रसवयास्तुहिनेतरदीधितिः ।

मृणालिनीप्राणनाथः, सरसीरुहिणीश्वरः ॥१७॥
मुनि-युग-नरपतिसङ्ख्ये वर्षे श्रीहीरविजयसूरीणां ।
वचनेन हेमविजयो रविनाम्नां सङ्ग्रहं विदधे ॥१८॥
॥ इति सूर्यसहस्रनामसङ्ग्रहे दशमः प्रकाशः ॥
पंन्यासहेमविजयगणिविरचिता सूर्यनामकामधेनुः सम्पूर्णा ॥
श्रीरस्तु ॥ कल्याणमस्तु ॥ शुभं भवतु ॥

श्रीजिनसेनाचार्यविरचितं

# श्रीसूर्यसहस्रनामस्तोत्रम्

॥ ॐ नमः श्रीसर्वज्ञाय ॥

## श्रीजिनसेनाचार्यविरचितं श्रीसूर्यसहस्रनामस्तोत्रम्

प्रसिद्धाष्टसहस्रे द्वे, लक्षणाङ्कं गिरांपतिम् ।
नाम्नामष्टसहस्रेणाभिष्टुमोऽभीष्टसिद्धये ॥१॥
श्रीमान् स्वयंभूर्वृषभः, शम्भवः शम्भूरात्मभूः ।
स्वयंप्रभः प्रभुर्भोक्ता, विश्वभूरपुनर्भवः ॥२॥
विश्वात्मा विश्वलोकेशो, विश्वतश्चक्षुरक्षरः ।
विश्वविद् विश्वविद्येशो विश्वयोनिरनश्वरः ॥३॥
विश्वदृश्वा विभुर्ध्याता, विश्वेशो विश्वलोचनः ।
विश्वव्यापी विधुर्वेधा शाश्वतो विश्वतोमुखः ॥४॥
विश्वकर्ता जगज्ज्येष्ठो, विश्वमूर्तिर्जिनेश्वरः ।
विश्वदृग् विश्वभूतेशो, विश्वज्योतिरनीश्वरः ॥५॥
जिनो जिष्णुर.... विष्णुरीशो जगत्पतिः ।
अनन्तजिदचिन्त्यात्मा, भव्यबन्धुरबन्धनः ॥६॥
युगादिपुरुषो ब्रह्मा पञ्चब्रह्ममयः शिवः ।
परापरतरः सूक्ष्मः, परमेष्ठी सनातनः ॥७॥
स्वयंज्योतिरजोऽजन्मा, ब्रह्मयोनिरयोनिजः ।
मोहारिविजयी जेता, धर्मचक्री दयाध्वजः ॥८॥
प्रशान्तारिरनन्तात्मा, योगी योगेश्वरार्चितः ।
ब्रह्मविद् ब्रह्मतत्त्वज्ञो, ब्रह्मेशो विद्युतीश्वरः ॥९॥

शुद्धो बुद्धः प्रबुद्धात्मा, सिद्धार्थः सिद्धशासनः ।
सिद्धान्तविदुरध्येयो सिद्धसाध्यो जगद्धितः ॥१०॥
सहिष्णुरच्युतोऽनन्तप्रभो विष्णुर्भवोद्भवः ।
प्रभूष्णुरजरोऽजय्यो, भ्राजिष्णुर्धीश्वरोऽव्ययः ॥११॥
विभावसुरसम्भूष्णुः, स्वयंभूष्णुः पुरातनः ।
परमात्मा परंज्योतिस्त्रिजगत्परमेश्वरः ॥१२॥
दिव्यभाषापतिर्दिव्यः, पूतवाक् पूतशासनः ।
पूतात्मा परमज्योतिर्धर्माध्यक्षो दमीश्वरः ॥१३॥
श्रीपतिर्भगवानर्हन्नरुजो विरजाः शुचिः ।
तीर्थकृत् केवलीशानः, पूजार्हः स्नातकोऽमलः ॥१४॥
अनन्तदीप्तिर्ज्ञानात्मा, स्वयंबुद्धः प्रजापतिः ।
मुक्तः शक्तो निराबाधो, निःकलो भुवनेश्वरः ॥१५॥
निरञ्जनो जगज्ज्योतिर्निरुक्तोक्तिर्निरामयः ।
अचलस्थितिरक्षोभ्यः, कूटस्थः स्थाणुरक्षयः ॥१६॥
अग्रणीर्ग्रामणीर्नेता, प्रणेता न्यायशास्त्रकृत् ।
शास्ता धर्मपतिर्धर्म्यो, धर्मात्मा धर्मतीर्थकृत् ॥१७॥
वृषध्वजो वृषाधीशो, वृषकेतुर्वृषायुधः ।
वृषो वृषपतिर्भर्ता, वृषभाङ्को वृषोद्भवः ॥१८॥
हिरण्यनाभिर्भूतात्मा, भूतभृद् भूतभावनः ।
प्रभवो विभवो भास्वान्, भवो भव्यो भवान्तकः ॥१९॥
हिरण्यगर्भः श्रीगर्भः, प्रभूतविभवो भवः ।
स्वयंप्रभुः प्रभूतात्मा, भूतनाथो जगत्प्रभुः ॥२०॥

सर्वादिः सर्वदृक् सार्वः, सर्वज्ञः सर्वदर्शनः ।
सर्वात्मा सर्वलोकेशः, सर्ववित् सर्वलोकजित् ॥२१॥
सुगतिः सुश्रुतः संश्रुत्, सुवाक् सूरिर्बहुश्रुतः ।
विश्रुतो विश्वतःपादो, विश्वतूर्ण्यः सुविश्रवाः ॥२२॥
सहस्रशीर्षः क्षेत्रज्ञः, सहस्राक्षः सहस्रपात् ।
भूतभव्यभवद्भर्ता, विश्वविद्यो महेश्वरः ॥२३॥
स्थविष्ठः स्थविरो ज्येष्ठः, प्रष्टः श्रेष्ठो वरिष्ठधीः ।
स्थेष्ठो गरिष्ठो वन्दिष्ठः, श्रेष्ठो निष्ठो गरिष्ठगीः ॥२४॥
विश्वभृद् विश्वसृड् विश्वेड्, विश्वभुग् विश्वनायकः ।
विश्वाशीर्विश्वात्मा विश्वजिद् विजितातङ्कः ॥२५॥
विभवो विभयो वीरो, विशोको विजरो जरन् ।
विरागो विरतोऽसङ्गो, विवक्तो वीतमच्छरः ॥२६॥
विनेयजनताबन्धुर्विलीनाशेषकल्मषः ।
वियोगे योगविद् विद्वान्, विधाता सुविधिः सुधीः ॥२७॥
क्षान्तिभाक् पृथिवीमूर्तिः, शान्तिभाक् सलिलात्मकः ।
वायुमूर्तिरसङ्गात्मा, वह्निमूर्तिरधर्मधक् ॥२८॥
सुयज्वा यजमानात्मा, सुत्त्वा सुत्रामपूजितः ।
ऋत्विग् यज्ञपतियज्वा, यज्ञाङ्गममृतं हविः ॥२९॥
व्योममूर्तिरमूर्तात्मा निर्लेपो निर्मलोऽचलः ।
सोममूर्तिः सुसौम्यात्मा सूर्यमूर्तिर्महाप्रभुः ॥३०॥
मन्त्रविन्मन्त्रकृन्मन्त्री मन्त्रमूर्तिरनन्तकः ।
स्वतन्त्रस्तन्त्रकृत् स्वान्तःकृतान्तः कृततान्तकृत् ॥३१॥

कृती कृतार्थः सत्कृत्यः कृतकृत्यः कृतक्रतुः ।
नित्यो मृत्युञ्जयोऽमृत्युरमृतात्माऽमृतोद्भवः ॥३२॥
ब्रह्मा निष्ठ; परंब्रह्म, ब्रह्मात्मा ब्रह्मसम्भवः ।
महाब्रह्मपतिर्ब्रह्मेड् महाब्रह्मपदेश्वरः ॥३३॥
सुप्रसन्नः प्रसन्नात्मा ज्ञानधर्मदमप्रभुः ।
प्रशमात्मा प्रशान्तात्मा पुराणः पुरुषोत्तमः ॥३४॥
महाऽशोकध्वजोऽशोकः कुम्रष्टा पद्मविष्टरः ।
पद्मेशः पद्मसम्भूतिः, पद्मनाभिरनुत्तरः ॥३५॥
पद्मयोनिर्जगद्योनिरिभ्यस्तुत्यस्तुतीश्वरः ।
स्तवनार्हो हृषीकेशो, जितजेयः कृतक्रियः ॥३६॥
गणाधिपो गणज्येष्ठो, गण्यः पुण्यो गणाग्रणीः ।
गुणाकरो गुणाम्भोधिर्गुणज्ञो गुणनायकः ॥३७॥
अगण्यः पुण्यधीर्गुण्यः, पुण्यकृत् पुण्यशासनः ।
धर्मारामो गुणग्रामः पुण्यापुण्यनिरोधकः ॥३८॥
पापापेतो विपापात्मा, पापात्मा वीतकल्मषः ।
निर्बन्धो निर्मदः शान्तो, निर्मोहो निरुपद्रवः ॥३९॥
निर्निमेषो निराहारो, निःक्रियो निरुपप्लवः ।
निःकलङ्को निरास्तेनो, निर्द्धूतागा निराश्रवः ॥४०॥
विशालो विपुलज्योतिरतुलोऽचिन्त्यवैभवः ।
सुवृतः सुगुप्तात्मा, सुभुक् सुनयतत्ववित् ॥४१॥
एकविद्यो महाविद्यो, मुनिः परिवृढः पतिः ।
धीशो विद्यानिधिः साक्षी, विनेताविहतान्तकः ॥४२॥

पिता पितामहः पाता, पवित्रः पावनो गतिः ।
त्राता भिषक्वरो वर्यो, वरदः परमः पुमान् ॥४३॥
कविः पुराणपुरुषो, वर्षीयान् वृषभः परः ।
प्रतिष्ठाप्रसवो हेतुर्भुवनैकपितामहः ॥४४॥
श्रीवृक्षलक्षणः श्लक्ष्णो, लक्षण्यः शुभलक्षणः ।
निरक्षः पुण्डरीकाक्षः, पुष्कलः पुष्कलेक्षणः ॥४५॥
सिद्धिदः सिद्धिसङ्कल्पः, सिद्धात्मा सिद्धसाधनः ।
बुद्धबोध्यो महाबोधिर्वर्धमानो महर्द्धिकः ॥४६॥
वेदाङ्गो वेदविद् वेद्यो, जागरूको विदांवरः ।
वेदवेद्यः स्वसंवेद्यो वेद्यो वदतांवरः ॥४७॥
अनादिनिधनोऽव्यक्तो, व्यक्तवाग् व्यक्तशासनः ।
युगादिकृत् युगाधारो, युगादिर्जगदादिजः ॥४८॥
अतीन्द्रोऽतीन्द्रियो धीन्द्रो, महेन्द्रोऽतीन्द्रियार्थदृक् ।
अनिन्द्रियोऽहमिन्द्राच्यों, महेन्द्रमहितो महान् ॥४९॥
उद्भवः कारणं कर्ता, पारगो भवतारकः ।
अगाह्यो गहनगुह्यं परार्ध्यः परमेश्वरः ॥५०॥
अनन्तर्द्धिरमेयर्द्धिरचिन्त्यर्द्धिः समग्रधीः ।
प्राज्ञः प्राज्ञहरोऽभ्यग्रहः प्रत्यग्रोऽग्र्योऽग्रिमोऽग्रजः ॥५१॥
महातपा महातेजा महोदर्को महोदयः ।
महायशा महाधीमान्, महासत्त्वो महाद्युतिः ॥५२॥
महामतिर्महानीतिर्महाक्षान्तिर्महाकृतिः ।
महाप्रज्ञो महाभागो, महानन्दो महाकविः ॥५३॥

महामहो महाकीर्तिर्महाकान्तिर्महावपुः ।
महादानो महाज्ञानो, महायोगो महागुणः ॥५४॥
महामहःपतिः प्राप्तमहाकल्याणपञ्चकः ।
महाप्रभुर्महाप्रातिहार्याधीशो महेश्वरः ॥५५॥
महामुनिर्महामौनी, महाध्यानी महादमः ।
महाक्षामा महाशीलो, महायज्ञो महामखः ॥५६॥
महाव्रतपतिर्मह्यो, महाकान्तिधरोऽधिपः ।
महामैत्रीमयोऽमेयो, महोपायो महोमयः ॥५७॥
महाकारुण्यको मंता महामन्त्रो महायतिः ।
महानादो महाघोषो, महेद्यो महसांपतिः ॥५८॥
महाध्वरधरो धुर्यो, महौदार्यो महिष्टवाक् ।
महात्मा महसांधाम, महर्षिर्महितोदयः ॥५९॥
महाक्लेशाङ्कुशः शूरो, महाभूतपतिर्गुरुः ।
महापराक्रमोऽनन्तो, महाक्रोधरिपुर्वशी ॥६०॥
महाभवाब्धिसंसारो महामोहाद्रिसूदनः ।
महागुणाकरः क्षान्तो, महायोगीश्वरः शमी ॥६१॥
महाध्यानपतिर्ध्याता, महाधर्मा महाव्रतः ।
महाकर्मारिहाऽऽत्मज्ञो महादेवो महेशिता ॥६२॥
सर्वक्लेशापहः साधुः, सर्वदोषहरो हरः ।
असङ्ख्येयोऽप्रमेयात्मा, शमात्मा प्रशमाकरः ॥६३॥
सर्वयोगीश्वरोऽचिन्त्यः, श्रुतात्मा विष्टरश्रवाः ।
दान्तात्मा दमतीर्थेशो, योगात्मा ज्ञानसर्वगः ॥६४॥
प्रधानमात्मा प्रकृतिः, परमः परमोदयः ।

प्रक्षीणबन्धकर्मारिः, क्रोधकृत् क्षेमशासनः ॥६५॥
प्रणवः प्रणयः प्राणः, प्राणदः प्राणतेश्वरः ।
प्रमाणप्रणिधिर्दक्षो दक्षिणो ध्वर्युरध्वरः ॥६६॥
आनन्दो नन्दनो नन्दो, वन्द्योऽनिन्द्योऽभिनन्दनः ।
कामहा कामदः काम्यः, कामधेनुररिञ्जयः ॥६७॥
असंस्कृतसुसंस्कारो प्राकृतो वै कृतान्तकृत् ।
अन्तकृत् कान्तगुः कान्तश्चिन्तामणिरभीष्टदः ॥६८॥
अजितो जितकामारिरमितोऽमितशासनः ।
जितक्रोधो जितामित्रो, जितक्लेशो जितान्तकः ॥६९॥
जिनेन्द्रः परमानन्दो, मुनीन्द्रो दुन्दुभिस्वनः ।
महेन्द्रवन्द्यो योगीन्द्रो, यतीन्द्रो नाभिनन्दनः ॥७०॥
नाभेयो नाभिजो जातः, सुव्रतो मनुरुत्तमः ।
अभेद्योऽनत्ययो नाश्वानधिकोऽधिगुरुः सुधीः ॥७१॥
सुमेधा विक्रमी स्वामी, दुराधर्षो निरुत्सकः ।
विशिष्टोऽशिष्टभुक् शिष्टः, प्रत्ययः कमनोऽनघः ॥७२॥
क्षेमी क्षेमङ्करोऽक्षय्यः, क्षेमधर्मपतिः क्षमी ।
अग्राह्यो ज्ञाननिग्राह्यो ज्ञानगम्यो निरुत्तारः ॥७३॥
सुकृती धातुरिज्यार्हः, सुनयश्चतुराननः ।
श्रीनिवासश्चतुर्वक्त्रश्चतुरास्यश्चतुर्मुखः ॥७४॥
सत्यात्मा सत्यविज्ञानः सत्यवाक् सत्यशासनः ।
सत्याशीः सत्यसन्धानः, सत्यः सत्यपरायणः ॥७५॥
स्थेयान् स्थवीयान् नेदीयान्, दवीयान् दूरदर्शनः ।
अणोरणीयाननणुर्गुरुराद्यो गरीयसाम् ॥७६॥

सदायोगः सदाभोगः, सदाश्रेष्ठः सदाशिवः ।
सदागतिः सदासौख्यः, सदाविद्यः सदोदयः ॥७७॥
सुघोषः सुमुखः सौम्यः, सुखदः सुहितः सुहृत् ।
सुगुप्तो गुप्तिभृद् गोप्ता लोकाध्यक्षो दमेश्वरः ॥७८॥
बृहन् बृहस्पतिर्वाग्मी, वाचस्पतिरुदारधीः ।
मनीषी धिषणो धीमान्, समुखीशो गिरांपतिः ॥७९॥
नैकरूपो नयोत्तुङ्गो, नैकात्मा नैकधर्मकृत् ।
अविज्ञेयो प्रतर्कात्मा, कृतज्ञः कृतलक्षणः ॥८०॥
ज्ञानगर्भोदयागर्भो, रत्नगर्भः प्रभास्वरः ।
पद्मगर्भो जगद्गर्भो हेमगर्भः सुदर्शनः ॥८१॥
लक्ष्मीवांस्त्रिदशाध्यक्षो दृढीयातिनईशिता ।
मनोहरो मनोज्ञाङ्गो, धीरो गम्भीरशासनः ॥८२॥
धर्मयूपो दयायोगो, धर्मनेमिर्मुनीश्वरः ।
धर्मचक्रायुधो देवः, कर्महा धर्मघोषणः ॥८३॥
अमोघवागमोघज्ञो, निर्मलामोघशासनः ।
सुरूपः सुभगस्त्यागी, समयज्ञः समाहितः ॥८४॥
सुस्थितः स्वास्थ्यभाक् सुस्थो नीरजस्को निरुद्धतः ।
अलेपो निःकलङ्कात्मा वीतरागो गतस्पृहः ॥८५॥
वश्येन्द्रियो विमुक्तात्मा, निःसपत्नो यतेन्द्रियः ।
प्रशान्तोऽनन्तधामर्षि मङ्गलं मलहानघः ॥८६॥
अनीदृगुपमाभूतो, तुष्टिर्दैवमगोचरः ।
अमूर्तो मूर्तिमानेको, नैको नानैकतत्त्वदृक् ॥८७॥

अध्यात्मगम्यो गम्यात्मा, योगविद्यो योगिवन्दितः ।
सर्वत्रगः सदाभावी त्रिकालविषयार्थदृक् ॥८८॥
शङ्करः शंवदो दान्तो दमी क्षान्तिपरायणः ।
अधिपः परमाणन्दः परात्मज्ञः परावरः ॥८९॥
त्रिजगद्वल्लभोऽभ्यर्च्यस्त्रिजगन्मङ्गलोदयः ।
त्रिजगत्पतिपूज्यांह्रिस्त्रिलोकाग्रशिखामणिः ॥९०॥
त्रिकालदर्शी लोकेशो, लोकधाता दृढव्रतः ।
सर्वलोकातिगः पूज्यः सर्वलोकैकसारथिः ॥९१॥
पुराणपुरुषः पूर्वः, कृतपूर्वाङ्गविस्तरः ।
आदिदेवः पुराणाद्यः, पुरादेवोऽधिदेवता ॥९२॥
युगमुख्यो युगजेष्ठो, युगादिस्थितिदेशकः ।
कल्याणवर्णः कल्याणकल्पः कल्याणलक्षणः ॥९३॥
कल्याणप्रकृतिर्दीप्रः कल्याणात्मा विकल्मषः ।
विकलङ्कः कलातीतः कलिविघ्नकलाधरः ॥९४॥
देवदेवो जगन्नाथो, जगद्बन्धुर्जगद्विभुः ।
जगद्धितैषी लोकज्ञः, सर्वगो जगदग्रगः ॥९५॥
चराचरगुरुर्गोप्यो, गूढात्मा गूढगोचरः ।
सद्योजातः प्रकाशात्मा, ज्वलज्ज्वलनः सुप्रभः ॥९६॥
आदित्यवर्णो भर्गाभः, सुप्रभः कनकप्रभः ।
सुवर्णवर्णो रुक्भाभः, सूर्यकोटिसमप्रभः ॥९७॥
तपनीयनिभस्तुङ्गो, बालार्काभोऽनलप्रभः ।
सन्ध्याभूबभ्रूर्हेमाभस्तप्तचामीकरच्छविः ॥९८॥

...... कनकच्छाय:, कनत्काञ्चनसन्निभ: ।
हिरण्यवर्ण: स्वर्णाभ: शातकुम्भनिभप्रभ: ॥९९॥
द्युम्नाभो जातरूपाभो, दीप्तजाम्बूनदद्युति: ।
सुधौतकलधौतश्री:, प्रदीप्तो हाटकद्युति: ॥१००॥
शिष्टेष्ट: पुष्टिद: पुष्ट:, स्पष्ट: स्पष्टाक्षर: क्षम: ।
शत्रुघ्न-प्रतिघोऽमोघ:, प्रशास्ता शासितास्वक: ॥१०१॥
शान्तिनिष्ट मुनिज्येष्ठ:, शिवतातिः शिवप्रद: ।
शान्तिद: शान्तिकृत् शान्ति:, कान्तिमान् कामितप्रद: ॥१०२।
श्रियांनिधिरधिष्टानमप्रतिष्टप्रतिष्ठित: ।
सुस्थिद: स्थावर: स्थाष्णु:, प्रथीयान् प्रथितप्रथु: ॥१०३॥
दिग्वासा वातर शनो, निर्ग्रन्थेशो दिगम्बर: ।
निष्कञ्चनो निराशंसो, ज्ञानचक्षुरमोमुह: ॥१०४॥
तेजोराशिरनन्तौजा, ज्ञानाब्धि: शीलसागर: ।
तेजोमयोऽमितज्योतिर्ज्योतिमूर्तिस्तमोपह: ॥१०५॥
जगच्चूडामणिर्दीप्त:, शंवान् विघ्नविनायक: ।
कलिघ्न: कर्मशत्रुघ्नो, लोकालोकप्रकाशक: ॥१०६॥
अनिद्रालुरतन्द्रालुर्जागरूक: प्रमामय: ।
लक्ष्मीपतिर्जगज्ज्योतिर्धर्मराज: प्रजाहित: ॥१०७॥
मुमुक्षुर्बन्धमोक्षज्ञो, जिताक्षो जितमन्मथ: ।
प्रशान्तरसशीलूषो, भव्यपेटकनायक: ॥१०८॥
मूलकर्ता-ऽखिलज्योतिर्मलघ्नो मूलकारणम् ।
आप्तो वागीश्वरा: श्रेयान्, श्रीयसोक्तिर्निरुक्तवाक् ॥१०९॥
प्रवक्ता वचसामीशो, मारजिद् विश्वभाववित् ।

सुतनुसूनुर्निर्मुक्तः, सुगतो हतदुर्णयः ॥११०॥
श्रीशः श्रीश्रितपादाब्जो, वीतभीरभयङ्करः ।
उच्छन्नदोषो निर्विघ्नो, निश्चलो लोकवत्सलः ॥१११॥
लोकोत्तारो लोकपतिर्लोकचक्षुरपारधीः ।
धीरधीबुद्धसन्मार्गः, शुद्धसूनृतपूतवाक् ॥११२॥
प्रजापारमितः प्राज्ञो, यतिर्नियमतेन्द्रियः ।
भदन्तो भद्रकृद् भद्रः, कल्पवृक्षो वरप्रदः ॥११३॥
समुन्मूलितकर्मारिः, कर्मकाष्ठाशुशुक्षणिः ।
कर्मण्यः कर्मठः प्रांशुर्हेयादेयविचक्षणः ॥११४॥
अनन्तशक्तिरच्छेद्यस्त्रिपुरारिस्त्रिलोचनः ।
त्रिनेत्रस्त्र्यम्बकस्त्र्यक्षः, केवलज्ञानवीक्षणः ॥११५॥
समन्तभद्र-शान्तारिर्धर्माचार्यो दयानिधिः ।
सूक्ष्मदर्शी जितानङ्गः, कृपालुर्धर्मदेशकः ॥११६॥
शुभंयुः सुखसाद्भूतः, पुण्यराशिरनामयः ।
धर्मपालो जगत्पालो, धर्मसाम्राज्यनायकः ॥११७॥
नाम्नां पठेत् वाऽमूनि नामान्यागमकोविदैः ।
समुच्चितान्यनुध्यायपुमान् पूतस्मृतिर्भवेत् ॥११८॥
गोचरोऽपि गिरामासां, त्वमवागगोचरो मतः ।
स्तोता तथाप्यसन्दिग्धं त्वतोऽभीष्टफलं भजेत् ॥११९॥
त्वमतोऽसि जगद्बन्धुस्त्वमतोऽसि जगद्भिषक् ।
त्वमतोऽसि जगत्त्राता, त्वमतोऽसि जगद्धितः ॥१२०॥
त्वमेकं जगतां ज्योतिस्त्वं विरूपोपयोगभाक् ।
त्वं त्रिरूपैकमुक्त्यङ्गं, स्वोत्थानन्तचतुष्टयः ॥१२१॥

त्वं पञ्चब्रह्मतत्त्वात्मा, पञ्चकल्याणनायकः ।
षट्भेदभावतत्वज्ञस्त्वं सप्तनयसङ्ग्रहः ॥१२२॥
दिव्याष्टगुणमूर्तिस्त्वं, नवकेवललब्धिकः ।
दशावतारनिर्धार्यो, मां पाहि परमेश्वरः ॥१२३॥
युष्मन्नामावलीदृब्धविलसत्स्तोत्रमालया ।
भवन्तं वरिवस्यामः, प्रसीदानुगृहाण नः ॥१२४॥
इदं स्तोत्रमनुस्मृत्य, पूतो भवति भाक्तिकः ।
यः सम्पाठं पठत्येनं, स स्यात् कल्याणभाजनम् ॥१२५॥
ततः सदेहं पुण्यार्थी, पुमान् पठतु पुण्यधीः ।
पौरहूतिं श्रियं प्राप्तुं, परमामभिलाषुकः ॥१२६॥
॥ इति श्रीजिनसेनाचार्यकृतः श्रीसूर्यसहस्रनामस्तोत्रम् ॥

श्रीगौतमाय नमः

मुद्रित प्रति में एवं हस्तलिखित प्रतियों में उल्लिखित सूर्य के १०४४ नाम। नामों के क्रम में कहीं कहीं अंतर पाया जाता है। मैंने मुद्रित प्रति के अनुसार ही नाम लिखे हैं।

आदिदेवः २. आदित्यः ३. आदितेजाः ४. आपः ५. आचारतत्परः ६. आयुः ७. आकारः ८. आकाशः ९. आलोककृत् १० आमुक्तः ११. ॐकारः १२. आरोग्यः १३. आरोग्यकारणम् १४. आशुगः १५. आतपः १६. आतपी १७. आत्मा १८. आत्रेयः १९. असहः २०. असङ्गगामी २१. असुरान्तकः २२. उस्रपतिः २३. अहर्पतिः २४. अहिमान् २५. अहिमांशुभृत् २६. अहिमकरः २७. अहिमरुचिः २८. अहिंसकः २९. अहर्मणिः ३०. उदारकर्मा ३१. अद्वितीयः ३२. उदीच्यवेशः ३३. अपांपतिः ३४. अभयप्रदः ३५. अभिनन्दितः ३६. अभिष्टुतः ३७. अब्जहस्तः ३८. अब्जबान्धवः ३९. अपराजितः ४०. अप्रमेयः ४१. अजः उच्चैः ४२. अच्युतः ४३. अजयः ४४. अचलः ४५. अचिन्त्यः ४६. अचिन्त्यात्मा ४७. अचरः ४८. अजितः ४९. अविचिन्त्यवपुः ५०. अव्ययः ५१. अव्यङ्गधारी ५२. ऊर्जितः ५३. अयोनिजः ५४. ऐन्धनः ५५. एकः ५६. एकाकी ५७, एकचक्ररथः ५८. एकनाथः ५९. ईशः ६० ईश्वरः ६१. अक्लिष्टकर्मकृत् ६२. उग्ररूपः ६३. अग्निः ६४. अकिञ्चनः ६५. अक्षरः ६६. अलङ्कारः ६७. अलङ्कृतः ६८. अमायः ६९. अमेयात्मा ७०. अमरप्रभुः ७१. अमरश्रेष्ठः ७२. अमितः ७३ अमितात्मा ७४. अणुः ७५. इनः ७६. अनाद्यन्तः ७७. अन्धकारापहः ७८. इन्द्रः ७९. अम्भः ८०. अम्भोजबान्धवः ८१. अम्बुदः ८२. अम्बरभूषणः ८३. अनेकः ८४.

अङ्गारकः ८५. अङ्गिराः ८६. अनलः ८७. अनलप्रभः ८८. अनिमित्तागतिः ८९. अनङ्गः ९०. अन्नः ९१. अनन्तः ९२. अनिर्देश्यः ९३. अनिर्देश्यवपुः ९४. अंशुः ९५. अंशुमान् ९६. अंशुमाली ९७. अनुत्तमः ९८. अरिहा ९९. अर्हन् १००. अरविन्दाक्षः १०१. अर्यमा १०२, अर्कः १०३. अरिमर्दनः १०४. अरुणसारथिः १०५. अश्वत्थः १०६. अशीतरश्मिः १०७. उष्णकरः १०८. अश्विनः १०९. अशिशिरः ११०. अतुलद्युतिः १११. अतीन्द्रः ११२. अतीन्द्रियः ११३. उत्तमः ११४. उत्तारः ११५. साधुः ११६.सावर्णः ११७. सावित्रिभाविता ११९. सायनः १२१. सौख्यः १२२. सागरः १२३. सामः १२४. सामवेदः १२५. सारङ्गधन्वा १२६. सहस्राक्षः १२७. सहस्रांशुः १२८. सहस्रधामा १२९. सहस्रदीधितिः १३०. सहस्रपात् १३१. सहस्रचक्षुः १३२. सहस्रश्रोत्रः १३३. सहस्रकरः १३४. सहस्रकिरणः १३५. सहस्ररश्मिः १३६. सदायोगी १३७. सदागतिः १३८. सुधर्मा १३९. सिद्धः १४०. सिद्धकार्यः १४१. सभाजित् १४२. सुप्रभः १४३. सुप्रदीपकः १४४. सुप्रभावनः १४५. सुप्रभाकरः १४६. सुप्रियः १४७. सुपर्णः १४८. सप्तार्चिः १४९. सप्ताश्वः १५०. सप्तजिह्वः १५१. सप्तलोकनमस्कृतः १५२. सप्तमीप्रियः १५३. सप्तिमान् १५४. सप्तसप्तिः १५५. सप्ततुरङ्गः १५६. स्वःस्वाहाकारः १५७. सुवाहनः १५८. स्वाहाभुक् १५९. स्वाचारः १६०. सुवाक् १६१. सुसंयुक्तः १६२. सुस्थितः १६३. स्वजनः १६४. सुवेशः १६५. सूक्ष्मः १६६. सूक्ष्मधीः १६७. सोमः १६८. सूर्यः १६९. सुवर्चाः १७०. सुवर्णः १७१. स्वर्णः १७२. स्वर्णरेताः १७३. सुविशिष्टः १७४. सुवितानः १७५. सैंहिकेयरिपुः १७६. स्वयंविभुः १७७. स्वयंप्रभुः १७८. सुखदः १७९. सुखप्रदः १८०. सुखी १८१. सुखसेव्यः १८२. सुकेतनः

१८३. स्कन्दः १८४. सुलोचनः १८५. समाहितमतिः १८६. समायुक्तः १८७. समाकृतिः १८८. सुमहाबलः १८९. समुद्रः १९०. सुमूर्तिः १९१. सुमेधाः १९२. सुमनाः १९३. सुमनोहरः १९४. सुमङ्गलः १९५. सुमतिः १९६. सुमितः १९७. सुमितिञ्जयः १९८. सनातनः १९९. संसारार्णवतारकः २००. संसारगतिविच्छेत्ता २०१.संसारतारकः २०२. संहर्ता २०३. सम्पूर्णः २०४. सम्पन्नः २०५. सम्प्रकाशकः २०६. सम्प्रतापनः २०७. सञ्चारी २०८. सञ्जीवनः २०९. संयमः २१०. सम्विभागी २११. संवर्तकः २१२. संवत्सरः २१३. संवत्सरकरः २१४. सुनयः २१५. सुनेत्रः २१७. सङ्कल्पयोनिः २१८. सन्तापनः २१९. सन्तानकृत् २२०. सन्तपनः २२१. सुराध्यक्षः २२२. सुरावृतः २२३. सुरारिहा २२४. सुरारिः २२५. सर्वासहः २२६, स्वर्भाणुः २२७. सर्वदः २२८. सर्वदर्शी २२९. सर्वप्रियः २३०. सर्ववेदप्रगीतात्मा २३१. सर्ववेदालयः २३२. सर्वरत्नमयः २३३. सुरपूजितः २३४. सर्वलोकप्रकाशकः २३५. सुरपतिः २३६. सर्वशत्रुनिवारणः २३७. सर्वतोमुखः २३८. सर्वः २३९. सर्वात्मा २४०. सर्वस्वः २४१. सर्वस्वी २४२. सर्वद्योतः २४३. सर्वद्युतिकरः २४४. सर्वजितांवरः २४५. सर्वोदधिस्थितिकरः २४६. सर्ववृतः २४७. सर्वमर्दनः २४८. सर्वप्रहरणायुधः २४९. सर्वप्रकाशकः २५०. सर्वगः २५१. सर्वज्ञः २५२. सर्वकल्याणभाजनः २५३. सर्वसाक्षी २५४. सर्वशास्त्रभृतांवरः २५५. सुरेशः २५६. सर्गः २५७. सर्गादिकरः २५८. सुरकार्यज्ञः २५९. स्वर्गद्वारः २६०. स्वर्गप्रतर्दनः २६१. स्रग्वी २६२. सुरमणिः २६३. सुरनिभाकृतिः २६४. सुरश्रेष्ठः २६५. सृष्टिः २६६. स्रष्टा २६७. श्रेष्ठात्मा २६८. सृष्टिकृत् २६९. सृष्टिकर्ता २७०. सुरथः २७१. सितः २७२. स्थावरात्मकः २७३.

स्थानस्थूलदृक् २७४. स्थविर: २७५. स्थित: २७६. स्थेय: २७७. स्थितिमान् २७८. स्थितिहेतु: २७९. स्थिरात्मा २८०. स्थितिस्थेय: २८१. स्थितिप्रिय: २८२. सुतप: २८३. सत्व: २८४. स्तोत्र: २८५. सत्यवान् २८६. सत्य: २८७. सत्यसन्धि: २८८. हुव: २८९. होम: २९०. होमान्तकरण: २९१. होता २९२. हयग: २९३. हेलि: २९४. हिमद: २९५. हंस: २९८. हर: २९९. हरि: ३००. हरिदश्व: ३०१. हरिप्रिय: ३०२. हर्यश्व: ३०३. हरी ३०४. हिरण्यगर्भ: ३०५. हिरण्यरेता: ३०६. हरिताश्व: ३०७. हुत: ३०८. हुताहुति: ३०९. द्यौ: ३१०. दु:स्वप्राशुभनाशन: ३११. धराधर: ३१२. धाता ३१३. ध्वान्तापह: ३१४. ध्वान्तसूदन: ३१५. ध्वान्तविद्वेषी ३१६. ध्वान्तहा ३१७. धूमकेतु: ३१८. धीमान् ३१९. धीर: ३२०. धीरात्मा ३२१. धन: ३२२. धनाध्यक्ष: ३२३. धनद: ३२४. धनञ्जय: ३२५. धन्वन्तरि: ३२६. धन्य: ३२७. धनुर्धर: ३२८. धनुष्मान् ३२९. ध्रुव: ३३०. धर्म: ३३१. धर्माधर्मप्रवर्तक: ३३२. धर्माधर्मवरप्रद: ३३३. धर्मद: ३३४. धर्मध्वज: ३३५. धर्मवृक्ष: ३३६. धर्मवृत: ३३७. धर्मवत्सल: ३३८. धर्मकेतु: ३३९. धर्मकर्ता ३४०. धर्मनित्य: ३४१. धर्मरत: ३४२. धरणीधर: ३४३. धर्मराज: ३४४. धृतातपत्राप्रतिम: ३४५. धृतिकर: ३४६. धृतिमान् ३४७. दिवा ३४८. द्वादशात्मा ३४९. द्वापर: ३५०. दिवापुष्ट: ३५१. दिवापति: ३५२. दिवाकर: ३५३. दिवाकृत् ३५४. दिवसपति: ३५५. दिविस्थित: ३५६. दिव्यवाह: ३५७. दिव्यवपु: ३५८. दिव्यरूप: ३५९. द्युवृक्ष: ३६०. दयालु: ३६१. देहकर्ता ३६२. दीधितिमान् ३६३. दीप्तांशु: ३६४. दीप्तदीधिति: ३६५. देव: ३६६. देवदेव: ३६७. द्योत: ३६८. द्योतन: ३६९. द्योतितानल: ३७०. दिक्पति: ३७१. दिग्वासा: ३७२. दक्ष:

३७३. दिनाधीशः ३७४. दिनबन्धुः ३७५. दिनमणिः ३७६. दिनकृत् ३७७. दिननाथः ३७८. दुराराध्यः ३७९. पापनाशनः ३८०. पावनः ३८१. भास्वान् ३८२, भास्करः ३८३. भासन्तः ३८४. भासत ३८५. भासितः ३८६. भावितात्मा ३८७. भाग्यः ३८८. भानुः ३८९. भानेमिः ३९०. भानुकेसरः ३९१. भानुमान् ३९२. भानुरूपः ३९३. बहुदायकः ३९४. भूधरः ३९५. भवद्योतः ३९६. भूपतिः ३९७. भूष्यः ३९८. भूषणोद्भासी ३९९. भोगी ४००. भोक्ता ४०१. भुवनपूजितः ४०२. भुवनेश्वरः ४०३. भूष्णुः ४०४. भूतादिः ४०५. भूतान्तकरणः ४०६. भूतात्मा ४०७. भूताश्रयः ४०८. भूतिदः ४०९, भूतभव्यः ४१०. भूतविभुः ४११. भूतप्रभुः ४१२. भूतपतिः ४१३. भूतेशः ४१४. भूषणः ४१५. भयान्तकरणः ४१६. भीमः ४१७. भीमत ४१८. भगः ४१९. भगवान् ४२०. भक्तवत्सलः ४२१. बहुमङ्गलः ४२२. बहुरूपः ४२३. भूताहारः ४२४. भिषग्वरः ४२५. बुद्धः ४२६. बुद्धिवर्धनः ४२७. बुद्धिः ४२८. बुद्धिमान् ४२९. ब्रध्नः ४३०. पद्महस्तः ४३१. पद्मपाणिः ४३२. पद्मबन्धुः ४३३. पद्मयोगी ४३४. पद्मयोनिः ४३५. पद्मोदरनिभाननः ४३६. पद्मेक्षणः ४३७. पद्ममाली ४३८. पद्मनाभः ४३९. पद्मिनीशः ४४०. विभावसः ४४१. विचित्ररथः ४४२. पूतात्मा ४४३. पवित्रात्मा ४४४. पूषा ४४५. व्योममणिः ४४६. पीतवासाः ४४७. पक्षबलः ४४८. बलभृत् ४४९. बलप्रियः ४५०. बलवान् ४५१. बली ४५२. बलिनांवरः ४५३. पिनाकधृक् ४५४. बिन्दुः ४५५. बन्धुः ४५६. बन्धहा ४५७. पुण्डरीकाक्षः ४५८. पुण्यसङ्कीर्तनः ४५९. पुण्यहेतुः ४६०. परः ४६१. प्राप्तयानः ४६२. परावरः ४६३. परावरज्ञः ४६४. परायणः ४६५. प्राज्ञः ४६६. पराक्रमः ४६७. प्राणधारकः ४६८. प्राणवान् ४६९. प्रांशुः ४७०. प्रसन्नात्मा ४७१.

प्रसन्नवदनः ४७२. ब्रह्मा ४७३. ब्रह्मचर्यवान् ४७४. प्रद्योतः ४७५. प्रद्योतनः ४७६. प्रभावनः ४७७. प्रभाकरः ४७८. प्रभञ्जनः ४७९. परप्राणः ४८०. परपुरञ्जयः ४८१. प्रजाद्वारः ४८२. प्रजापतिः ४८३. प्रजनः ४८४. पर्जन्यप्रियः ४८५. प्रियदर्शनः ४८६. प्रियकारी ४८७. प्रियकृत् ४८८. प्रियंवदः ४८९. प्रियङ्करः ४९०. प्रयतः ४९१. प्रीतिः ४९२. प्रयतात्मा ४९३. प्रीतात्मा ४९४. प्रयतानन्दः ४९५. प्रीतिमनाः ४९६. प्रकाशनः ४९७. पुरुषोत्तामः ४९८. प्रकृतिः ४९९. प्रकृतिस्थितिः ५००. प्रलम्बहारः ५०१. परमोदारः ५०२. परमेष्ठी ५०३. पुरन्दरः ५०४. प्रणतार्तिहा ५०५. प्रणतार्तिहरः ५०६. परन्तपः ५०७. प्रेताः ५०८. प्रशान्तः ५०९. प्रशमः ५१०. प्रतापनः ५११. प्रतापवान् ५१२. पृथिवी ५१३. प्रथितः ५१४. प्रत्यूहः ५१५. वृषाकपिः ५१६. पुरुषः ५१७. वृषध्वजः ५१८. विश्वः ५१९. विश्वामित्रः ५२०. विश्वम्भरः ५२१. पशुमान् ५२२. विश्वतापनः ५२३. पिता ५२४. पितामहः ५२५. पतगः ५३६. पतङ्गः ५३७. पितृद्वारः ५३८. पुष्कलनिभः ५३९. वषट्कारः ५४०. ज्यायान् ५४३. जामदाग्र्यजित् ५४४. चारुचरितः ५४५. जाठरः ५४६. जातवेदाः ५४७. छन्दवाहनः ५४८. योगी ५४९. योगीश्वरपतिः ५५०. योगनित्यः ५५१. योगतत्परः ५५२. ज्योतिरिशः ५५३. जयः ५५४. जीवः ५५५. जीवानन्दः ५५६. जीवनः ५५७. जीवनाथः ५५८. जीमूतः ५५९. जलप्रियः ५६०. जेता-जगत् ५६१. युगादिकृत् ५६२. युगः ५६३. युगार्तवः ५६४. जगदाधारः ५६५. जगदादिजः ५६६. जगदानन्दः ५६७. जगद्दीपः ५६८. जगज्जेता ५६९. चक्रबन्धुः ५७० चक्रवर्ती ५७१. चक्रपाणिः ५७२. जगन्नाथः ५७३. जगत् ५७४. जगतामन्तकरणः ५७५. जगतांपतिः ५७६. जगत्साक्षी ५७७. जगत्पतिः ५७८. जगत्प्रियः ५७९.

जगत्पिता ५८०. यमः ५८१. जनार्दनः ५८२. जनानन्दः ५८३. चण्डकरः ५८४. जनेश्वरः ५८५. जङ्गमः ५८६. जनयिता ५८७. चराचरात्मा ५८८. यशस्वी ५८९. जिष्णुः ५९०. जितावरीशः ५९१. जितवपुः ५९२. जितेन्द्रियः ५९३. चतुर्भुजः ५९४. चतुर्वेदः ५९५. चतुर्वेदमयः ५९६. चतुर्मुखः ५९७. चित्राङ्गदः ५९८. वासुकिः ५९९. वासरेशिता ६००. वासरस्वामी ६०१. वासरप्रभुः ६०२. वासरप्रियः ६०३. वासरेश्वरः ६०४. वाहनार्तिहरः ६०५. वायुः ६०६. वायुवाहनः ६०७. वायुरताः ६०८. वाग्विशारदः ६०९. वाग्मी ६१०. वारिधिः ६११. वारणः ६१२. वसुदाता ६१३. वसुप्रदः ६१४. वसुप्रियः ६१५. वसुमान् ६१६. विसृजः ६१७. विहारी ६१८. विहगवाहनः ६१९. विहङ्गः ६२०. विहङ्गमः ६२१. विहितः ६२२. विधिः ६२३. विधाता ६२४. विधेयः ६२५. वदान्यः ६२६. विद्वान् ६२७. विद्योतनः ६२८. विद्या ६२९. विद्यावान् ६३०. विद्याराजः ६३१. विद्युत् ६३२. विद्युद्वान् ६३३. विदिताशयः ६३४. विपाप्मा ६३५. विभावसुः ६३६. विभवः ६३७. वर्चसांपतिः ६३८. विजयः ६३९. विजयप्रदः ६४०. विजेता ६४१. विचक्षणः ६४२. विवस्वान् ६४३. विविधः ६४४. विविधासनः ६४५. वज्रधरः ६४६. व्याधिहा ६४७. व्याधिनाशनः ६४८. व्यासः ६४९. वेदाङ्गः ६५०. वेदपारगः ६५१. वेदभृत् ६५२. वेदवाहनः ६५३. वेदवेद्यः ६५४. विदवित् ६५५. वैद्यः ६५६. वेदकर्ता ६५७. वेदमूर्तिः ६५८. वेदन्लियः ६५९. व्योमगः ६६०. विचित्ररथः ६६१. व्योममणिः ६६२. वेगवान् ६६३. विगतात्मा ६६४. वीरः ६६५. वैश्रवणः ६६६. विगाही ६६७. विघ्नशमनः ६६८. विघृणः ६६९. विग्रहः ६७०. विकृतिः ६७१. वक्ता ६७२. व्यक्ताव्यक्तः ६७३. विगतारिष्टः ६७४. विमलः ६७५. विमलद्युतिः ६७६.

विमन्युः ६७७. विमर्खी ६७८. विनिद्रः ६७९. विराजः ६८०. विराट् ६८१. बृहस्पतिः ६८२. बृहत्कीर्तिः ६८३. बृहज्जेता ६८४. बृहत्तेजाः ६८५. वरदः ६८६. वरदाता ६८७. वृद्धिः ६८८. वृद्धिदः ६८९. वरप्रदः ६९०. वर्चस ६९१. विरूपाक्षः ६९२. विरोचनः ६९३. वरीयान् ६९४. वरुणः ६९५. वरनायकः ६९६. वर्णाध्यक्षः ६९७. वरुणेशः ६९८. वरेण्यः, वरेण्यवृत्तः ६९९. वृत्तिधरः ७००. वृत्तिचारी ७०१. विश्वामित्र ७०२. वृत्तिः ७०३. वशानुगः ७०४. विशाखः ७०५. विश्वेश्वरः ७०६. विश्वयोनिः ७०७. विश्वजित् ७०८. विश्ववित् ७०९. विशोकः ७१०. विशेषवित् ७११. विष्णुः ७१२. विश्वात्मा ७१३. विश्वभावनः ७१४. विश्वकर्मा ७१५. विश्वनिलयः ७१६. विश्वरूपी ७१७. विश्वतोमुखः ७१८. विशिष्टः ७१९. विशिष्टात्मा ७२०. विपादः ७२१. यज्ञः ७२२. यज्ञपतिः ७२३. काकः ७२४. कालः ७२५. कालानलद्युतिः ७२६. कालहा ७२७. कालचक्रः ७२८. कालचक्रप्रवर्तकः ७२९. कालकर्ता ७३०. कालनाशनः ७३१. कालत्रयः ७३२. कामः ७३३. कामारिः ७३४. कामदः ७३५. कामचारी ७३६. काङ्क्षिकः ७३७.कान्तिः ७३८. कान्तिप्रदः ७३९. कार्यकारणावहः ७४०. कारुणिकः ७४१. कार्तस्वरः ७४२. काश्यपेयः ७३७. काष्ठा ७३८. कपिः ७३९. कुबेरः ७४०. कपिलः ७४१. गभस्तिमान् ७४२. गभस्तिमाली ७४३. कपर्दी ७४४. खः ७४५. खतिलकः ७४६. खद्योतनः ७४७. खोल्का ७४८. खगः ७४९. खगसत्तमः ७५०. घर्मांशुः ७५१. घृणिः ७५२. घृणिमान् ७५३. कविः ७५४. कवचः ७५५. कवची ७५६. गोपतिः ७५७. गोविन्दः ७५८. गोमान् ७५९. ज्ञानशोभनः ७६०. ज्ञानवान् ७६१. ज्ञानगम्यः ७६२. ज्ञेयः ७६३. केयूरः ७६४. कीर्तिः ७६५. कीर्तिवर्धनः ७६६. कीर्तिकरः ७६७.

केतुमान् ७६८. गगनकेतुः ७६९. गगनमणिः ७७०. कला ७७१. कल्पः ७७२. कल्पान्तः ७७३. कल्पान्तकः ७७४. कल्पान्तकरणः ७७५. कल्पंकरः ७७६. कल्पकृत् ७७७. कल्पकः ७७८. कल्पकर्ता ७७९. कल्पिताम्बरः ७८०. कल्याणः ७८१. कल्याणकरः ७८२. कल्याणकृत् ७८३. कलिकालज्ञः ७८४. कल्पवपुः ७८५. कल्मषापहः ७८६. कमलाकरबोधनः ७८७. कमलानन्दः ७८८. गुणः ७८९. गन्धवहः ७९०. कुण्डली ७९१. गणपतिः ७९२. कञ्चुकी ७९३. गुणवान् ७९४. गणेशः ७९५. गणेश्वरः ७९६. गणनायकः ७९७. गुरुगृहदः ७९८. गृहपुष ७९८. गृहपतिः ७९९. ग्रहेशः ८००. ग्रहेश्वरः ८०१. ग्रहनादः ८०२. ग्रहनक्षत्रमण्डनः ८०३. क्रियाहेतुः ८०४. क्रियावान् ८०५. गरीयान् ८०६. किरीटी ८०७. कर्मसाक्षी ८०८. करणः ८०९. किरणः ८१०. कर्णसूः ८११. कृष्णवासाः ८१२. कृष्णवर्मा ८१३. कृतकर्मा ८१४. कृताहारः ८१५. कृतांतसुः ८१६. कृतातिथिः ८१७. कृतात्मा ८१८. कृतविश्वः ८१९. कृती ८२०. कृत्यकृत्यः ८२१. कृतमङ्गलः ८२२. कृतिनांवरः ८२३. क्षान्तिः ८२४. क्षुधाजः ८२५. क्षेमः ८२६. क्षेमस्थितिः ८२७. क्षेमप्रियः ८२८. क्षमा ८२९. कश्मलापहः ८३०. गतिमान् ८३१. लोहिताङ्गः ८३२. लोकाध्यक्षः ८३३. लोकालोकनमस्कृतः ८३४. लोकबन्धुः ८३५. लोकवत्सलः ८३६. लोकेशः ८३७. लोककरः ८३८. लोकनाथः ८३९. लोकसाक्षी ८४०. लोकत्रयाशयः ८४१. लयः ८४२. मासमानिदामा ८४३. मान्धाता ८४४. मानी ८४५. मारुतः ८४६. मार्तण्डः ८४७. माता ८४८. मातरः ८४९. महाबाहुः ८५०. महाबुद्धिः ८५१. महाबलः ८५२. महायोगी ८५३. महायशाः ८५४. महावैद्यः ८५५. महावीर्यः ८५६. महावराहः ८५७. महावृत्तिः ८५८.

महाकारुणिकोत्तमः ८५९. महामायः ८६०. महामन्त्रः ८६१. महान् ८६२. महारथः ८६३. महाश्वेताप्रियः ८६४. महाशक्तिः ८६५. महाशनिः ८६६. महातेजाः ८६७. महात्मा ८६८. मुहूर्तः ८६९. महोत्साहः ८७०. महेन्द्रः ८७१. महेच्छः ८७२. महेशः ८७३. महेश्वरः ८७४. मिहिरः ८७५. महितः ८७६. महत्तरः ८७७. मधुसूदनः ८७८. मोक्षदायकः ८७९. मोक्षः ८८०. मोक्षधरः ८८१. मोक्षहेतुः ८८२. मोक्षद्वारः ८८३. मौनी ८८४. मेधा ८८५. मेधावी ८८६. मेधिकः ८८७. मेध्यः ८८८. मेरुमेयः ८८९. मुकुटी ८९०. मनुमुनिः ८९१. मन्दारः ८९२. मन्देहक्षेपणः ८९३. मनोहरः ८९४. मनोहरणरूपः ८९५. मङ्गलः ८९६. मङ्गलालयः ८९७. मङ्गलवान् ८९८. मङ्गलिः ८९९. मङ्गलकर्ता ९००. मन्त्रः ९०१. मन्त्रमूर्तिः ९०२. मरीचिमाली ९०३. मृत्युः ९०४. मरुतामीश्वरेश्वरः ९०५. मरुतांपतिः ९०६. मिष्टाचारः ९०७. मतिः ९०८. मतिमान् ९०९. नाकारः ९१०. नाकपालिः ९११. नागराट् ९१२. नारायणः ९१३. नाथः ९१४. नगः ९१५. नभस्वान् ९१६. नभोविगाहनः ९१७. नभकेतनः ९१८. नूतनः ९१९. नोत्तरः ९२०. नयनैकरूपः ९२१. नैकरूपात्मा ९२२. नीलकण्ठः ९२३. नीललोहितः ९२४. नेता ९२५. नियतात्मा ९२६. निकेतनः ९२७. निक्षुभापतिः ९२८. नन्दिवर्धनः ९२९. नन्दनः ९३०. नरः ९३१. निराकुलः ९३२. निरहङ्कारः ९३३. निर्बन्धः ९३४. निर्गुणः ९३५. निरञ्जनः ९३६. निर्णयः ९३७. नित्योदितः ९३८. नित्यः ९३९. नित्यगामी ९४०. निरञ्जनः ९४१. नित्यरथः ९४२. राजा ९४३. राज्ञीप्रियः ९४४. राज्ञीपतिः ९४५. रविः ९४६. रविराजः ९४७. रुचिप्रदः ९४८. रुद्रः ९४९. ऋद्धिः ९५०. रोचिष्णुः ९५१. रोगहा ९५२. रेणुः ९५३. रेणुकः ९५४. रेवन्तः ९५५. हृषीकेशः ९५६. रक्षोघ्नः ९५७.

रक्ताङ्गः ९५८. रश्मिमाली ९५९. ऋतुः ९६०. रथाधीशः ९६१. रथाध्यक्षः ९६२. रथारूढः ९६३. रथपतिः ९६४. रथी ९६५. रथिनांवरः ९६६. शान्तिप्रियः ९६७. शाश्वतः ९६८. साष्टाक्षरः ९६९. शुद्धः ९७०. शुभः ९७१. शुभाचारः ९७२. शुभप्रदः ९७३. शुभकर्मा ९७४. शब्दकरः ९७५. शुची ९७६. शिवः ९७७. शोभा ९७८. शोभनः ९७९. शुभ्रः ९८०. सुरः ९८१. शीघ्रगः ९८२. शीघ्रगतिः ९८३. शीर्णः ९८५. शेषः ९८६. शुक्रः ९८७. शुक्राङ्गः ९८८. शुक्ररूपः ९८९. शक्तिमान् ९८९. शक्तिमतांश्रेष्ठः ९९०. शम्भुः ९९१. शनैश्चरः ९९२. शनैश्चरपिता ९९३. शर्व ९९४. श्रीधरः ९९५. श्रीपतिः ९९६. श्रेयस्करः ९९७. श्रीकण्ठः ९९८. श्रीमान् ९९९. श्रीमतांवरः १०००. श्रीनिवासः १००१. श्रीनिकेतनः १००२. श्रेष्ठः १००३. शरण्यः १००४. शरण्यार्तिहरः १००५. श्रुतिमान् १००६. शतबिन्दुः १००७. शतमुखः १००८. तापी १००९. तापनः १०१०. तारापतिः १०११. तार्क्ष्यवाहनः १०१२. तपनः १०१३. तपनांबरः १०१४. त्विषामीशः १०१५. त्वरमाणः १०१६. त्वष्टा १०१७. तीव्रः १०१८. तेजः १०१९. तेजसांनिधिः १०२०. तेजसांपतिः १०२१. तेजस्वी १०२२. तेजोनिधिः १०२३. तेजोराशिः १०२४. तेजोनिलयः १०२५. तीक्ष्णः १०२६. तीक्ष्णदीधितिः १०२७. तीर्यः १०२८. तिग्मांशुः १०२९. तमिस्रहा १०३०. तमः १०३१. तमोहरः १०३२. तमोनुदः १०३३. तमोऽरातिः १०३४. तमोघ्नः १०३५. तिमिरापहः १०३६. त्रिविष्टपः १०३७. त्रिविक्रमः १०३८. त्रयः १०३९. त्रेता १०४०. त्रिकसंस्थितः १०४१. त्र्यक्षरः १०४२. त्रिलोचनः १०४३. तरणिः १०४४. त्र्यम्बकः १०४५. त्रिलोकेशः ।

यस्त्विदं शृणुयान्नित्यं, पठेद् वा प्रयतो नरः ।
प्रतापी पूर्णमायुश्च, करस्थास्तस्य सम्पदः ॥१॥
नृपाग्नितस्करभयं, व्याधिभ्यो न भयं भवेत् ।
विजयी च भवेन्नित्यं, स श्रेयः समवाप्नुयात् ॥२॥
कीर्तिमान् सुभगो विद्वान् स सुखी प्रियदर्शनः ।
भवेद् वर्षशतायुश्च, सर्वबाधाविवर्जितः ॥३॥
नाम्ना सहस्रमिदमंशुमतः पठेद् यः शुचिर्नियमवान् सुसमाधियुक्तः ।
दूरेण तं परिहरन्ति सदैव रोगाः, भीताः सुपर्णमिव सर्वमहोरगेन्द्राः ॥४॥
॥ इति श्रीसूर्यनामस्तोत्रं सम्पूर्णम् ॥

अमुं श्रीसूर्यसहस्रनामस्तोत्रं प्रत्यहं प्रणमत्पृथ्वीपति-कोटीरकोटिसङ्घट्टितपदकमल त्रिखण्डाधिपति- दिल्लीपतिपातिसाहि श्रीअकब्बरसाहि जल्लाल-दीनः प्रत्यहं शृणोति । सोऽपि प्रतापवान् भवतु ॥

इस ग्रंथ के अध्ययन से आप जान सकेगें -

- साधना और उपासना के क्षेत्र में सूर्य की उपयोगिता ।
- शारीरिक, मानसिक और आत्मिक संदर्भों में सौरकिरणों की उपयोगिता ।
- सौरऊर्जा से संबंधित कई नए-नए अन्वेषणीय रहस्यात्मक प्रयोगों के संदर्भ ।

— विजय जनकचंद्र सूरि ।



स्वर्गीय
रमण लाल केसरीमल अम्बावत जी
की
पुण्य स्मृति में

सौजन्य :
श्रीमती भीखीबाई केसरीमल जी हीराचंद जी अम्बावत
बकसा जी परिवार
चामुण्डेरी (राजस्थान)